# सौन्दर्य-मीमांसा

पं. परीक्षित् शर्मा



11637/1408/4/50
21-6-1990

801.93
शर्मा। ओ। सौ

असावादित्यो ब्रह्म

# SAUNDARYA—MĪMĀṀSĀ

by

Pt. Ogeti Parikshit Sharma

1988

FIRST EDITION : 1988

801.93
शर्मा।ओ।सौ

**Price Rs : 120/-**

*Published by :*

**Pt. Ogeti Parikshit Sharma**
10/11, Sakal Nagar, Baner Road,
Pune 411007.

*Printed at :*

Vaidika Saṁśodhana Maṇḍala Mudraṇālaya,
Pune 411 037.

# सौन्दर्य - मीमांसा

पण्डित ओगेटि परीक्षित शर्मा

१९८८

# पुरस्कारः

श्रीमन्तः पण्डित - ओगेटि - परीक्षित् - शर्माणः गीर्वाणवाण्यां सप्तविंशति - नाटकानां प्रणेतारः, कालिदास - पारितोषिक - पुरस्कृतस्य यशोधरा-महाकाव्यस्य रचयितारः, जानपदनृत्यगीतमञ्जर्यादि - जनपदगीतानां निर्मातारः तदभिनेतारश्च सन्तीति सर्वलोकविश्रुतोऽयमुदन्तः । दिगन्तविश्रान्तकीर्तिभिस्तैरेव प्रत्यग्रं प्रणीतं सौन्दर्यमीमांसाख्यम् अनितरसाधारणं वाग्विलासं पुरस्कर्तुं संतोतुषीति नितरां नोऽन्तरङ्गम् ।

सौन्दर्यस्य तत्त्वावबोधकेऽस्मिन् काव्यग्रन्थे षोडशप्रकरणेषु चन्द्रमसः कलासु प्रतिकलमिव प्रतिप्रकरणं सौन्दर्यं समुन्मीलति । ब्रह्माण्डमण्डले पञ्चभूतानां प्रकृतौ, कुसुमाकरादिषु ऋतुषु, विटपिवल्लीवयःसु पुरुषेषु सीमन्तिनीषु चित्रशिल्पनाट्यनृत्यसंगीतानां कृतिषु; कविनिर्मितौ च शब्दार्थयुगलेषु रसभावान्वितेषु व्यज्यमानं सौन्दर्यं संवेदनक्षमेण तडित्तरलेन हृदयेनानुभूय श्लक्ष्णया सुलभया च वाचा कविरत्र गद्येन वा पद्येन वा विवर्णयिषति । किंबहुना न हि ब्रह्मणो वा सृष्टौ कवेर्वा रचनायां तादृशो विषयः यो हि नाम नानालिङ्गितः कामपि अभिख्यां पुष्णता सौन्दर्येणेति कविरभिप्रैति । यथा हि महाकविकालिदासप्रणीते मेघदूते यक्षः चेतनेष्वचेतनेषु वा सर्वत्र युगुलसंदर्शनमेव भावयति तथैव काव्यस्यास्य कवयितापि प्रतिभया सर्वत्र सौन्दर्यरसास्वादं जिघृक्षुः, अन्ततः मौनेऽपि महाकाव्य—सौन्दर्यं दिदृक्षतीति अहो अगाधे सौन्दर्यसागरे गाढनिमज्जनं कुर्वतोऽस्य रसभावुकस्य चेतः । ननु एकत्रसौन्दर्यदिदृक्षूणां सौन्दर्यलोलुपानां कृते भाग्यवशात् महदिदं तृप्तिस्थानमनायासेन संपन्नं यदयं ग्रन्थः कविना निरमायीति ।

वस्तुतस्तु स्वसंवेद्यं सौन्दर्यं वाचामगोचरं, तदाकारेण मनसैव निभृतमास्वाद्यमिति रसिकाणां समयोऽनुश्रूयते । अथापि अनुभवैकवेद्यस्य सौन्दर्यस्य तत्त्वगवेषणे प्रवृत्तस्य कवेरस्य अनत्यलंकृत अत एव अकृत्रिमोऽपि सहजसुन्दरः वाचामाविष्कारः सममेव मोहयति परिणतप्रज्ञानां निशितशेमुषीकाणां मतिं, सौन्दर्यास्वादपरिनिष्ठितरुचीणां कुसुमकोमलचेतसां वाऽन्तरङ्गम् । शिल्पसौन्दर्ये स्वप्नसंगमगीतं विगलितवेद्यान्तरेण मनसा शुश्रूषतोऽस्य कवेः— ' गायति नृत्यति चपला मेघान्तरिता । विलसति हरितमनोहरविटपान्तरिता । कान्ता का सा का सा । ' इत्येवंप्राया सुधामधुरा मधुमयभणितिः उपोषितयोः कर्णयोः किल रसायनभूतममृतं सास्यन्दीति ।

वृत्तवैचित्र्यं हि कवेरस्य विशेषः । दीर्घतराणामपि नैकविधानां छन्दसां प्रणयने कविरयं छन्दतः प्रवर्तते । अथापि न क्वचिदपि छन्दोभङ्गेनास्य कविता क्रमेलकवत् विसंष्ठुलतामायाति ।

रसराजे शृङ्गारे कवेरस्य स्वाभाविकी प्रीतिः । अथापि शृङ्गाररसप्रवाहे क्वचित् रसराजोऽयं स्वीयां सीमां जहत् रसाभासतां प्रपद्य जघन्योऽपि भवति । क्वाचित् अपाणिनीयानां वा शब्दरूपाणां प्रयुक्तिः तेषामार्षत्वमवगमय्य कवीनां निरङ्कुशत्वं समर्थयति । अथापि संस्कृताऽपि सरस्वती आपामरं लोकाभिमुखी भवत्विति स्वप्नेऽपि उत्स्वप्नायमानस्य, जनन्यामिव संस्कृतायां वाचि निरातिशयं निर्व्याजं च स्निह्यतोऽस्य कवेः इदमेकं सौन्दर्यसंनिपाते निमग्नमनालक्षितं क्षम्यताम् इत्यलं पल्लवितेनेति शम् ।

त्रि. ना. धर्माधिकारी

२०-१०-१९८८

# FOREWORD

**Dr. Prabhakar Apte**, M. A. Ph. D. LL. M. Advocate,
Editor, Sanskrit Dictionary, Deccan College, Pune.

Pandit Ogeti Parikshit Sharma is well known as a prolific Sanskrit writer and poet to the readers of modern Sanskrit literature for over a decade. ' Poetry is a spontaneous overflow of powerful feelings' has been justified by him in case of a classical language like Sanskrit. His प्रतिभा has been keeping the poet in him, restless and has succeeded in arousing his literary creativity. Consequently he has been instrumental in composing one-act plays, lyrics, Mahākāvyas etc. When one of his books sees the light of publication, some other is already in press, while still other is in a manuscript form. Everytime he has been conceiving some fresh ideas about the mode, the type and the style of the literary creation in the offing. I have been reading with appreciation his prolific writings and had rarely an opportunity to present review of his creations. I feel proud that I got this time the honour of writing a foreword to one of his mature creations, namely, सौन्दर्य-मीमांसा, a work on poetics.

It is a venture in an analytical field, nevertheless it has been a product of his creative प्रतिभा blended with poetic analysis based on musings on his own literary pieces of art. The speciality of this book lies in its structural presentation. The author has manifold contribution of his own. The first and foremost contribution lies in the theory propounded by him that ' Beauty is the soul of poetry ' ( काव्यात्मा सौन्दर्यम् एव ). The second speciality lies in the conviction of the author that ' Beauty is the soul of the Universe '. He has proceeded to write his book on poetics on the lines of the Kāvyamīmāṁsā of Rajashekhara, the Sanskrit poetician of renown. While

Rajashekhara inspired him to choose the title of the present work, apparently Panditaraj Jagannath, the author of Rasa-Gangadhara inspired him in choosing the examples for his poetic analysis either from his own creations or composing those afresh while presenting the poetic analysis. Panditaraj Jagannath said rhetorically, ' Does the musk-deer ever think of smelling the flowers even mentally while it bears the musk-productivity-potential in itself ?' ( किं सेव्यते सुमनसां मनसाऽपि गन्धः। कस्तूरिका-जनन-शक्तिभृता मृगेण। ). Pandit Parikshit Sharma has followed this suit in this respect.

One more speciality of this book lies in sixteenfold division subdivided into as many as two hundred eightyfive topics. These topics are self-dependent units of literary and analytical beauty. As such these can be appreciated as independent units of literary enjoyment. The arrangement is comparable to the compendia of Subhashitas bunched into Paddhatis or Vrajyās. As a result, the two hundred and eightyfive topics in सौन्दर्य-मीमांसा have turned to be ' beauty spots ' of twofold Universe : of divine and of poetic creation. The firm conviction of the author that beauty is the Soul of universe of god as well as of poets has bestowed on him all-pervasive, all-comprehensive and penetrating aesthetic vision. As a poet his spectrum of experience is calidoscopic. He is equipped both with the traditional poetic conventions ( काव्य संकेत ) as well as modern poetic conventions based on the life around, enriched with advanced science and technology. Thus, for instance, the author happens to finely blend the structural formation of sunlight with seven colours denoted by the formula : V I B G Y O R with the traditional convention of seven musical notes endowed with seven colour shades. Pandit Sharma has abbreviated the Sanskrit terms : जम्बू, धूसर, नील, हरित, पीत, नारङ्ग, and रक्तिम as जं धू नी ह पी ना and र. The author concludes his observations that music is embellished with video colours. Pandit Sharma believes that the entire

Universe is beautified due to the colourful spray of the sunrays, constituted of the spectrum of seven colours. His wide range of appreciation of cosmic beauty stretches from the limbs of human body on one side and the perception of the Yonder-Sun (असावादित्य) on the other. Thus in his about three hundred items of poetic appreciation, we find the traditionally conventional objects of poetic appreciation such as the moon, the flowers, and various aspects of the bountiful nature, aspects of feminine beauty, appreciation of the delicacies of fine arts like music, dance, drama, art and architecture etc.

The genuine speciality of Pandit Sharma's aesthetic appreciation lies in its extention to such inconceivable fields as Yoga with its various postures and Āyurveda, the medical science. The headings chosen for these topics योगः सौन्दर्यमूर्तिः and आयुर्वेदः सुन्दरवेदः are indeed worth appreciation. For the author, all the stages of life from childhood to oldage are beautiful; masculine beauty is also worth appreciation. The author has drawn upon authorities from such śāstras as Dharmaśāstra, Nāṭyaśāstra, Kāmaśāstra etc., while elaborating his appreciations. These authorities are, however, applied to various aspects of modern social life so as to cover such items of panIndian nature as भांगडा and कुचिपूडी dance, लावणी and other regional folk songs. Pt. Sharma as a poet and poetician does not fail in his duty in classifying the forms and norms of poetic beauty coupled with the beauty of actual life. He has presented a gradation of beauty as उत्तम, मध्यम and अधम physical as well as spiritual, inward and outward, abstract and concrete etc. etc.

Pt. Sharma's literary pieces of art are often a target of criticism mainly on two points : he is often said to take liberty with Sanskrit grammar in use of forms. Secondly, he is said to take liberty and indulgence in erotic descriptions. About the first criticism I would like to record the oft-quoted Sanskrit

saying: निरङ्कुशाः कवयः. I must, however, say that I was obliged to comment on his परीक्षिन्नाटकचक्रम् that his wheels often get arrested in pitfalls of grammatical irregularities resulting in hindering the smooth journey of his प्रतिभा. While reading the present work, however, I found my reading journey much smoother. Pt. Sharma, as his own colophon informs us is a scholar of Telugu and Sanskrit languages. That may justify the influence of Dravidian usages such as ळ for ल in Sanskrit language. This has to be appreciated as a style. About the point of liberty in erotic descriptions, it can be viewed with various angles and the assessment could be in different grades. I am placing my views in my own way. A poet basically an artist enters into various revelations switching over from one role to another like an actor momentarily identifiyng himself with the particular role. His experience goes on relishing the tastes of all the nine rasas and शृङ्गार is termed as रसराज. Pt. Sharma shares common feelings with the class of poets on that point. His feelings find expression in the title of one of his topics. भौतिकसौन्दर्येषु परमोत्तमं रतिसौन्दर्यम् (no. 150): 'the beauty of erotic union is the supreme of all the earthly beauties.' This would explain the stand of the author on this point.

I am aware that I am not writing the review of this book but only a foreword. I should therefore not enter into critical analysis of the contents. I feel, however, confident that this book of Pt. Parikshit Sharma would render intermittant fountains of pleasure to readers, the रसिक class. They will certainly like to set out with the author for an enjoyable aesthetic chase. At the end, I want to make an humble submission to them that valued returns would await per chase of the beauty spots of सौन्दर्य-मीमांसा.

1999, Sadashiv Peth,
Tilak Road, Pune 30.

**Dr. Prabhakar Apte**

# PREFACE

I have profound pleasure in bringing out the treatise entitled Saundarya Mīmāṁsā in sanskrit language to all lovers of Aesthetics. It has all along been my ardent desire to compose aesthetics in sanskrit language and I rarely dreamt that my endeavour would fructify so soon.

The entire work has been tailored by me in my own way in sixteen prakaraṇas, two hundred and seventy five sūtras and four hundred ninty one stanzas. All these sūtras and stanzas etc. are my own creations in a lucid language exhibiting spontanity of my inner-most talent. I have the privilege to state in humble manner that I am a poet endowed with inborn great sensitivity. Vedic hymns are the main source of my inspiration in composing the Saundarya Mīmāṁsā.

I do not follow any works of others. The Saundarya Mīmāṁsā is a creative world of my own in the field of sanskrit Aesthetics. I have tried my best to explain beauty of the Universe in all aspects. I have tried sincerely to express my notion that beauty is truth of the world and it itself is the soul of poetry and also is an ultimate reality of the Universe. I have depicted the idea in every syllable of Saundary Mīmāṁsā that beauty is formed in the Universe on account of the sun-rays and five elements and divinity of sandhyā. Sandhyā is the creator of nature and also a giver of life. (१) " आप्रा द्यावापृथिवी-अन्तरिक्षं सूर्य आत्मा जगतः तस्थुषश्च " (२) " सर्ववर्णे महादेवि सन्ध्ये विद्ये सरस्वति ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धामनामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुः " (३) " उद्यन्तमस्तं यन्तमादित्यमभिध्यायन् कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मा ".

Having taken the above lines of the Veda I have elaborated the idea in a colourful way as it is an universal truth. About

beauty many world famous poets and saints had expressed in exhaustive manner in their treatises and also in their poetry. This subject is as old as mountains. But I have taken truth from the oldest text of the world, viz. Rigveda and elaborated lawfully and logically in all aspects of beauty in my own way.

I request the readers to go through the Paragraph with a broad out-look and also with a view point of linguistics. As it is the practice of the Dravidian Sanskrit writers and poets, I have used in the places of ल ड ख द भ letters र ळ ड, ट ष त फ letters respectively. On accunt of these substitutes there would not be any meaning change. For an example : १) लोहगोल=रोहगोळ २) शरद्=शरत् ३) तडाग=तटाक ४) रेखा=रेषा ५) मञ्जुल=मञ्जुळ ६) कालिदास=काळिदास ७) भाललोचन=फाललोचन etc. on the contrary it shows that it is a kind of style of the Dravidian Sanskrit poets and also writers.

I am grateful to every individual who devoted their valuable time to write their opinions about this Saundarya Mīmaṁsā.

My efforts will be rewarded if scholors in the field make constructive survey and offer suggestions for future work.

" Beauty is truth, truth is beauty – That is all ye know on earth and all ye need to know. " – J. Keats.

Vijayā Daśamī<br>
20th October, 1988<br>
Pune.

Yours,<br>
**O. Parikshit Sharma**



**Bio-data of Pandit**
**Ogeti Parikshit Sharma**

Name - **Ogeti Parikshit Sharma**
Date of Birth : **20th August 1930**
Nationality : **Indian**
Mother Tongue : **Telugu**
Traditional Tongue : **Sanskrit**
Languages known : **Telugu, Sanskrit, English, Hindi & Marathi**
Residential Address : 10/11, Sakal Nagar, Baner Road, Pune 7. Maharashtra. India.

Academic Qualifications :

1 ) Bhasha Praveena ( Telugu & Sanskrit ) Andhra University.
2 ) B. A. ( English, Sanskrit, Hindi, Ancient Indian Culcture & Archaeology), Banaras Hindu University.
3 ) M. A. ( Sanskrit & Prakrit ), Bombay University.
4 ) M. A. ( Linguistics & English ), Bombay University.

Award : Recipient of All India Kalidasa Award ( For Yaśodharā Mahākāvyam, 20 Cantos ).

Titles : Pandit, Mahakavi & Gīrvāṇa-Geya-Kavimaṇḍala-Cakravarti.

Experience : Twenty years of teaching experience in Telugu, Sanskrit & Hindi in different educational institutions of Madras & Bombay.

Service : Retired Divisional Assistant Director — Government of Maharashtra.

Journalism : A bona-fide student of Journalism-worked a few months in English newspaper "Free Press Journal" of Bombay and reported the performances of Sanskrit Dramas.

Committee Membership : Many years a member of Courses, Committee for South Indian languages at S. S. C. Board, Pune-Maharashtra ( India ).

Papers submitted and read at various Oriental Conferences in India & Abroad.

1) Musical Melodies in Sanskrit Literature.

2) Sanskrit is the Lingua Franca of India.

3) Sanskrit and Modern Indian Languages,

4) Nāṭyaśāstra and Modern Dramatic Compositions.

5) In the Context of Sentiments, properly used Rāgas and Vrittas give inexpressible Ecstasy.

6) The Intricacies of our Classical Dances and their Integrity read in VIth World Sanskrit Conference held at Philadelphia. U. S. A. 1984.

7) Folk Songs in Modern Sanskrit Literature read in VIIth World Sanskrit Conference held at Leiden, The Netherlands, 1987. And also was the Chair-person for the Modern Sanskrit Section, in the same Conference.

Cultural Activities :

1) gave talks in Sanskrit and sung his own Sanskrit lyrics on All India Radio, Pune & Bombay.

2) Acted in Sanskrit dramas and also directed Sanskrit musical ballets.

3) Delivered lectures on different topics in Telugu, Sanskrit, English, Hindi & Marathi.

4) Participated in Sanskrit Kavi Sammelanas held at New Delhi.

5) gave vocal musical concerts in Sanskrit, accompanied by modern orchestra, at Pune and Bombay.

6) Many a time rendered own Sanskrit lyrics in schools, colleges and universities.

7) Contributed poems, articles and also reviews of Sanskrit Drama performances to various periodicals.

8) Some of the portions of his poems are prescribed for B. A. & M. A. level of University of Rajasthan and University of Nagpur.

Hobbies : Teaching, writing poetry, attending musical concerts and classical dance programmes and visiting panoramic landscape, etc.

Published ( original ) works in Sanskrit :

1 ) Lalita-Gīta-Laharī.
2 ) Yaśodharā Mahākāvyam
3 ) Akṣaya-Gīta-Rāṣmāyaṇam
4 ) Parīkṣinnāṭaka-Cakram ( Twenty seven Dramas )
5 ) Jānapada Nṛtya Gīta Mañjarī
6 ) Saundarya Mīmaṁsā ( Aesthetics )
7 ) Śrīmat Pratāpa Rāṇāyanam ( Epic )

## सौन्दर्य-मीमांसायां



| विषयानुक्रमणिका | | सूत्रसंख्या | श्लोकसंख्या |
|---|---|---|---|
| १) | दैवस्तुतिः | — | ५ |
| २) | गुरुस्तुतिः | — | ४ |
| ३) | कविपरिचयः | — | ५ |
| ४) | काव्यात्मा सौन्दर्यमेव | — | ५ |
| ५) | ब्रह्माण्डमण्डलसौन्दर्यप्रकरणम् | ६ | ६ |
| ६) | प्रकृतिसौन्दर्यप्रकरणम् | १३ | १४ |
| ७) | पञ्चभूतसौन्दर्यम् | ५ | ७ |
| ८) | धातुनवरत्नसौन्दर्यप्रकरणम् | १४ | १५ |
| ९) | स्थावरप्राणिनां सौन्दर्यप्रकरणम् | २९ | २९ |
| १०) | मनुष्येतरजङ्गमानां सौन्दर्यप्रकरणम् | २० | ३३ |
| ११) | दिक्पालकादिदेवतानां सौन्दर्यप्रकरणम् | २३ | ३४ |
| १२) | मानवसौन्दर्यप्रकरणम् | ४४ | ८८ |
| १३) | वाचिकसौन्दर्यप्रकरणम् | ८ | १७ |
| १४) | आहार्यसौन्दर्यप्रकरणम् | २४ | २४ |
| १५) | सात्त्विकसौन्दर्यप्रकरणम् | २९ | १८ |
| १६) | चित्रशिल्पसौन्दर्यप्रकरणम् | ५ | ४० |
| १७) | संगीतसौन्दर्यप्रकरणम् | १० | ४१ |
| १८) | नाट्यसौन्दर्यप्रकरणम् | १६ | ४५ |
| १९) | काव्यसौन्दर्यप्रकरणम् | १४ | ३४ |
| २०) | संकीर्णप्रकरणम् | १६ | ३१ |
| | संहत्य | २७५ | ४९१ |

ॐ

# सौन्दर्य - मीमांसा

## दैवस्तुतिः

वन्दे प्रभाविनममुं सरसं महान्तं
संतानवज्जगति संततिमूलभूतम् ।
रासिक्यभावनिचये बहुसक्तचित्तं
सौन्दर्यपायिनमहं मधुयौवनाख्यम् ॥

नीहारसंछादितशुभ्रशेखरं
पृथ्वीतले सर्वधराधरोन्नतम् ।
गीर्वाणवाणीनुतदिव्यरूपिणं
नौमीह राष्ट्रीयहिमालयं प्रभुम् ॥

अनन्तलीलालसितं विधाय
प्रतिक्षणं नव्यरुचा प्रपञ्चम् ।
अन्तर्मुखं प्राप्य विराजमानां
सौन्दर्यदेवीं निरतं प्रणौमि ॥

गभस्तिबिम्बं प्रविराजयन्तीं
सौन्दर्यरूपेण जगत्त्रयस्थाम् ।
तां सतरङ्गास्यसमुज्ज्वलन्तीं
नमामि सौन्दर्यनिदानसन्ध्याम् ॥

सौन्दर्यं पृथिवीतले बहुविधं सर्वास्ववस्थासु यद्
व्याप्यैवात्र निरन्तरं वितनुते रम्यार्थभावश्रियम् ।
आनन्दामृतवर्षिणं प्रतिपदं नव्यप्रभाभासुरं
तद्वन्दे ध्वनिरीतिसर्वरससंभाराच्च सर्वोत्तमम् ॥

## गुरुस्तुतिः ।

ओगेटिवंशजाताभ्यां पितृभ्यां सादरं नमः ।
कौसल्यासाम्बमूर्तिभ्यां दातृभ्यां ज्ञानजन्मनी ॥
चल्लावंशसुधाम्भोधिराकेशं ज्ञानदं गुरुम् ।
सत्यनारायणं वन्दे संस्कृतात्मस्वरूपिणम् ॥
मम्मटं विश्वनाथं च दण्डिनं राजशेखरम् ।
आनन्दवर्धनं दिव्यं जगन्नाथं भजाम्यहम् ॥
क्षेमेन्द्रं रुय्यकं नौमि विद्यानाथं च कुन्तकम् ।
सदाऽऽलङ्कारिकानन्याम् इष्टकाम्यार्थसिद्धये ॥

## कविपरिचयः ।

कृष्णपूर्वयजुःशाखामण्डिते तैत्तिरीयके ।
वेल्नाडुवैदिके वंशे जातः संस्कारवान् प्रियः ॥
यशोधराकाव्यकर्ता गीर्वाणान्ध्रविशारदः ।
सप्तविंशतिचक्राख्यनाटकानां प्रजापतिः ॥
कर्ता जानपदीयानां गीतानां रसशालिनाम् ।
संस्कृते नव्यनृत्यानां संस्कृत्या भूषितात्मनाम् ॥
विद्यानाथो जगन्नाथः मल्लिनाथश्च भूतले ।
यत्राराजन्त कीर्त्या ते तत्रैवायमजायत ॥
संस्कृते जननं तस्य जीवनं विश्ववाङ्मये ।
भणनं लेखनं चापि तस्मिन् भवति सर्वदा ॥

## काव्यात्मा सौन्दर्यमेव ।

व्यापृतं यच्च लोकेषु सौन्दर्यं वल्गुलेपितम् ।
रसिकानां परं धाम काव्यात्मा भ्राजते ध्रुवम् ॥
सौन्दर्यरम्यसंसारे सर्वं सुन्दरमेव हि ।
तस्मात् सौन्दर्यभिन्नं तु नास्ति कुत्रापि भूतले ॥
सौन्दर्यमात्मा सर्वस्य वस्तुनः पृथिवीतले ।
तच्च भातीह वैविध्ये स्थानापन्नं निरन्तरम् ॥

लोकसौन्दर्यमीमांसा लक्ष्यलक्षणमण्डिता ।
क्रियते नित्यसत्यार्थं नूत्नसिद्धान्तरीतिभिः ॥
सर्वसूत्राणि पद्यानि निर्मितानि स्वयं मया ।
सत्यसौन्दर्यबोधाय नूतनानि यथामति ॥

# ब्रह्माण्डमण्डलसौन्दर्यप्रकरणम्

## १. जगति सौन्दर्यप्रदायिनी सन्ध्या

सौन्दर्यमीमांसा नाम सूत्रलक्षणलक्ष्यसमन्वितं विश्लेषणात्मकं सौन्दर्यशास्त्रग्रन्थं प्रकुर्वाणाः तदादौ सौन्दर्यमूलभूतसन्ध्यायाः सौन्दर्यं तस्याः माहात्म्यं सर्वव्यापकत्वं चोक्त्वा जगति सौन्दर्यं सन्ध्याप्रचोदितसूर्यस्य माहात्म्येन प्रभावेन सप्तरङ्गसंमिश्रितप्रकाशेन सर्वदशासु दिक्षु च भवतीति वेदमन्त्राधारेण व्याख्यास्यामः । वेदप्रतिपादितसन्ध्यावन्दनमन्त्रेषु सन्ध्यादेवतामुद्दिश्य वक्ष्यमाणप्रकारेण कतिचिन्मन्त्राः सन्ति । तेषाम् आधारेण सर्वत्र सौन्दर्यप्रतिपादनम् अन्तर्बहिश्च तस्याः व्यापकत्वं सर्वश्रेष्ठत्वं च तर्कशुद्धभावैश्च सिद्धान्तीकृत्य विवृण्मः । तद्यथा :—

"सर्ववर्णे महादेवि संध्याविद्ये सरस्वति । ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धामनामाऽसि विश्वमसि विश्वायुः सर्वमसि सर्वायुः" इति ।

अये देवि गायत्रि । त्वं विराट्स्वरूपिणी असि । त्वं संध्याऽसि । विद्याऽसि - एकत्रमूर्तीकृतकान्तिस्वरूपिणी असि । शत्रुपराजयकारिणी असि । अतिदीप्तिशालिनी असि । दीप्तिप्रदायिनी असि । सूर्याग्निदेवतानां तेजोदायिनी असि । त्वमेव विश्वमसि । विश्वशरीरे त्वम् आत्मा असि ।

विश्वस्य आयुरसि । तत्र भवती न स्यात् विश्वम् अदृश्यं भवति । त्वं विराट्पुरुषस्य जीवदायिनी असि । त्वं सर्वत्रासि । त्वमेव समस्तवस्तूनाम् आयुरसि । त्वमेव सर्वं जगत् तेजोमयं सौन्दर्यमयं करोषि । त्वं पापनाशिनी असि । त्वमेव ओंकारप्रणवस्वरूपिणी असि । तादृशीं सौन्दर्यपूर्णां विश्वात्मिकां त्वामहमावाहयामि ।

त्वं सवितादेवता असि । तस्मात् सवितादेवताभूतां गायत्रीमावाहयामि । मोक्षश्रियं सर्वसुन्दरश्रियं सर्वदा आवाहयामि । हे गायत्रि सन्ध्ये, त्वं सूर्यात्माऽसि । त्वमेव तं तेजोमयं रोहगोळं समुज्ज्वलन्तं करोषि । त्वमेव सर्वव्यापिनी असि । ततः भवत्याः सर्वखगोलं ब्रह्माण्डमण्डलं चतुर्दशभुवनानि च सौन्दर्यप्रभाभासिताः भवन्ति । ततः सूर्यात्मस्वरूपिणीं गायत्रीं यः सर्वदा गायति तम् एषा त्रायते इति हेतोः त्रिकालसन्ध्यावन्दनं कुर्वन्ति । पण्डिताः तां गायत्री इति नाम्ना आह्वयन्ति ।

अपि च

'या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता'

अपि च सौन्दर्यरूपेण तेजोरूपेण च राजिता सैव शक्तिस्वरूपिणी गायत्री । चतुर्दशभुवनेषु व्याप्य सुषमारूपेण लावण्यरूपेण भासते । अस्मात् सर्वमिदं लोकं सौन्दर्यगर्भितं व्यापृतं च प्रतिभाति । सर्वे प्रकृतिविकाराः तस्याः सुषमाविकाराः तस्याः सुषमाविलासपरिसर्पिताः इति । एवं विचार्यमाणे सर्वत्र सन्ध्यासुन्दरी एव तेजोमयी शक्तिशालिनी लावण्यप्रवाहस्वरूपिणी सर्वं जगत् सप्तवर्णचित्रितं सप्तवर्णसंजातविविधरङ्गसौन्दर्यप्रभया लिम्पतीव प्रतिभाति । अस्याः सौन्दर्यविलसनं निश्चलानन्दतत्त्वमेव । सर्वमिदं जगत् सन्ध्यासौन्दर्येण परिवर्तते । एषा शक्तिस्वरूपिणी देवता सौन्दर्यधाम भवति । सा यथासंदर्भं सुन्दरीति शक्तिस्वरूपिणीति, ललितेति, त्रिपुरसुन्दरीति, सौन्दर्यवाहिनीति, लहरीति, सावित्रीति गायत्रीति नानाप्रकारनामभिः आहूयते । यथा च सौन्दर्यरूपिणः सौन्दर्यकाङ्क्षिणः स्त्रियः स्वगृहं नित्यनैमित्तिककर्मणा सुन्दरव्यवहारेण सौन्दर्यभावनया च अलंकुर्वन्ति तद्वत् असौ सन्ध्यासुन्दरी स्वीयगृहरूपं सर्वजगत् अत्यन्तसुन्दरं व्यवस्थितं अलंकरोति । एषा लोकोत्तरसुन्दरी विश्वगृहिणी ।

सप्तवर्णच्छटाभाभिः तेजोरूपेण भासते ।
सूर्यमध्ये पवित्राङ्गी याऽसौ त्रैलोक्यसुन्दरी ॥

विविधच्छटाभिः विराट्स्वरूपेण तरलस्वभासा या ब्रह्माण्डमण्डलं सौन्दर्यमयं खगोलं च समुज्ज्वलन्तं तेजोमयं करोति सा सुन्दरी जगदाधारिणी संध्या इति गायत्रीमन्त्रोपासकानां सौन्दर्यमीमांसकानां अचलोऽयमक्षरोऽयं सिद्धान्तः ।

## २. संध्यात्मप्राणितोऽसावादित्यो ब्रह्म

अनवरतभासुरसंध्यासौन्दर्यप्राणितः असावादित्यः यः आकाशे अनवरतं प्रज्वलन् ब्रह्माण्डमण्डलं खगोलमण्डलं स्वीयचैतन्यस्वरूपतेजसा चालयति सः एव ब्रह्म । अयं रुद्रनामकः सूर्यः सर्वत्र विश्वे विभिन्नरूपेषु प्रेक्षणीयः भाति । यथा "रुद्रो अग्नौ यो अप्सु च ओषधीषु यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमोऽस्तु"। अयमनेकवर्णविकारशोभितं पञ्चभूतपरिव्याप्तमनेकप्राणिसंकुलं विश्वं सर्वसुन्दरं करोति । ततः पूर्वसूरिणः सूर्यः एव सृष्टिस्थितिलयकारकः इति सूर्यमन्त्रान् नैकान् व्यरचयामासुः । अयं प्रत्यक्षदेवः । अयं निर्विरामं जन्म-जरामरणादिकं विदधाति । तस्मादेव अस्य सूर्यस्य कालः इति नामान्तरं विद्यते । अमुमेव रुद्रः इति नारायणः इति आदिब्रह्म इति आदित्योपासकाः आमनन्ति । आधुनिकवैज्ञानिकाश्च संवदन्ति अयमेव प्रत्यक्षदेव इति । सूर्ये ब्रह्माण्डमण्डला-दन्तर्हिते सति ब्रह्माण्डमण्डलं शून्यं भवति ।

"उद्यन्तमस्तं यन्तमादित्यमभिध्यायन् कुर्वन् ब्राह्मणो विद्वान् सकलं भद्रम-श्नुतेऽसावादित्यो ब्रह्म"। यः मन्त्रमेनमुच्चारयन् सूर्यमभिमन्त्रयते सः अवश्यं ब्रह्मतत्त्वज्ञानं सर्वाणि भद्राणि प्राप्नोतीति मन्त्रार्थः । तस्मादेवायं प्रत्यक्षदेवः कर्मसाक्षी । अयमेव जगच्चक्षुः इति अभिप्रायः । अयमेव ब्रह्माण्डमण्डलस्य संध्याप्राणितः सौन्दर्यजीवनप्रदाता भवतीति सूर्यप्रत्यक्षदैवतमिति मन्त्राणां सौन्दर्यमीमांसकानां तर्कशुद्धसिद्धान्तः ।

**महोज्ज्वलं जगच्चक्षुं**
**त्रयीवेद्यं दिवौकसम् ।**
**सौन्दर्यारोग्यसंप्राप्त्यै**
**संततं स्तौमि भास्करम् ॥**

एवं जगच्चक्षुर्भूतं महोज्ज्वलं वेदत्रयवेद्यं भूर्भुवस्वर्गेषु समुज्ज्वलन्तं जगत् सर्वं प्रतिक्षणं परिणामकारकं प्रकुर्वाणं भास्करं जगत्सौन्दर्यायुरारोग्यैश्वर्यप्राप्त्यर्थं सततं स्तौमि ।

## ३. "सूर्य आत्मा जगतस्तस्थुषश्च"।

"आऽप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च। तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत्। पश्येम शरदः शतम्। जीवेम शरदः शतम्। नन्दाम शरदः शतम्। मोदाम शरदः शतम्। भवाम शरदः शतम्। शृणुवाम शरदः शतम्। प्रब्रवाम शरदः शतम्। अजीता स्याम शरदः शतम्। ज्योक् च सूर्यं दृशे।"

हे सूर्य भगवान्, भवान् सर्वान्तर्यामी परब्रह्मतेजसा युक्तः जङ्गम-स्थावरात्मकप्रपञ्चस्य आत्मा भूत्वा भूम्याकाशयोर्मध्ये व्याप्य भवतः अतिनिर्मलं स्वच्छं तेजः दृक्श्रवणेन्द्रियाभ्यां जनेभ्यः प्रददातु। वयम् अनन्तकालं लौकिक-व्यवहारनियमैः सौन्दर्यविलोकनजीवनानन्दप्रमोददीर्घायुभिः सक्षमव्यवहारैश्च निवसिष्यामः। तस्मात् ब्रह्मतेजः सौन्दर्यमयं नः पुरतः उच्चरतु उदेतु। वयं त्वां चिरं कृतज्ञताबुद्ध्या पश्येम इति।

आरोग्यं भास्करादिच्छेदिति सूक्तिः विद्यते। तदनुसारम् आरोग्यमिच्छता जनेन सूर्योपासना कर्तव्या इति। यदि आरोग्यं स्यात् सौन्दर्यं भवत्येव। अर्थात् सौन्दर्यं सौन्दर्यरूपमोक्षं जीवात्मपरमात्मनोः ऐक्यरूपसौन्दर्यं च भवत्येव सूर्योपासनया। सौन्दर्यं सूर्यादेव लभ्यमिति मन्त्रार्थः। यदि शरीरे आत्मा न भाति तर्हि शरीरस्य शवाकृतिः भवति। आत्ममूलकं भवति सौन्दर्यं शरीरस्य। ततः जगच्छरीरस्य सूर्यः आत्मा भवति। तेन जगत् सौन्दर्यभरितं जीवति। संध्याऽन्तर्गत सूर्य एव जगति सौन्दर्यारोग्यं रमणीयत्वं शक्तिं च प्रजनयति।

चैतन्यात्माऽभिसंपूतः
सर्वसाक्षी जगत्प्रभुः।
योऽसौ सौन्दर्यसंदाता
साक्षान्नारायणो रविः॥

## ४. सौन्दर्यस्यायतनं चन्द्रः।

जगति चन्द्रः अत्यन्तसुन्दरः। अयं स्वीयचन्द्रिकाहासेन जगत् सर्वं विशदयति सर्वौषधीनां संवर्धकश्च। विराट्स्वरूपस्य मनसः चन्द्रमाः जातः।

संध्यारागप्राणितः चन्द्रः शान्तस्वरूपी भवति । सर्वत्र विविधवस्तुषु सूर्यान्तर्गत-सन्ध्यारूपं नैकरूपाणि प्राप्य सर्वमपि लोकं सुन्दरं सजीवं करोति । भास्करान्त-र्गततेजोविशेषः चन्द्रमसि चन्द्रिकारूपेण शीतलत्वं प्राप्य चेतनाचेतनं सौन्दर्य-मयं करोति ।

चन्द्रमाश्चारुरूपेण सूर्याद्भिन्नो विराजते
सूर्यात् संप्राप्य तेजस्तु लोकोत्तरकलानिधिः ॥

सूर्यात् तेजः सौन्दर्यं च प्राप्य सर्वोऽपि सुन्दरः भवितुं शक्नोति इत्यस्य सिद्धान्तस्य लक्ष्यभूतः चन्द्र एवेति सौन्दर्यतत्त्वाराधकानां निर्विवादः सिद्धान्तः ।

## ५. चित्रविचित्रं नक्षत्राणां सौन्दर्यम् ।

खगोले असंख्याकानि अगणितानि अमलिनतारकाणि द्योतन्ते । तानि सर्वाणि अत्यन्ततेजोमयानि दूरतः अतिसुन्दराणि विविधकान्तिच्छटालसितानि दृश्यन्ते । एतादृशसौन्दर्यं कुतः आयातं कथमायातम् इति विचार्यमाणे काऽपि अनिर्वचनीया शक्तिः सर्वमेतत् बहुविधं खगोलं ब्रह्माण्डं च परिवर्तयतीति नास्तिकानां मतेऽपि भावना संजायते । असावादित्यो ब्रह्मा इत्युक्तत्वात् ब्रह्मस्थाने संध्याऽहमस्मि इति अर्थग्रहणेन सूर्यान्तर्गता शक्तिः संध्या प्रतिभाति । एषा " नीवारशूकवत् तन्वी पीता भास्वत्यणूपमा " सूर्यमण्डले विराजमाना ब्रह्माण्ड-मण्डलं चतुर्दशभुवनानि लोकत्रयं च चालयतीति संध्योपासकानां मतम् ।

ब्रह्मेति विश्वे किल शंकरेति
सा भव्यसूर्ये सुषमेति सत्यम् ।
अजस्रनारायणमन्त्रपुष्पैः
समर्च्यते भिन्नविभिन्नगीतैः ॥

एतेषां नक्षत्राणां सौन्दर्यम् अमावास्यायां भव्यं संदृश्यते । तदा सा रात्रिः काञ्चननक्षत्रचित्रितनीलदुकूलधारिणीव सुन्दरशरीरेण अनन्तसुन्दरभावनाप्रपञ्चे तन्मयत्वं प्रजनयति रसिकानाम् ।

## ६. अनिर्वचनीयं नवग्रहाणां सौन्दर्यम्

खगोले नवग्रहाः स्वीयसहजातशक्तिसमाकर्षणसौन्दर्यैः संध्यादत्तविशिष्टशक्त्या च सर्वलोकं प्रशासति । ते नवग्रहाः स्वीयादर्शनीयानिर्वचनीयसौन्दर्यशक्त्या लोकं चालयन्ति । सूर्यस्यार्चींषि चन्द्रस्य चन्द्रिका च प्रत्यक्षं दृश्यन्ते । किन्तु नवग्रहाणां प्रभावः सूर्यचन्द्रप्रभाववत् लोकैः नानुभूयते । प्रत्यक्षं तेषां प्रकाशः गुप्तप्रभावेन लोकप्रवृत्तिं परिवर्तयति । तस्मादेव हि नवग्रहाराधनादिकं जनैः क्रियते । एते नवग्रहाः अनेकवर्णप्रकाशभासिताः दृश्यन्ते । तद्यथा–

सूर्यस्य अरुणवर्णः अस्ति । चन्द्रस्य श्वेतवर्णः भवति । अङ्गारकः रक्तवर्णः भाति । बुधः पीतवर्णशोभितः । बृहस्पतिः तप्तकाञ्चनवर्णराजितः भवति । शुक्रः श्वेतवर्णः भवति । शनिः नीलवर्णविराजितः भाति । राहुः नीलवर्णीयः अस्ति । केतुः चित्रवर्णः भवति ।

एते सर्वे नवग्रहाः स्वीयवर्णैः परिवर्तनैश्च सर्वं जगत् पालयन्ति कलामयं कुर्वन्ति । तेषां प्रभावेन च जगति सौन्दर्यं जनानाम् अत्यन्तपरिणामकारकं भवति । तस्मादेवम् उच्यते ।

**नक्षत्रताराशीतांशुरंशुमालीग्रहाः परम् ।**
**ब्रह्माण्डे च विभान्त्येव सन्ध्यासौन्दर्यवर्धिताः ॥**

सौन्दर्यं जगति दिव्यप्रभावेन संजायते । खगोलं सर्वमपि सौन्दर्याणामायतनम् । ततः खगोलमधोधः परिदृश्यमानं सर्वं सुन्दरमेव संलक्ष्यते । सर्वमपि सौन्दर्यं अनुरूपघटकपरमाणुसंधानविधानेन क्रमपद्धत्या च परिणतं प्रकृत्यां दरीदृश्यते । यदि कार्यकरणे क्रमपद्धतिः न स्यात् सर्वमपि कार्यं अस्तव्यस्तम् असुन्दरं च भवति । ततः सर्वं जगत् कालबद्धक्रमपद्धतिप्रभावेन अन्योन्यसंयोगेन विस्तृतं सौन्दर्यमयं भवति । वैशेषिकमतानुयायिनां सिद्धान्तप्रभावितः सौन्दर्यमीमांसाकर्ता सन्ध्यासौन्दर्यसुषमाप्रवर्धितं सर्वमिदं जगदिति सिद्धान्तीकरोति ।

इति श्री गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना महाकविना पण्डित ओगेटि परीक्षित् शर्मणा विरचितायां सौन्दर्यमीमांसायां खगोलसौन्दर्यप्रकरणं समाप्तम् ।

# २. प्रकृति-सौन्दर्य-प्रकरणम्

## ७. प्रतिक्षणं रमणीया प्रकृतिः ।

इयं परिदृश्यमाना प्रकृतिः भूम्यां सूर्यरश्मिपरावर्तनसंघर्षणात् संजातपञ्च-महाभूतेभ्यः रचिता प्रतिक्षणं कालप्रभावेन च विविधरूपं प्रतिपन्नाऽपि सौन्दर्यातिशयेन विराजते । स्थावरजङ्गमात्मकेयं प्रकृतिः विलक्षणीयतनोर्विलासैः लोकं संमोहयति । सावित्र्या सन्ध्यादेवतया इयं रमणी सृष्टा ।

पञ्चकालविराजमाना सूर्यरश्मिः प्रातःकाले पूर्वाह्णकाले मध्याह्नकाले अपराह्णकाले सायंकाले पञ्चमुखभासिता सावित्रीदेवता गायत्रीनाम्ना स्वीयसप्तरङ्गैः यथाकालं प्रकृत्यै सान्तत्येनाखण्डितत्वेन च सौन्दर्यं प्रददाति ।

**प्रतिक्षणं स्वीयकलाविलासैः**
**सौन्दर्यराशिः प्रकृतिः सहर्षम् ।**
**नावीन्यहेलाललितैः स्वरूपैः**
**विभाति सर्वत्र मनोज्ञभाभिः ॥**

एषा प्रतिक्षणं नवनोन्मेषभासा रमणीयत्वमापाद्य कियत् कालं स्थास्यतीतीदमित्थं न कोऽपि जानाति किञ्चित् किञ्चित् कालानुगुण्यम् ऋतुधर्मानुसारं परिवर्तनं प्राप्यापि अनन्तसौन्दर्येण प्रतिभाति । जगति प्रकृतेर्भिन्नं सुन्दरं नान्यत् विद्यते । ततः जगति स्थावरजङ्गमादयः भूम्याकाशमध्ये विविधवातावरणादिभिः परिवेष्टिताः परिवर्तिताः अनुरूपसौन्दर्यं लब्ध्वा लोकस्यानन्दकारकाः भवन्ति । ततः प्रकृत्यां चेतनाऽचेतनसौन्दर्यकारकः भगवानंशुमाली ।

**नवोद्भवा भाति सदा धरित्री**
**विलक्षणा भास्करशक्तियुक्ता ।**
**विधाय दृश्यं बहुवर्णयुक्तं**
**मनोहरैः स्वीयविलासलास्यैः ॥**

सर्वा प्रकृतिः सर्ववर्णरञ्जितवस्त्रावृता गन्धिलपुष्पाभरणभूषिता, मदकीर-पिककण्ठमाधुर्यकलकलनादाञ्चिता नानाविधरागमालाऽलंकृता रागिणी भूत्वा मूर्तीभूतस्वरसाम्राज्ञीव रसिकान् मन्त्रमुग्धान् करोति । एषा परिवर्तिताऽपि सूर्येण प्रतिक्षणं सुन्दरी संदृश्यते ।

## ८. काव्यसुन्दरी प्रकृतिः ।

सर्वा प्रकृतिः काव्यरूपा । काव्यं प्रकृतिस्वरूपम् । काव्यम् अष्टादशवर्णनात्मकं भवति । प्रकृत्यामपि प्रजापतिना सूर्येणाष्टादशरम्यवर्णनात्मकदृश्यानि सृष्टानि सन्ति । काव्यं सौन्दर्यात्मकं भवति । प्रकृतिरपि सौन्दर्यात्मिकाऽस्ति । काव्यं पदवाक्यभावरसध्वनिसौन्दर्यैः परिपुष्टतां प्राप्य अलौकिकानन्दं प्रददाति । प्रकृतिः शब्दभावचित्रशिल्पसंगीतवर्णविलाससौन्दर्यैः आनन्दं प्रजनयति एतद्द्वयं बिम्बप्रतिबिम्बभावेन विलसति ।

**अनन्तभावा ऋतुचीररम्या**
**शब्दार्थहीना विशदस्वभावा ।**
**संप्राप्य काव्यत्वमियं धरण्यां**
**रसप्रपूर्णा लसतीह सुन्दरी ॥**

काव्यं विरच्यते प्रजापतिसमेन कविना । प्रजापतिना भगवता सूर्येण प्रकृतिः विरचिता । जगतः आत्मा कपिः षड्रसान् चकार । कपिसमो कविः जगति षड्रसाननुभूय नवरसान् ससृजे । प्रकृतिं सर्वोऽपि जन्तुः सानन्दं पश्यति । काव्यं सहृदयाः सानन्दं पठन्ति । प्रकृतिदर्शने काव्यपठने च सहृदयाः सततं निरताः आनन्दिताः भवन्ति । द्वावप्येतौ रसनिर्भरौ । प्रकृतिः काव्यस्वरूपा । प्रकृत्यां प्रत्यणुः प्रकृतिकाव्यांश एव । काव्ये प्रत्यक्षरं काव्यभाग एव । सहृदयस्य द्वावपि रसपूर्णौ सुन्दरौ भवतः । सर्वः प्रकृतिसौन्दर्यं सूक्ष्मेक्षणेन द्रष्टुं न पारयति । ततः सर्वालङ्काररप्रसन्नमधुराकाराः संस्कृतात्मानः सौन्दर्यकाङ्क्षिणः रसिकाः सृष्टयाः काव्यस्य च रहस्यं जानन्ति । मोहमयी प्रकृतिः भावनासौन्दर्यप्रदानेन काव्यसुन्दरीव भ्राजते । अत्र काव्यरूपा एषा सुन्दरी ।

## ९. अनल्पशिल्पतल्पाकृतिः प्रकृतिः ।

प्रकृतिः सर्वशिल्पानां तल्परूपाऽस्ति । सृष्ट्यां सर्वा प्रकृतिः चित्रवर्णसूर्यरश्मिनिर्मिता सप्राणा सरससर्वाङ्गचालनसुरुचिरसुरसुन्दरीव द्योतते । एषा सर्वसमवायेन त्रिलोकसुन्दरी मातृमूर्तिरिव भासते । तस्याः उत्सङ्गः चित्रविचित्रसंतानशिल्पैः परिवेष्टितः इव भासते । सर्वत्र प्रकृत्यां तस्याः सौन्दर्यं कोरकितं

पल्लवितं चित्रितं पुषितं फलितमिवाभाति । ततः प्रकृति सूर्यकिरणतक्षितशिल्पाकृतिरिव विविधस्वरूपेषु लसति । तद्यथा :-

क्षणे क्षणे नव्यतनोर्विकारैः
शिल्पाकृतिं प्राप्य विभिन्नभावैः ।
तनोति लोके मधुशिल्परूपं
प्रिया नितान्तं प्रकृतिः सहर्षम् ॥

ततः एषा एवं वर्ण्यते । एषा आकाशकेशा चन्द्रानना । तारालोचना । चन्द्रिकालसितलावण्या । हरितनीलवस्त्रावृता । वाहिनीहारा । पर्वतस्तनमण्डला । क्षितिजकाञ्चीदामभूषिता इति ।

एवं वयं भूनौकायाम् उपविश्य समुद्रं तरन्तीमिव द्रक्ष्यामः । सा एकत्र मूर्तीकृतापि व्यपृतविविधशिल्पतल्पाकृतिः भाति । एतादृशसौन्दर्यमस्यै केन दत्तं, कदा दत्तम्, एतत् कियत् पर्यन्तं भवतीति विचार्यमाणे आश्चर्यं भवति । अत्राऽश्चर्यस्यावकाशः न किञ्चिदप्यस्ति । सर्वं स्पष्टमेव यत् सौन्दर्यमिदं अगणितवर्षेभ्यः सान्तत्येन भानुनाऽस्यै प्रकृतिनाशपर्यन्तं दीयतेति । एषा प्रतिक्षणपरिणामभाजिन्यपि यौवनमध्यस्था, त्रिदशेव भासते । अत्र प्रकृतिरेषा शिल्पमये जगति सुन्दरी भाति ।

## १०. बहुचित्ररूपिणी प्रकृतिः ।

प्रकृतिः विचित्रविटपवल्लीकुसुमस्तबकपल्लवसमावृता वक्रितवल्लीवेल्लिता लघुदीर्घारुणकिसलयसूनसमलंकृता सावित्र्या निर्मितं चित्रपटमिव प्रद्योततेजसा नैकवर्गविराजित उदयास्तवेलासप्तवर्गरेखासमलंकृता आनन्त्यमञ्जुचित्ररेखापरिवृता विद्योतते । सूर्याचन्द्रमसोः छायाचन्द्रिकाप्रतिबिम्बितजलाशयवाहिनी समलंकृता, बहुविधप्राणिजालसमञ्चिता चित्ररूपा चकास्ति । एषा चित्राकारिणी आकाशे मेघमण्डले पर्वतमस्तकेषु कासारनदीतटाकसमुद्रेषु प्रतिक्षणं विविधचित्रप्रदर्शनं करोति, केचन सुकृतात्मानः एव तत् चित्रप्रदर्शनं पश्यन्ति नान्ये ।

विचित्रवर्णैः प्रचुरं विलिप्ता
चकास्ति सा चित्रपटेन निस्तुलम् ।

अनन्तरेखावलयाञ्चिता ध्रुवं ।
प्रघोषयन्तीव सुचित्रकारिताम् ॥

एषा एकत्र विचित्रचित्रसंदर्शनशालेव प्रतिभाति । अन्यत्र केवलवृक्षषण्डैः प्रतिभाति । तत्र तत्र मेघमण्डलैः घनजलाशयैः विद्योतते । सृष्टिनिर्माणात्प्रभृति कतिचित्राणि सा संदर्शितवती न कोऽपि जानति । सा कतिवारं परिवर्तनं विनिमयं संचलनं च प्राप तत् सर्वं केनापि न ज्ञायते । सा कतिवर्णेषु कदा समलंकृता तत् ज्ञातुम् अशक्यं भवति । सा सर्वदा सूर्यप्रकाशमज्जिता स्नात्वा निश्चला परब्रह्मणि लग्नमानसा तपस्यन्तीव उपविशति । सा निश्चलचित्ररूपमिव स्थित्वा सर्वान् आत्मानं प्रति चिन्तयितुं प्रेरयति । प्रकृतिः सप्तरङ्गाङ्गी भूत्वा सततं सूर्यचन्द्राभ्यां कन्दुकक्रीडां खेलन्तीव प्रतिभाति । यथा सा अस्माभिः अनुमीयते तथा प्रतिभाति । एषा रमणीयतया प्रतीकं पराकाष्ठा च । अत्र प्रकृतिः चित्ररूपसौन्दर्ये सुन्दरी भासते ।

## ११. सर्वा प्रकृतिर्नादमयी

अस्याः मनः संगीतमेव । प्रकृत्यां यस्मिन् कस्मिन् अपि कोणे अजस्रं यत्किमपि स्वरकूजनं नादमाधुर्यं वा भवत्येव । एषा सप्तवर्णाञ्चिता, अपि च सप्त स्वराञ्चिता सप्ततालाश्रिता सततं नादं कुर्वन्ती विलसत्येव । सर्वपुष्पचयेषु बम्भराः गुञ्जनं कुर्वन्तः पैकानां गानार्थं स्वरसारणीं कुर्वन्तः भान्ति । कीराः मधुरं भणन्ति । उत्तुङ्गशिखरात् निर्झराः सान्तत्येन मर्दलध्वनिं कुर्वन्तः स्रवन्ति ।

सप्तस्वराणां नादाः प्रकृत्यां प्रतिध्वानिताः भवन्ति । मलयमारुतः वहन् कीचकेषु वेणुध्वनिमुत्पादयति अतः परं किं वक्तव्यं सर्वं जगत् संगीतमयं ध्वनति । ततः संगीतभरिता प्रकृतिः । एषा सुन्दरी सर्वदा गायन्ती निक्कणन्ती हसन्ती लसति ।

संगीतरूपा प्रकृतिः समस्ता
मनोहरैः सुस्वरपाविनादैः ।
अनुक्षणं हार्दिकरागरक्ता
विगायति स्वीयसमस्तगाथाम् ॥

सर्वर्तुषु प्रकृतिः गायकवृन्दैः उद्याने उपविश्य प्रचुरं गायति । संगीतं प्रकृत्याः सहजातम् । प्रकृतिः स्वरनादमयसंगीतेन सुन्दरा भाति । अत्र प्रकृतिः संगीतेन तादात्म्यं प्राप्य लसति । ]

## १२. मूकाऽपि भावार्थप्रकाशिका प्रकृतिः

प्रकृतिः स्वभावप्रकटनाम् अङ्गविन्यासेन इतस्ततः शिरश्चालनेन वातावरणविशेषान् शब्दहीनाऽपि व्यञ्जयति । यदा झञ्झावातः भवेत् तदा स्वशिखान्तसंचारिभिः मेघमण्डलैः वर्षा भविष्यतीति सूचयति । इतस्ततश्चलितशीतलपवनगन्धैश्च जगति प्रसृतपर्यावरणसंजातदुर्गन्धसुगन्धनिचयं च लोकं बोधयति। मूका शब्दविहीना प्राणिलोकं मेघनादयुक्ता कथयति सस्नेहं पर्जन्यवृष्टिः भविष्यतीति । एषा भावमुद्रितनाट्यैः लोके वर्तिष्यमाणं व्यञ्जयति ।

आजन्ममूका न कदापि वक्ति
तथापि सर्वं भणतीह सत्यम् ।
सर्वोऽपि सर्वं विशदं प्रपूर्णं
जानाति तस्याः सकलं मनोगतम् ॥

ग्रीष्मातपे अतीव तापिताऽपि निःशब्दा भूत्वा अत्युष्णनिःश्वासैः स्वीयबाधां व्यक्तीकरोति । एषा स्वीयपयोधरधाराभिः जगति संतानचयं पाययति संरक्षति च हेमन्ते जडमतिर्भूत्वा तुषारसंघातशिलोच्चयैः बाध्यमाना वैश्वानरं कामयते । एतत् सर्वमपि मूकाटनेन प्रकृतिः करोति ।

तडिद्भिः द्योयतति प्रकृतिरहस्यम् । मेघगर्जनाभिः प्राणिजालं नाटयति । निरशब्दगत्या सर्वप्राणिसमूहं संरक्षति । एषा व्यञ्जनव्यापाराख्यं कर्म करोति । जगति रसिकानां, सौन्दर्यभरितात्मनां, श्रुतानां दृष्टानां गीतानां शिल्पानां चित्राणां सौन्दर्येभ्यः, भवन्ति अश्रुतगीतानां, अदृष्टसौन्दर्याणां गीतानां शिल्पानां सौन्दर्याणि सर्वदाऽत्यन्तमधुराणि सुन्दराणि च । अपि च एतादृशव्यक्तित्वं चाकचक्यं नैगनिग्यं भावप्रकाशनाख्यं कर्म केन प्रकृत्यै प्रदत्तमिति तस्याः रमणीयाकृतिविशेषं विलोक्य सर्वोऽपि जनः मुह्यति । तस्याः मनोगतमज्ञात्वैव सृष्टेः आरम्भात् एतावत्पर्यन्तं अगणिताः सकलशास्त्रपारंगतः नैके महानुभावाः मग्नः ।

## १३. ध्वनिकाव्यरूपा प्रकृतिः ।

कल्ये उषासुन्दरी समुदेति । तस्याः आविर्भावेन सूच्यते सूर्यः उदेष्यतीति । ततः प्रभृति प्रतिक्षणं प्रकृतिः कर्तव्यं जनान् बोधयति ।

प्राप्ते च सूर्ये अम्बरतलमध्यं प्रकृतिः सूचयत्ययं मध्याह्नः इति । एवं सूर्यास्तमयेऽपि कथयति रजनी समायाता इति, अस्तमेति गभस्तिमानिति सूचयित्वा ध्वनिपूरितमहाकाव्यं प्रकृतिः भावनाभिः लिखति, संज्ञाभिः संकेतैश्च सूचयति, किन्तु न शब्दैः ।

प्रिया नितान्तं सहजस्वभावं
मनोहरं स्वीयमनोगतं च ।
कर्तव्यबुद्धिं नितरां जनानां
तनोति सांकेतिकसंज्ञया सा ॥

पुनः प्रातः कुक्कुरकुक्कुटरावैः जनं कर्तव्यं बोधयित्री उषासुन्दरी समायाता इति । एवं प्रकृतिः क्षणेक्षणे ध्वनिकाव्यं विलिखन्ती आस्ते । प्रकृतिः अत्युत्तमध्वनिकाव्यविशेषगोपितसौन्दर्यमूर्तिः प्रतिदिनं प्रतिवारं प्रतिमासं प्रतिवर्षं नव्यसौन्दर्यातिशयशालिनी भाति । प्रकृत्यां काऽपि अन्तर्लीना सौरशक्तिः, तां तथा सा अन्तः परिवर्तयति । साऽन्तर्लीना शक्तिरेव सौन्दर्यस्वरूपिणी सावित्री ।

## १४. सर्वसाक्षिणी प्रकृतिः

प्रकृतिः सर्वथा सर्वत्र व्याप्य विराट्स्वरूपेण प्रतिभाति । जगति यत् जायते नोचेत् मानवैः क्रियते तत् सर्वं प्रकृतिः हरिदन्तेभ्यः सहस्रतारालोचनैः पश्यन्ती आस्ते । तस्याः नयनानि न कोऽपि निमीलितुं शक्नोति । नक्तं किं क्रियते, अन्धकारे किं क्रियते, चन्द्रिकायां किं क्रियते, जले किं क्रियते, अवकाशे किं क्रियते, सर्वं पश्यन्ती अपि अपश्यन्तीवास्ते । जगति यज्जातं यदस्ति तत् सर्वं सा पश्यति ।

निरन्तरं पश्यति लोकजातं
घनान्धकारेष्वपि सूक्ष्मदृष्ट्या ।
विविक्तभावा चटुलस्वरूपा
प्रशान्तगत्या वरवर्णिनी सा ॥

तदा तदा क्रुद्धा स्थावरजङ्गमादीन् नाशयति। सा दिवारात्रं सूर्यचन्द्र-नक्षत्रैः पश्यन्ती आस्ते। अपराधिनं सा पश्यति शपति च। गतचरित्रं सा आमूलाग्रं ददर्श। किन्तु सा न कथयति। तथापि सा अव्यक्तभाषया स्वीय-विलासैर्जनं पाठयति। एषा सर्वसाक्षिणी। ततः जनाः तां प्रत्यक्षदेवतां मत्वा प्रत्यहं पूजयन्ति। जगति देवीपूजकाः केचन, शक्त्युपासकाः केऽपि, दुर्गार्चकाः कतिचित् सन्ति। वेदप्रतिपादितप्रकृतिपूजनमेव सत्यमिति मन्वानाः अपरे सन्ति। पञ्चभूतस्रष्टा अग्रपूजास्वीकर्ता कवीनां कविः सूर्यः। तत्कथमिति। कं पिबतीति कपिः (जलपानकर्ता सूर्यः), पकारस्थाने वकारः, तस्मात् कविः। ततः सूर्यः कविः। अयं प्रकृतिकाव्यस्रष्टा। प्रकृतिं विलोक्य अस्मादृशाः भवन्ति काव्यकर्तारः। जगति विद्योतमानकविः कवीनां कविः सूर्यः। अयम् अन्धकारसदृशपापगणान् नाशयतीति हेतोः 'गणानां त्वा गणपतिं हवामहे कविं कवीनाम्' इति प्रत्यक्षं दृश्यमानसूर्यं प्रति कृतोऽयं मन्त्रः। सूर्यः एव नवग्रहाणां पतिः। सूर्येण विना सर्वा सृष्टिः सर्वे ग्रहाः निराधाराः नश्यन्ति। ततः ब्रह्माण्डमण्डले विद्यमानानां नक्षत्रताराग्रहादिगणानां पतिं हवामहे इति सूर्योपासकानां सौन्दर्यमीमांसकानां सिद्धान्तनिष्कर्षः।

## १५. शक्तिस्वरूपिणी प्रकृतिः।

प्रकृतिः शक्तिस्वरूपिणीति बहूनाम् अभिप्रायः यथासंदर्भं जगति स्वीय-शक्तिस्वरूपं दर्शयति। सर्वत्र सा स्वीयशक्त्या व्याप्य सर्वप्राणिषु राजते। सा शक्तिः जगति अन्तर्बहिश्च व्याप्य विराजते। एषा विश्वजननी। भक्तिभाव-जनयित्री एषा प्रजननकर्मप्रचोदयित्री भगवती सावित्री।

**एषा प्रिया भागवती महिम्ना**<br>
**शक्तिःस्वरूपा प्रकृतिं समस्ताम्।**<br>
**यथा च रम्यं बहु रोचतेऽस्यै**<br>
**करोति तथ्यं शतधा शुभाङ्गी॥**

यत् दृश्यते तत् सर्वं तस्यां विलीयते। पुनः उत्पद्यते। चर्वितचर्वणं जनन-मरणम् अत्रैव अस्याः कुक्षौ केवलं भवतः। एषा स्त्री सत्त्वरजस्तमोगुणान्विता प्रजनन-कारिणी। तस्मात् प्रकृतिः शक्तिस्वरूपिणी सावित्री। सर्वमस्याः एव संजायते।

## १६. आचार्याणी प्रकृतिः

प्रकृतिः पूज्या । सर्वलोकस्य आचार्याणी । एषा जगद्गुरुस्थानविराजमाना पवित्रमूर्तिः । एषा सर्वेभ्यः सर्वविषयान् सर्वविज्ञानं तरतमभेदानुसारं वितरति । कविभ्यः कवितां कर्तुं स्वीयसर्वसौन्दर्यभावनां च औदार्येण प्रददाति । चित्रकारेभ्यः स्वीयशिल्पसम्पदं गायकेभ्यः संगीतं वैज्ञानिकेभ्यः भूम्याकाशखगोलजलजालं सान्तत्यं यच्छति । अतःपरं किं वक्तव्यं । एषा सर्वपरित्यागिनी ज्ञानवितरणी आचार्याणी ।

आचार्याणी स्वयं जाता
सर्वविज्ञानशोभिनी ।
ऋते न तस्याः कोऽप्यास्ति
सर्वविज्ञानदायकः ॥

सर्वेऽपि जगति तस्याः सर्वं गृहीत्वा संशोधनेन स्वीयमेधाकल्पनां जगति प्रदर्शयन्ति । एषा यदुद्भूतं तत् सर्वं एकदा विनश्यतीति सर्वं चर्वितचर्वणम् इति सर्वमपि मायासौन्दर्यपरिवृतमिति च बोधयति । अस्याः संपद्विज्ञानं अपर्याप्तमसीमितं च वर्तते । एषा जगद्गुरूणां आचार्याणी ।

## १७. तत्त्वबोधनाप्रवृत्तिः प्रकृतिः

सृष्ट्यां दृश्यमानं सर्वं पञ्चत्वं प्राप्नोति । प्रवृत्तिमेनां विलोक्यापि मानवाः सृष्टिरहस्यं अनभिज्ञाः भवन्ति । सत्यं सर्वे जडमतयः इदं सृष्टिरहस्यं विलोक्यापि मूर्खजनाः भौतिकजीवने व्यापृताः भवन्ति । तथा मा भूयादिति सा वेदान्तं बोधयति । सा तस्याः प्रवृत्तिः ।

अस्याः प्रकृत्याः सहजा प्रवृत्तिः
समस्तलोकस्य रहस्यभावम् ।
प्रशान्तगत्या सकलं च तत्त्वं
प्रज्ञापनं चर्वितचर्वणं च ॥

एषा मातृमूर्तिवत् स्वीयप्रजाः कर्तव्यबुद्धिमादिशति । बहवः महात्मानः कमपि सन्देशं लोकाय दत्वा गतवन्तः । अनेके महापुरुषाः विविधरङ्गेषु

विविधलोकोपकारककृत्यानि विधाय, ते न किञ्चिदपि गृहीत्वा गतवन्तः इति प्रकृत्याः नश्वरत्वं बोधयन्ती अस्ति प्रकृतिः । तस्मादियं तत्त्वबोधनासक्तचित्त-प्रवृत्तिः प्रकृतिः ।

## १८. नाट्यसुन्दरी प्रकृतिः ।

प्रकृतिः प्रतिक्षणं नानाविधनाट्यभङ्गिमविलसिता नर्तते । एषा पुष्पस्तबक-स्तनाभ्यां विलासलास्यसरसा स्मितहास्या, मनोज्ञभावनामहिमसुदीप्तगात्री, अति-गाम्भीर्यपदार्थशब्दनिचयाद्यागारश्रृङ्गारवाक्ततिसंपूर्णा रसध्वनिध्वनितवृत्ताकीर्णा, नानामनोज्ञतसंभावितरम्यभव्यगुणसंज्ञायत्तनाट्याङ्गनागतिः संचारि महोन्नता, मृदुपदाकारा, प्रसादाङ्गी दिवारात्रं नटन्ती रसिकजनमनोभिरामा भूत्वा विराजते ।

चारुसौन्दर्यसंपृक्ता<br>
राजते नाट्यहेलया ।<br>
छिरेफालिसमाबद्धैः<br>
नादितैः पादनूपुरैः ॥

तदर्थमेव एषा प्रकृतिः अर्धनारीश्वरी भूत्वा जगति स्त्रीपुरुषसमानत्वं दर्शयति । प्रपञ्चः पुरुषप्रकृतिविलसितः । पुरुषः सूर्यः । पञ्चप्राणवत् पञ्चभूत-संपृक्ता देवी प्रकृतिः । तयोः समागमः एव पुरुषप्रकृतिप्रपञ्चः । तस्मात् इयं प्रकृतिः अर्धनारीश्वरी भूत्वा सृष्टिरहस्यं विविधभङ्गिमवर्तनादिभिः दर्शयन्ती विराजते । एषा षडर्तुसमञ्चिता जनान् स्वीयभावप्रकटनादिभिः संमोहयन्ती तान् सौन्दर्यपाठं बोधयन्ती आस्ते । ततः सर्वर्तुप्रारम्भे जनाः प्रकृतिं स्वीय-ग्रामीणनाट्यैः सामूहिकहल्लीसकैः प्रतोषयन्ति ।

## १९. सौन्दर्याणामायतनं प्रकृतिः ।

सर्वसौन्दर्याणां सर्ववर्णानां सर्वरामणीयकानां प्रकृतिः स्थानं भवति । प्रतिक्षणं अनन्तनव्यवस्तूनि प्रजनयति । अस्यां कुक्षौ कति सुन्दरमूर्तयः विलीनाः,

पुनः कदा रूपान्तरेण समागताः इत्येतत् सर्वेषाम् अनूह्यं भवति । इदं सृष्टिरहस्यम् । अत्रैव दिव्यभौतिकसुन्दरवस्तूनि वयं द्रक्ष्यामः सर्वत्रादिसृष्ट्यां सौन्दर्यमेव पश्यामः । सर्वमपि सूर्यस्य दिव्यतेजोपरिवर्तनमेव ।

विना च कस्मिन्नपि साम्यं सृष्टिः जायते । अयमेव लोकेशस्य सूर्यस्य सृष्टिचमत्कारः । अयमेव कवीनां कविः, रुद्रः, नारायणः, ब्रह्मा च ।

**समस्तसौन्दर्यमनोहराङ्गी**
**तदीयवर्णैः वसुधातलं च ।**
**नानाप्रकारैः प्रियवस्तुजालैः**
**करोति सौन्दर्यमयं प्रतिक्षणम् ॥**

मृत्तिका एका स्वरूपिणी । किन्तु चित्रकारस्य चित्रकारिता शिल्पकारस्य शिल्पकारिता वैविध्ये ऊहातीतं भातः । कथमियं निर्मितिः भवति इति विचार्यमाणे द्योतते काऽप्यनन्यसाधारणरूपा शक्तिः । सर्वाणि पञ्चभूतानि अत्यन्तसुन्दराणि तदा तदा अतिभीकराणि भवन्ति । ततः सौन्दर्याणामायतनीभूतां इमां प्रकृतिं विलोक्य चेतः मोमुद्यते । प्रतिचलनं प्रतिगतिः सौन्दर्यविलासभरितः प्रतिदिवसः सौन्दर्यमयः । प्रतिमासः आनन्दमयः । अहो मानवानां सौभाग्यं यदेतादृशीं सुन्दरीं सर्वसौन्दर्याणां समवायभूतां प्रतिदिनं पश्यन्ति । सत्यं सौदर्याणामायतनं प्रकृतिसौन्दर्यम् ।

इति श्री गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना,
महाकविना पण्डित परिक्षित् शर्मणा विरचितायां सौन्दर्यमीमांसायां
प्रकृतिसौन्दर्यप्रकरणं समाप्तम् ॥

## ३ पञ्चभूत-सौन्दर्यप्रकरणम् ।

### २०. वसुन्धरा सुन्दरी ।

'भूमिर्भूम्ना द्यौर्वरिणाऽन्तरिक्षं महित्वा । उपस्थे ते देव्यदितेऽग्निमन्नाद्यायादधे' इति भूसूक्तप्रमाणेन भगवान् सूर्यः सर्वमपि वस्तुजालं भूम्याः गर्भे निक्षिप्तवान् ।

ततः वसुन्धरा सर्वभौतिकसम्पदं स्वगर्भे निक्षिप्य परिरक्षति। एषा रत्नगर्भा सर्वनिलयालया चकास्ति। गन्धवती पृथ्वीति तार्किकसूत्रम्। एषा सर्वगन्धजननी समस्तचेतनाऽचेतनाभ्यां गन्धरूपं सौन्दर्यं प्रददाति। असौ स्वीयमृत्स्नया सर्वं परिदृश्यमानं सुन्दरं निर्माति।

**वसुन्धरा तीक्ष्णकराभितप्ता**
**सूर्यस्य नित्यं धरतीह गर्भे।**
**प्रतिक्षणं सुन्दरमेव सूते**
**वसूंश्च सर्वान् महिमान्विताऽसौ॥**

एषा वसुन्धरा भगवतः सूर्यस्य कवोष्णकरबाहुबन्धनजनितगाढालिङ्गनसुखसमागमेन पुलकाञ्चिताऽविदितरतिसौख्यमजिता सर्वसुन्दरसंतानचयं प्रसूते। अनयोः सुन्दरसमागमेन (अत्र दिवा मैथुनपापं नास्ति, यतः सूर्यः सर्वपापहारी) सर्वमिदं विश्वं परिवर्तते। धरातले यदनुभूयते प्राणिभिरजस्रं तत् सर्वं धरित्र्याऽनया प्रदीयते। पृथिव्यप्तेजोवाय्वाकाशादिषु विद्योतमानप्रतीयमानस्वभावगुणविद्यमानसुखास्वादनमपि सौदर्यमेव। पञ्चभूतानि समानप्रामुख्यानि भवन्ति प्राणिनाम्। एकेन हीनः प्राणी हीनः भवति। एषा हिरण्यगर्भिणी मातृभावेन सर्वसहा भूत्वा वसुन्धरेति नाम्ना सार्थकतां भजते। एषा रत्नगर्भा नित्यसुन्दरी। प्राणिसंचारस्याधारभूता।

**काचित्प्रियं काञ्चनसैकतश्रिया**
**काचिन्नगानां मधुरावलिप्रिया।**
**कचिद्विचित्रं सुमगन्धवाहिनी**
**कचिद्विभात्येव हि शष्पभासिनी॥**

सन्त्यस्याः वसुन्धरायाः समुत्पन्नानि चेतनाऽचेतनस्वरूपाणि सर्वगन्धसमावृतानि। एषा जननी धरित्री सर्वदा स्वच्छातिस्वच्छा स्वसन्तानमतिप्रेम्णा पोषयति। एषा विश्वंभरा सर्वप्रदायिनी।

**अनन्तसम्पच्चयभारवाहिनी**
**लतान्तवल्लीतरुमण्डलान्विता।**
**विचित्रचित्राऽभरणा वसुन्धरा**
**चकास्ति सौन्दर्यमयी प्रतिक्षणम्॥**

## २१. सलिलं सलीलं लसति ।

सलिलमेव सर्वदेवताऽऽविर्भावस्थानं भवति । सलिलमेव पवित्रतां लीलाविलासलसितं सौन्दर्यं च प्रकृत्यै प्रददाति । तद्यथा विवृण्मः ।

" हिरण्यवर्णाः शुचयः पावकाः यासु जातः कश्यपो यास्विन्द्रः । अग्निं या गर्भं दधिरे विरूपाः ता न आपः शं स्योना भवन्तु । "

सुवर्णवर्णाञ्चितानि स्वतः शुद्धानि पावयितुं शक्तानि वारीण्यत्यन्तसुषमासौन्दर्यलसितानि च सन्ति । अप्सु कश्यपब्रह्मेन्द्रवाडवादयः संजाताः । तादृशसुखजन्महेतवः आपः नः सुखं सौन्दर्यं च प्रयच्छन्तीति तात्पर्यम् । जलराजः वरुणः जलेऽस्मिन्निवसन् लोके प्रवर्तमाने सत्यासत्ये पश्यति । आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् इत्युक्तात् आपः निर्मला भवन्ति । आप. वर्षरूपेण जगत् प्रक्षाल्य स्वच्छं पवित्रं च कुर्वन्ति । आपः सविलासाः भान्ति । आपः अमृतत्वं सौन्दर्यं च प्रददति ।

**वहत्यजस्रं सलिलं सलीलं**
**लावण्यरूपेण परं धरित्र्याः ।**
**हिरण्यवर्णं रसरूपभान्तं**
**सुखाय लोकस्य पवित्रतायै ॥**

जलं रङ्गदुत्तुङ्गतरङ्गैः कल्लोलं कारयितृभिः कल्लोलैः तदा तदा मूर्तीभूतप्रलयस्वरूपमिव भाति । अजस्रं प्राणिजीवनदातृ वारि भवति । आपः फेनपुञ्जहसितैः हास्यरसरूपमिव विलसन्ति । समुद्रघोषयाऽट्टहासं कुर्वन्ति । कमलं विविधसरस्सु कल्हारैः पद्मैः कुवलयैः विविधजलचरैः, समञ्चितं भाति । सलिलं भूतले आकाशस्य सौन्दर्यलीलाविलोकनार्थं तत्र तत्रादर्शरूपैः विद्योतते । आपः नदीषु प्रवहन्ति हसन्ति समुद्रेषु दोलायन्ते । आपः मङ्गलाः । मङ्गलकारकानि सर्वदा सुन्दराणि भवन्ति । तस्मात् आपः सौन्दर्याणामायतनं भवन्ति । ' आपो वा इदं सर्वं विश्वा भूतान्यापः प्राणा आपः पशवः ' इति मन्त्रः । आप एव रसः । तदेव एव सौन्दर्यं । तस्मात् सौन्दर्यमेव सर्वं जगत् सुन्दररसरूपेषु निक्षिपति ।

## २२. तेजः सुन्दरम् ।

पञ्चभूतेष्वग्निः तेजस्वी । सः तेजसा सुन्दरः । सवितुः पुत्र इव वह्निः लोकेऽस्मिन् लोकोपकारकः । अस्य वर्णनं वेदेषु निर्दिष्टप्रकारं विद्यते ।

एष हि देवः प्रदिशोनु सर्वा पूर्वो हि जातः स गर्भेऽन्तः । स विजायमानः स जनिष्यमाणः प्रत्यङ्मुखस्तिष्ठति विश्वतोमुखः ।

अयमग्निदेवः पूर्वदिशः समुद्भूतः सः प्रत्यङ्मुखः विश्वं व्याप्य तिष्ठति अस्याकृतिविशेषः स्वरूपं च विचित्रं दृश्यते । तद्यथा –

**शृङ्गैश्चतुर्भिः प्रविराजमानं**
**द्विशीर्षकं पश्यतु सप्तहस्तम् ।**
**विभान्तमेनं भुवि सर्वभक्षकं**
**सौन्दर्यमूर्तिं बहुवर्णरम्यम् ॥**

आयुरारोग्यसौन्दर्यप्राप्त्यर्थं जनाः प्रत्यक्षदेवं भास्करं सवनकर्मभिरर्घ्यप्रदानैः प्रार्थयन्ते । सूर्यः प्रजाभ्यः समस्तार्चनां होमादिकं स्वीकर्तुं स्वीयतेजः भूमावसृजत् । ततः अग्निकार्यं ब्रह्मयज्ञ होमादिकर्मभिः सकलदेवपूजनं अर्थात् सूर्यनारायणस्यैव भवति । ‘ अग्निमुखा वै देवाः ’ इति मन्त्रेण ज्ञायते यत् अग्निरेव सर्वहवनविधिं सर्वदेवताः स्वीयज्वालामुखेभ्यः प्रापतीति सूर्यान्तर्गतब्रह्मस्वरूपिणी सन्ध्या त्रिकालवन्दनैः संपूजिता भवति । ‘ सन्ध्या हि सूर्यगं ब्रह्म ’ इति व्यासमहर्षीणां सूक्तिः । तस्याः ब्रह्मस्वरूपायाः सन्ध्यायाः संप्राप्ततेजः जगति यथास्थिति वस्त्वन्तरेषु सौन्दर्यरूपेण परिवर्तते । अनेन कारणेन तेजसा सौन्दर्यं जायते। यथा सूर्यतेजसा संवर्धितान्नादीनां ग्रहणेन यथा शरीरे शक्तिः तेजः सौन्दर्यं च भवन्ति तथैव इन्द्राग्निसूर्यादीनां प्रार्थनया मानवः तेजस्वी ओजस्वी सुन्दरश्च भविष्यति । तत् तेजः नेत्रेषु शरीरावयवेषु सर्वेन्द्रियेषु सौन्दर्यरूपेण परिणमते । ततः नित्याग्निहोत्रिणः “ यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासम् । यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासम् । यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासम् । मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु । मयि प्रजां मयीन्द्र इन्द्रियं दधातु । मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ” इत्येवं समिदाधानमन्त्रैरिद्ध्वा तेजस्विनः भवितुं कामयन्ते ।

जगत् सर्वं क्रियाप्रतिक्रियाभ्यां संभरितम् । अपि च यादृशी भावना यत्र सिद्धिर्भवति तादृशी । दिव्यं तेजः सर्वप्राणिसमाश्रितं भ्राजते । ब्रह्मवर्चसा परिव्याप्तमेव सौन्दर्यम् ।

## २३. सुन्दरः सदागतिः ।

सदागतिः सूर्यादेव संभवति । एष एव सदागतिः प्रपञ्चे । यद्येषः स्तम्भितः सर्वं जगत् स्थम्भितं भूत्वा प्रज्वलिष्यति । अयं प्रकृत्याः उच्छ्वासनिश्वासौ एव । वायुः सुन्दरः इति कथयितुम् अशक्यं भवति । प्रतिभाशालिनां कलाभिज्ञानाम् अनुमानप्रमाणेन सृष्टिस्थितिलयादीनां रूपाणि पश्यतां सुन्दरस्वान्तानां वायुः सुभगकुसुमसुकुमारवपुषा भ्राजते । वायुस्पर्शेन शरीरसौख्यं संभवति । तदा संजनित-वायुस्पर्शसुखेन जगति तस्य चलनेन वयं तस्य सौन्दर्यम् अनुमानेन चित्रयितुं पारयामः । सः शान्तः तदा तदा वेगेनोग्रो भूत्वा क्रुद्धः राजते । एकदा गन्धिलैः प्रसूनवातैः अभिलिप्तः प्रचलति । एकदा सुललितकलनादैः मन्दयानैः सकामं विचलति । प्रायेण प्रेम्णा चन्दनशीतलाङ्गः तरङ्गः मालाभिः प्राणिनामङ्गानि शिशिरयति । एषः मनोनिर्मितसुन्दरमूर्तिः । सौन्दर्यसमाराधकाः अदृश्यं समक्षं दृश्यवत् सुन्दरं द्रक्ष्यन्ति । सौदर्याराधकानां वायुः सुन्दरः इति मनीषा भवति । अयं वायुमण्डलाधिपः सन् प्रवहति । विश्वसृजः सूर्यस्यात्मनः वायुरजायत । अयं सुन्दरोच्छ्वासनिःश्वासस्वरूपः । अयं लोकप्राणदाता ।

चलति मधुरशान्तं गन्धिलैः सूनरागैः
सुललितकलनादैर्मन्दयानै सकामम् ।
कलयति जगदङ्गं शीतलैश्चारुगन्धैः
शिशिरमधुररूपो वायुमूर्तिः सहर्षम् ॥

एषः सुन्दरः सर्वत्रान्तर्बहिश्च प्रविश्य मलयजशीतलकरेण मन्दं मन्दं सर्वं परिदृश्यमानं स्पृशति । स्पर्शनेन सर्वमलंकरोति सुन्दरम् ।

## २४. आकाशं शब्दगुणसुन्दरम् ।

सर्वेषामुद्गमस्थानमिदमाकाशम् । आकाशादेव भूतानीमानि जायन्ते । ‘आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः पृथिवी पृथिव्या ओषधयः’ इति उपनिषद् प्रमाणं विद्यते । शब्दगुणकमाकाशमिति तार्किकानां सूक्तिः । आकाशादेव शब्दोत्पत्तिः शब्दश्रवणं च भवतः ।

**तारकाचन्द्रसूर्यैश्च गगनं भाति सुन्दरम् ।**
**रोदसीजातनादैश्च भ्राजते नादितं भुवि ॥**

आकाशकुक्षौ सर्वे शब्दाः अक्षराः भूत्वा विचलन्ति । शब्दप्रतिध्वनिरूपेणाकाशमस्माभिः साकं भाषयन् अस्माननुकरोति । एतादृशशब्दसमुच्चयेन एतदाकाशं प्राणपूरितं सुन्दरं प्रतिभाति । आकाशस्यास्तित्वेनैव प्राणिनां स्थितिश्च भवति । आकाशमेव सर्वभूतानां मातृस्थानमावहति । अस्मिन्नेवाकाशे महापुरुषाणां सर्वप्रणिनां शब्दाः नादाश्च प्रवहन्त्येव नित्यसत्याः भूत्वा । 'नाभ्यासीदन्तरिक्षम्' इति वेदप्रमाणम् । एतत् शून्यं विराट्स्वरूपस्य ब्रह्मणः नाभेः समुद्वत् ।

एतानि सर्वपञ्चभूतानि अत्यन्तसुन्दराणि । लोकाः पञ्चभूतैः लालिताः पोषिताः मारिताश्च । तस्मात् परिदृश्यमानं विश्वं पाञ्चभौतिकम् । एते सर्वे पञ्चमहाभूताः सूर्यात्मानः सजीवाः नित्यसुन्दराः । एतस्मात् पञ्चभूतात् समुत्पन्नं सर्वं यथास्थितिसुन्दरमेव भवति ।

इति श्री गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डल - चक्रवर्तिना महाकविना पण्डित ओगेटि परीक्षित् शर्मणा विरचितायां सौन्दर्यमीमांसायां पञ्चभूतसौन्दर्यप्रकरणं समाप्तम् ।

## ४. धातुनवरत्नसौन्दर्यप्रकरणम् ।

काऽप्यन्तर्लीनशक्तिमाहात्म्येन भूमिपरिभ्रमणेन दिवारात्रं सूर्यचन्द्रनवग्रहादिप्रकाशप्रभावेन सान्तत्यपञ्चभूतसहवासेन परिवर्तनशीलकालप्रभावेन चानुरूपाणुसंयोगेन शक्तिसंयुक्तजठरपाकेन नवरत्नधातूनामुत्पत्तिः संजायते सूर्यस्यात्मभूतसावित्र्या केवलमित्यस्मादृशानां मतम् । दीर्घदीर्घतरव्यापारेणादृश्यमुद्दिश्यकथनं तस्य वर्णनादिकं करणं निरुपयोगमिति निर्गुणपरब्रह्मपथगामिनां मतम् । तस्मात् सर्वस्यापि मूलकन्दोऽसावादित्यो ब्रह्म ।

रत्नगर्भकुक्षिस्थवसुसौन्दर्यस्यापि भगवान् सूर्य एव निदानम् । भूम्यन्तस्थानामपि लोकमोहकारकसौन्दर्यविशेषस्यापि वैविध्यं प्रतीयते । तद्वैविध्यमधुना विचारयिष्यामः ।

धातूनां सौन्दर्यमित्यत्र केषांचन पञ्चभूतानां सौन्दर्यमिति, परेषां रक्तनाडितन्तुमज्जाशुक्रादयः इति, केषांचिद् भूम्यादयो धातवः इत्यर्थः भविष्यति। किन्त्वत्र धातूनामित्यस्य पदस्य लोहविषयकोऽर्थ इति विस्तरामि। एते पञ्चधातवः सहजातसौन्दर्यप्रकाशिताः मानवसौन्दर्यं वस्तुसौन्दर्यं च प्रवर्धयन्ति। तस्मादत्र तेषामुल्लेखनमनौचित्यं न भवतीति विशदयामि।

## २५. काञ्चनं गुणवर्णसौन्दर्योपेतम्।

काञ्चनं कामिनीसौन्दर्यवत् मोहजनकं भवति। एतन्मोहमयस्वीयशरीर-सौन्दर्येण सकलधरातलं जयति। अस्य सर्वं भूषणजालमत्यन्तसुन्दरं भाति। सुवर्णाधिपती सूर्यबृहस्पती भवतः। अनयोः प्रभावः अस्मिन् अधिकतमं पतति।

चेतनाचेतनं सर्वं पूर्वजन्मकृतसंस्कारविशेषेणैव सौन्दर्यं भजतेति स्पष्टम्। संस्कारो नाम परम्परागतगुणसमुपेतक्रमपद्धतिशिक्षणावच्छिन्नविच्छित्तिविशेषः।

**काञ्चनं वरवर्णाक्तं**
**कामिनीदेहनिस्तुलम्।**
**अन्योन्याश्रयभावेन**
**द्वावप्येतौ मनोहरौ॥**

भूमिसमुद्भूतधातूनां मध्ये श्रेष्ठतमोऽयं भासते। अपि च-

**कान्ताकाञ्चनसंप्राप्त्यै**
**प्रयत्नो वर्तते भुवि।**
**द्वावप्येतौ च न स्यातां**
**सौन्दर्यं नास्ति चारुता॥**

## २६. रजतं गुणवर्ण-सुन्दरम्।

रजतं सुवर्णानन्तरं सुन्दरं प्रतिभाति। रजताधिपतिश्चन्द्रः। रजते चन्द्रस्य कान्तिसौन्दर्यविशेषोऽधिकतमं घनीभूतः संदृश्यते। लोकः एनमपि सुवर्णवदु-पयुङ्क्ते। राजतमेतत् भोजनपात्रं पानपात्रं सिंहासनमित्याद्यनेकराजभोगवस्तुषु सुवर्णमिश्रितमुपयुज्यते। एतदपि प्रजानां मोहभावं जनयति।

रजतं शुभवर्णाच्चं
नानालङ्काररूपितम् ।
सुवर्णसाहचर्याच्च
लोकभद्राय राजते ॥

## २७. कांस्यं वर्णनादसौन्दर्यगर्भितम् ।

कांस्यपात्रं सर्ववस्तुनिक्षेपणयोग्यताऽविच्छिन्नं प्रतिभाति । इदं मधुरकटुनादमिश्रितं लोकस्यानन्दं जनयति । कांस्ये बुधग्रहप्रभावोऽधिकतरं द्योतते । कांस्यकृतघण्टानादः बहुदूरं तरङ्गरूपेण प्रसरति ।

कांस्यं नादगुणासक्तं
स्वच्छं लोकोपकारकम् ।
वैविध्यपूर्णपात्रैश्च
गुणमाधुर्यभूषितम् ॥

## २८. उभयसन्ध्यास्वरूपसुन्दरं ताम्रम् ।

ताम्रपत्रनिर्मितपात्रमरुणगभस्तिबिम्बवद्रागमयं मधुरं द्योतते । एतत् शीघ्रविद्युत्प्रवाहोपयोगार्थं प्रयुज्यते । एतत्तूर्णमुष्णग्राहकं भवति । शरीरे ताम्रमयवस्तुसंबन्धेन रक्तप्रसरणं सम्यक् भविष्यतीति तस्मादेव सर्वसुवर्णरजतालंकारवस्तुषु किञ्चित् ताम्रसंबन्धः भवत्यवश्यमिति धातुतत्त्वज्ञानां सिद्धान्तः । अंङ्गारकस्य रूपं ताम्रे प्रतिबिम्बितं भवति । उभयसंध्यारागवत्ताम्रं रागरञ्जितम् ।

उष्णग्राहं भवेदाशु
ताम्रं रोगनिवारकम् ।
ताम्रेण मिश्रितं पात्रं
न तु सर्वोपकारकम् ॥

## २९. लोहः सर्वोपयोगगुणसुन्दरः ।

लोहः कालवर्णः भवति । अयं सर्वोपयोगगुणमण्डितः सदृढशरीरः । अस्य नामान्तरं विद्यते कालसुवर्णः इति । कालसुन्दरोऽयमाधुनिकलोके सर्वजन-

समादरणीयः भवति। अस्मिन् शनिराह्वोः प्रभावः बहुतमं संदृश्यते। एषु पञ्च धातुषु केतुप्रभावोऽधिकं भवतीति ज्योतिषशास्त्रकोविदानां मतम्।

लोहः सर्वोपयोगश्च
दृढः सर्वायुधाकृतिः।
चालयत्यत्रविश्वं सः
सर्वदा कार्यतत्परः॥

एते सर्वपञ्चलोहाः स्वीयगुणवर्णादिसौन्दर्यैः नानास्वरूपैः जगत् सर्वं मोहयन्ति एते सर्वे पञ्चधातवः पञ्चमुखीगायत्र्याः प्रकाशकाशिनाः तस्याः प्रतिमाप्रतीकाः भूतले भ्राजन्ते।

लगुडदारुफलककृतानि वस्तूनि धातुपत्रकृतानि पात्राणि तन्तुकृतानि वस्त्राणि स्वीयसुन्दरशरीरभङ्गिमामुद्राभिः चित्रविचित्ररङ्गैः जनं संमोहयन्ति। एतानि सर्वाणि संस्कृतानि परिष्कृतानि च क्रमशिक्षणतक्षकैः सर्वाकर्षकाणि भवन्ति। ततः विश्वकर्मणः सूर्यस्य प्रपञ्चे सर्वमपि सुन्दरमेव भासते। अमोघान्यनर्घाणि रत्नानि स्वीयसौन्दर्यमयूखैः लोकं परिवर्तयन्ति। तान्युद्दिश्यात्राधुना प्रपञ्चयामि।

जगति रत्नानां विषये विविधप्रकारविचारधाराः सन्ति। पञ्चरत्नानीति केचन। न हि पञ्चरत्नानि, किन्तु वर्तन्ते नवरत्नानीत्यन्ये। परे तु नहि पञ्च, नव च, किन्तु वर्तन्ते चतुर्दशेति। संशय्य अधिकसंख्याकाः शास्त्रज्ञाः नवरत्नानीति निर्णयामासुः! नवग्रहाणां प्रभावेण जगति सर्वमपि भ्रमति जीवति च। भूमौ विद्यमानेभ्यः नदीषु प्रवहद्भ्यः रत्नेभ्यः सौन्दर्यं सावित्र्या प्रचोदित-नवग्रहैः प्रदीयते। ज्योतिषशास्त्रानुसारं ग्रहशान्त्यै सौन्दर्यवर्धनाय च नवग्रहेभ्यः नवरत्नप्रदानं योग्यमिति। तत्तद्ग्रहपीडोपशमनार्थं तत्तद्ग्रहप्रभावप्रवर्धितरत्नधारणं योग्यमिति तथाकरणे पीडापरिहारः सौन्दर्यवर्धनं चेत्यस्मत्पूर्वजानां स्वानुभवैकवेद्यसिद्धान्तः। अत्र नवरत्नानामधिपतयः के, नवरत्नोत्पत्तिः कथम्, अपि च तेषां सौन्दर्यसंक्रमणं कुतः इति वितर्क्य सोदाहरणं प्रपञ्चयामि।

## ३०. अरुणरागसंजातं माणिक्यसौन्दर्यम्।

"ओषधीनां पतये नमो नमः। ओषधीनां पतिः रुद्रः। स्वीयप्रतापतापेन लोकं रोदयतीति रुद्रः। रोदनोपशमनार्थं चन्द्रकान्तिरूपेण सर्वौषधीन्

संवर्धयति तस्माज्जगति सर्वमप्यरुणरागसंजातम्। तथाऽपि केषुचन पदार्थेषु सूर्यप्रकाशः अधिकतमं प्रतिबिम्बितो भवति। प्रतिबिम्बितवस्तुषु माणिक्यमेकं भ्राजते।

एतत् सूर्यरागप्रवर्धितमेकत्रीकृतसूर्यरागमिव प्रतिभाति। अस्य माणिक्यस्याधिपतिः सूर्यः। सौन्दर्यभरितमाणिक्याभरणधारणेन मानवाः गतकिल्बिषकल्मषाः पवित्राः सुन्दराश्च भविष्यन्ति। सूर्यग्रहपीडोपशमनार्थं माणिक्यधारणं युक्तमिति रत्नगुणतज्ज्ञानां मतम्।

एतन्माणिक्यं काबूलदाडिमीफलबीजवदत्यन्तारुणं राजते। अयं माणिक्यराजः सुन्दरमूर्तिः। तेन कारणेन सौन्दर्यवर्धनतत्पराणां सूर्यग्रहजातदुष्प्रभावपरिहारार्थं माणिक्यमणिधारणं सुन्दरं योग्यं च भवति।

**माणिक्यराजस्तपनस्य योग्यः**
**सुदाडिमीबीजसमानकान्तिः।**
**प्रभातरागारुणरक्तवर्णः**
**सौन्दर्यराशिः शुभलक्षणाक्तः॥**

अयं शुभलक्षणसमेतः। शरीरं मनश्च सुन्दरं करोति। अयमेव माणिक्यस्य सौन्दर्यप्रभावः।

## ३१. चन्द्रप्रसादसंवर्धितं मुक्ताफलसौन्दर्यम्।

चन्द्रिका शुक्लाम्बरकाशिनी शारदेव लोकव्यापिनी भवति। तस्याः प्रकाशेन सर्वौषधयः समुज्जीविताः भवन्ति। चन्द्रोऽपि प्रकृत्यै सौन्दर्यप्रदाने मूलकारकः भवति। मुक्ताफलं चन्द्रदत्तसौन्दर्येण भ्राजते। इदं मुक्ताफलं प्रफुल्लमल्लिकाकुड्मलमिवाभाति। एकत्र घनीभूतशुक्लत्वमिव मुक्ताफलं द्योतते। चन्द्रग्रहपीडाशान्त्यर्थं मौक्तिकाङ्गुलीयकं वा, नो चेत् मौक्तिकहारं वा जनाः धारयन्ति। मुक्ताफलं सौन्दर्यसंवर्धनकारणं भवति। रत्नाकरे स्वातिनक्षत्रे शुक्तौ वर्षबिन्दुपतनेन मुक्ताफलमेतत् संजायते। दक्षिणदेशे प्रवहन्त्यां ताम्रपर्णीनद्यां मौक्तिकानि लभ्यन्तेति जनश्रुतिः। एषु मौक्तिकेषु चन्द्रस्य प्रसन्नता शान्तता च प्रतिबिम्बितौ भवतः।

मुक्ताफलं शुक्ररुचा परीतं
राकेन्दुबिम्बात् प्रसृतैः करैश्च।
सौन्दर्यरूपं समवाप्य नित्यं
चकास्तु चन्द्राभरणं पृथिव्याम् ॥

मौक्तिकानां प्रकाशप्रतिबिम्बेन शरीरं सुन्दरं भाति। मौक्तिककण्ठहारवलितं मुखं चन्द्रवद् भासते।

## ३२. गुरुदृष्टिप्रभावदीप्तं पुष्यरागसौन्दर्यम्।

केचन पुष्यरागं पुष्परागमिति कथयन्ति। अयं पुष्यरागः गुरुप्रभावसंवर्धितः। यदा गुरुः पुष्यनक्षत्रे समाविष्टः भवति तदा स समावेशः अत्यन्तशुभावहः भवति। जन्मनि गुरोः नानुकूलत्वान् पुष्यरागयुक्ताङ्गुलीयकं तर्जन्यां धरन्ति। तेन कारणेनानिष्टपरिहारः सौन्दर्यप्रवर्धनं चेति रत्नगुणप्रभावविदुषां सिद्धान्तः। अयं पुष्यरागः पुष्परागवर्णः भवति।

महामहिम्नोः गुरुपुष्यरागयोः
द्युतिः प्रिया सुन्दरशक्तिमूलका।
शुभप्रदा लोकहिताय शाश्वतं
समस्तसौन्दर्यविवर्धनाय च।

अयं पुष्यरागः गुरुसंबन्धेन सर्वं शुभावहं सौन्दर्यमयं करोति।

## ३३. राहुप्रभावभासितं गोमेदिकसौन्दर्यम्।

नीलवर्णीयः राहुः स्वकिरणजालैर्यथास्थिति वसुन्धरायाः अन्तर्बहिश्च विद्यमानं प्राणिजालं वस्तुजालं संवर्धयति। गोमेदिकः राहुप्रभावसंवर्धितः। ततः लोके राहुग्रहपीडिताः गोमेदिकबद्धाङ्गुलीयकं, नोचेत् कण्ठहारं वा धरन्ति। तद्धारणेन तेषां पुष्टिस्तुष्टिश्च भवतः।

गोमेदिको मञ्जुलवल्गुलिप्तः
राहुप्रभावेण विवर्धिताभः।

राहुप्रियः सुन्दरदर्शनाभः
विनीलवर्णो विदधातु शान्तिम् ॥

राहुग्रहपीडानिवारणाय गोमेदिकः योग्यः ।

## ३४. बुधप्रकाशसंवर्धितं मरकतसौन्दर्यम् ।।

बुधः पीतवर्णाभः । सः शान्तात्मा शुभंकरः । अस्य प्रभावेण मरकतमणेः सौन्दर्यं वर्धते । बुधग्रहस्य शान्त्यर्थमरिष्टनिरसनार्थं मरकतबद्धाभरणधारणं योग्यमिति शास्त्रज्ञानां मतम् ।

मरकतमधिकं वरकरलसितं
जनहितजनितं मधुभरहरितम् ।
बुधजनसहितं किरति च सुखदं
शमसुमनिचयं भवभयहरणम् ॥

## ३५. शुक्रतेजोवर्धितं वज्रसौन्दर्यम्

शुक्रः तेजसा सुन्दरमूर्तिः । तस्य माहात्म्येन वपुः कान्तिमद् भवति । वज्रप्रभाभिः परिसराः सुन्दराः भवन्ति । वज्रोत्पत्तिः शुक्रतेजोविशेषेण संभवति । तस्मात् शुक्रस्याभरणं वज्रं भवति ।

शुक्रेण संवर्धितवज्ररूपं
वज्रं महाभास्वरभासिताङ्गम् ।
स्तौमीह सौन्दर्यनिकेतनं तं
कान्तिच्छटाच्छादितरत्नराजम् ॥

वज्रधारणेन वपुः सुन्दरं भाति । तस्माद्वज्रखचिताङ्गुलीयकं, नोचेत् कर्णाभरणं वा, वज्रहारं वा जनाः धरन्ति ।

## ३६. केतुग्रहत्विषा प्रभावितं विदूरसौन्दर्यम् ।

केतुः छायाग्रहोऽपि ज्ञानदाता । अयं मोक्षकारकः । केतुग्रहप्रभाववर्धित-विदूररत्नं शुभप्रदानार्थं केतुग्रहदुष्प्रभावशान्त्यर्थं चोपयुज्यते । वैदूर्यमण्डितसुवर्णाभरणधारणं सौन्दर्यवर्धनाय हेतुर्भवति ।

विदूरशैले प्रभया प्रसूतं
वैदूर्यनाम्ना प्रथितं लसन्तम् ।
मनोज्ञकान्त्या भुवि सुन्दराङ्गं
केतुग्रहस्याभरणं धरामि ॥

## ३७. शनैश्चरतेजःसंजातमिन्द्रनीलसौन्दर्यम् ।

शनैः चरतीति शनैश्चरः । अस्मिन्नयोग्यस्थाने वर्तमाने सति सर्वमयोग्यमेवाभाति । यदि शनिः स्वस्थानापन्नः भवति सर्वं सुन्दरं भवत्येव । अयं प्राणिषु उत्तमं सौख्यं वितरति, नो चेत् पीडयति तान् । सर्वमपि यथास्थिति करोत्ययम् । अस्य प्रभावेण देवाः अप्यष्टकष्टानि प्रापुः । अस्य प्रभावेणैवेन्द्रनीलं संवर्धितम् । तस्मात् तस्य शान्त्यर्थमिन्द्रनीलाभरणधारणं शास्त्रोक्तं योग्यं च भवति ।

तदिन्द्रनीलं रुचिवाहिनीप्लुतं
शनैश्चरस्याङ्गनिभप्रभावृतम् ।
समस्तपीडापहराय नौमि तं
प्रजाकराग्राङ्गुलिकाञ्चनाञ्चितम् ॥

इन्द्रनीलमणिबद्धाभरणानि सर्वशान्तिकारकाणि सौन्दर्यप्रवर्धनमूलकानि चान्ततः भवन्ति ॥

## ३८. कुजप्रभाभासितं प्रवाळसौन्दर्यम् ।

कुजः दोषी भवति । यदि योग्यस्थाने भवति साधु करिष्यति । लोके कुजदोषोपशमनाय प्रवाळाभरणं धरन्ति जनाः । कुजप्रभावेण प्रवाळं सौन्दर्यमाप्नोति । प्रवाळधारणेन जनाः सुन्दराङ्गिणः भवन्ति ।

नित्यं प्रवाळोपमितं कुजाख्यं
क्रोधावृतं ताम्रमुखाभिदीप्तम् ।
प्रवाळसौन्दर्यनिदानभूतं
प्रवाळमालाभरणैर्भजामि ॥

एतेषां सर्वनवरत्नानां वर्णाः नवग्रहाणां वर्णाः इव भवन्ति । एते उपलाः अपि अत्यन्तरमणीयाः । एषु चैतन्यशक्तिः वर्तते । एते रत्नोपलाः जीवितं चैतन्यवन्तं कुर्वन्ति सौन्दर्ययुतमारोग्यवन्तं च प्रकुर्वन्ति । ततः पञ्च धातवः नव रत्नानि च मानवसुहृदः सहवासिनश्च भवन्ति ।

एतेषां नवरत्नानां नवग्रहाणां युतिः यथानुरूपं सौन्दर्यवर्धनं सर्वमङ्गलकारकं च भवति । ततः अस्मदीयपूर्वजाः राजानः चक्रवर्तिनश्च नवरत्नखचिताभरणविषयेषु अत्यन्तश्रद्धालवः अभवन् । नवरत्नखचितसुवर्णाभरणात् प्रसृतेन जलस्नानेन शरीरं कान्तिमत् लावण्ययुतं च भवति । अपि च आयुरारोग्यसंवर्धकं च भवति जीवितम् ।

विविधपर्वतेषु नदीषु शुक्तिषु भूम्यां च समुत्पन्नानि नवरत्नानि स्वीयकान्तिभिः अज्ञातपद्धत्या सर्वलोकं पावयन्ति समुज्ज्वलयन्ति । किन्तु मानवाः सौन्दर्यलोलुपाः तानि रत्नानि समुद्धृत्य समानीय सौन्दर्यवर्धनाय अरिष्टनिरसनाय च स्वाङ्गेषु धरन्ति । किं बहुना एते नवग्रहाः नवरत्नैः सहिताः लोकमङ्गलं लोकसौन्दर्यं च संवर्धयन्ति । अस्मिन् सौन्दर्यमये जगति वर्तमानाः सर्वे सौन्दर्ये केवलं मज्जनोन्मज्जनं कुर्वन्तः तरन्तः सुखमनुभवन्तः सन्ति । ततः जगतः आत्मा सूर्यमध्यान्तर्गतसुषमाशक्तिरेवेति सौन्दर्यमीमांसकानामभिप्रायः ॥

इति श्री गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना महाकविना पण्डित ओगेटि परीक्षित् शर्मणा विरचितायां सौन्दर्यमीमांसायां धातुनवरत्न-सौन्दर्यप्रकरणं समाप्तम् ।

## ५. स्थावरप्राणिनां सौन्दर्यप्रकरणम् ।

### ३९. स्थावरप्राणिनः जङ्गमानां सुहृदः ।

स्थावरप्राणिनः जङ्गमेभ्यः सर्वथा सकलसुखान्नदातारः सर्वदा भवन्ति । एते प्राणिनः अत्यन्तसुन्दराः परोपकारिणश्च सन्ति । एते जङ्गमादीनां हृदयवेदिनः भावुकाः भान्ति । जगति द्विपदां चतुष्पदां सौन्दर्यापेक्षया स्थावराणां सौन्दर्यमतिशयेन भ्राजते । एते अत्युत्तमसौन्दर्यवन्तः प्राणिनः सन्ति । एतेषां सर्वोपयोगत्यागः अनन्वयः भवति जगति । वृक्षलतागुल्मादयः जङ्गमानां सुहृद्गणः । ते अस्माभिः साकं वसन्ति सहजीवनं कुर्वन्ति । स्थावरजङ्गमानामन्योन्याश्रयं जीवितसौख्यं वर्तते ।

एते अन्तःसंज्ञकाः। एते जङ्गमादीनां हृदयवेदिनः। एते स्वीयभावान् सुन्दराभिप्रायं च व्यक्तीकुर्वन्ति किन्तु वयमेव जङ्गमाः तेषां समक्षे स्वार्थिनश्चाल्पज्ञाः भवामः। तेषां हृदयवेदनाऽनभिज्ञाः वयमेव। ते सर्वं जानन्त्येव। महाकवयः ऋषयः वृक्षैः साकं वन्यप्राणिभिः साकं बभाषिरे। ज्ञानेश्वरादयः चतुष्पदभिः वेदं पाठयामासुः। यथा मानवेष्वन्तर्बहिश्च (शरीरेण वचसा मनसा भावनया च) सुन्दराः, तथैव मानवेतरेषु वृक्षेष्वपि सर्वाङ्गसुन्दराः गुणरूपदानसहवासैः च सन्ति।

अस्मिन् अधिकरणे स्थावराणां सौन्दर्यमुद्दिश्य विशदयेयम्। स्थानान्तरेण नामान्तरं भजते सौन्दर्यम्।

स्थावराणां विषये नास्त्येवासौन्दर्यम्। ते सर्वदा नावीन्यशोभासुन्दराः भवन्ति। बाल्ये कोमलाङ्गैः पल्लविताः कोमलाः दृश्यन्ते। यौवने पुष्पस्तबकशलाटुफलभरिताः सुन्दरतमं संदृश्यन्ते। वार्धवये केवलं शाखोपशाखासहिताः पल्लवहीनाः अपि रेखामात्रेण सुन्दराः प्रतिभान्ति। ते स्वनिकटं तेषां सुन्दरपुष्पफलशाखाशीतलच्छायाभिः द्विचतुष्पदः समाह्वयन्ति।

वसुन्धराभास्करसंयोगजन्यान्यभूतानां समवायेन परिणतविचित्ररङ्गविकारलिप्तकान्तिविलासविनिच्छित्ति समलङ्कृतवातावरणविशेषः स्थावरजङ्गमादीन् पोषयति, बहुचित्रितं समलङ्करोति।

प्रपञ्चस्रष्टा पोषकः मारकः च सूर्यः एव। अयमेव कालः। अयमेव विश्वेऽस्मिन् व्याप्य विष्णुनाम्ना प्रथितः। एष हि देवः सौन्दर्यासौन्दर्यनिर्माता। अयमेव स्वीयतेजसा लोके शं करोति, त्रिभुवनानि च पावयति। अयमेव नवब्रह्मणां पतिः। तस्मादेवोच्यते ब्रह्मणस्पतिरयमिति। अयमेव ज्येष्ठराजः महोन्नतपदे विष्णुपदे अनन्तरश्मिभिः विराजमानः संदृश्यते। स्थावरप्राणिसौन्दर्यदाता जीवदाता च त्रयीतनुरयमेव। अधुना केषांचन वृक्षादीनां सौन्दर्यं विवृण्मः। वृक्षेषु गुणान्तरेण सौन्दर्यं कथं लक्ष्यते तद्दर्शयामः।

## ४०. सहकारसुन्दरः सहकारः।

सहकारवृक्षः मङ्गलकारकः। हरितपर्णपुष्पस्तबकसुषमास्निग्धसुन्दरोऽयं भवति सहकारः। अन्यपुष्टाः तस्य शाखासु पल्लवग्रासकषायकण्ठाः मधुरं पञ्चम-

स्वरेण कूजन्ति। बम्भराः मञ्जरीषु मधु गुञ्जन्ति। अस्य सहकारस्य दर्शनेन मनसि सौन्दर्यभावना दृष्टिसौन्दर्यं च भवतः। अस्य फलान्यत्यन्तरसभरितानि। आम्रफलरसमाधुर्यचर्चां गोष्ठीं च श्रुत्वा सर्वफलवृक्षाः लज्जावनताः भवन्ति। अयं सर्वतः सुन्दरः। भ्रमराः वृक्षमेनं विहाय वृक्षान्तरं नैव गच्छन्ति। तस्मादेव कविकुलगुरुणा समुदीरितं यत् "नहि प्रफुल्लं सहकारमेत्य वृक्षान्तरं काङ्क्षति षट्पदाली" इति। अनेन परिसरः उद्यानं वनं गृहावरणादिकं सुन्दराणि प्रतिभान्ति। अयं जन्मनः संक्रामितस्वीयसहकारस्वभावेन जनानां सहकारं करोति।

सुगन्धपुष्पस्तबकैः सलीलं
पैकीयगानामृतसिञ्चितोऽयम्।
सान्तत्यरोलम्बविगुञ्जनेन
विभाति रम्यं सहकारवृक्षः॥

अस्य वृक्षस्य दर्शनसौन्दर्यं, मधुरफलरसास्वादनसुगन्धसौन्दर्यं, वृक्षच्छायाऽऽनन्दसौन्दर्यमित्यादि प्रत्यक्षं जनैरनुभूयन्ते।

## ४१. सर्वदा सुन्दरः सर्वतोभद्रः।

कटुनिम्बवृक्षस्य सर्वतोभद्र इति नामान्तरमस्ति। अयं सर्वतो भद्रकरः वृक्षो भाति। अयं सर्वप्राणिनामारोग्यकारकः वर्तते।

अस्य भूमिजस्य छाया सर्वदा सुखावहा। अयं कटुकायधारी। अस्य शरीरं सर्वमपि कटुप्रायमेव। किन्तु मनसा भावनया च साहाय्यकारकः सुन्दरः च। अस्य पुष्पाणि केचन भोजनसमये खादन्ति शाकरूपेण। अस्य काष्ठेन प्रजाः दन्तधावनं कुर्वन्ति। अस्य स्पर्शेन वायुः पूतः नितरां स्वच्छः गन्धिलश्च वाति। एतस्य भूमिजस्य सर्वे भागाः औषधोपकारकाः भवन्ति। अयं तरुः स्वीयसौन्दर्येण सर्वानारोग्ययुक्तान् विदधाति

सुगन्धिलैः तिक्तमनोहरैः सुमैः
हरीतपत्रच्छविरम्यभूषितः।

**नितान्त सच्छीतलपत्रवीजनैः**
**पुनाति निम्बः खलु सर्वलोकम् ॥**

अयं स्वीयच्छायासौन्दर्येण वासनासौन्दर्येण भावसौन्दर्येण सर्वं जगत् पवित्रीकरोति। तस्मादयं सर्वतोभद्रः ॥

## ४२. कण्टकितमपि मधुरं पनससौन्दर्यम् ।

वृक्षोऽयं सुन्दरस्वरूपी स्निग्धपत्रैः । किन्तु फलानि सौन्दर्यहीनानि कण्टकिताङ्गानि भवन्ति । अयमसुन्दरोऽपि सर्वैरपि संकीर्त्यते ।

**बृहत्कायेन राजन्तं**
**कण्टकैः समलङ्कृतम् ।**
**स्तौमि संपूर्णमाधुर्य-**
**रसनिष्यन्दचेतसम् ॥**

अयमन्तःसौन्दर्यसंपृक्तफलविशेषैः समञ्चितः माधुर्यरूपसौन्दर्येण जनानाकर्षति । 'बाह्यसौन्दर्यरहिताः भवन्ति चान्तःसौन्दर्यसंयुताः लोके इत्येतत् सत्यं पनस एव द्योतयति ।

## ४३. सौन्दर्यच्छविभासितोऽयं कदलीतरुः ।

कदलीतरुः अन्तर्बहिश्च रसमयस्वरूप एव । बहिः लावण्यमयेन छविना हरितपीतवर्णसमलङ्कृतः केवलं शृङ्गाररसप्रपूर्णः शिव शिरोमणिरिवाभाति तस्मादस्य वृक्षस्य स्निग्धतावच्छिन्नाधोमुखमूलेन मदवर्तनां कामिनीनां ऊरुयुग्ममुपमीयते । अस्य पर्णानि विस्तृतानि सुन्दराणि च भवन्ति । रम्भापर्णे षड्रसोपेतभोजनसुखं रम्भासंगमजनितसौख्यादधिकतृप्तिं जनयतीति कामशास्त्र पारगानां रसिकजनानां विकत्थनात्मकः प्रलापः । अस्य फलानि सर्वोपभोग-योग्यानि भवन्ति । कामिन्यः मुग्धवनिताश्च कदलीफलास्वादनसुखानुभूतिं पदे पदे प्राप्तुं कामयन्ते । अस्मिन् वृक्षे सर्वत्र हरितपीतरक्तवर्णाः सर्वदा संमिलिताः चकासति । एतस्य पुष्पाण्यतिसुन्दराणि रागभरितानि च द्योतन्ते । अस्य

रम्भास्तम्भालिङ्गनेन अस्य स्निग्धत्वेन च रम्भापरिरम्भणसुखानुभूतिः भवतीति भावयन्तः रसिकाः रम्भावृक्षः इति नामान्तरं सरसं चक्रुः ।

**लोकप्रियः सुन्दराङ्गः**
**बहुरम्भाफलान्वितः ।**
**रम्भोरुवद्रसासिक्तः**
**राजते कदलीतरुः ॥**

गृहसिंहद्वारेषु विवाहमण्डपेषु पूजामन्दिरेषु सुन्दरमङ्गलमयकार्यक्रमेषु च बहुसुन्दरं शोभामयं हरितमयं चकास्ति कदलीतरुः ।

## ४४. शीतोष्णछायासुन्दरः वटतरुः ।

अयं तरुः शाखोपशाखासमुद्भूतजटाकलापैः विराट्स्वरूपेण परं विस्तीर्य तपस्यतः मूर्तिं नारायणस्यानुकरोति । वटपूर्णिमादिवसे वृक्षराजमेनं पूजयन्ति सीमन्तिन्यः ।

प्रलयकाले श्रीकृष्णः वटपत्रशायी भूत्वा लोकं पुनर्नवं करिष्यतीति गाथा प्रचलति लोके । अस्य तरोश्छायां शीतकाले उष्णाम् उष्णकाले च शीतलां परिकल्पयन्ति आयुर्वेदवेदिनः ।

**शाखोपशाखासु विशालपर्णैः**
**जटाप्रभाभासितदिव्यरूपैः ।**
**प्रियो मुनीनां बहुलार्थमौनैः**
**भावैः प्रशान्तः प्रतिभाति रम्यः ॥**

अयं महान् वटतरुः सुन्दरः सर्वप्राणिसुखकरः शुभंकरः च विराजते ।

## ४५. अश्वत्थनारायणोऽयमश्वत्थवृक्षः ।

साक्षाच्छ्रीमन्नारायणः स्वर्गादवतीर्य अश्वत्थवृक्षरूपेण पृथिव्यां निवसतीति भारतीयानां श्रद्धा भवति ।

पुत्रकाङ्क्षिणः लोकेऽश्वत्थप्रदक्षिणं विधाय पुत्रसंतानप्राप्तानन्दविराजिताः भवन्ति । ततः कुत्रचिद् देशे केषांचन पुरुषाणां नाम अश्वत्थनारायणः इति

राजते। अयं महिम्ना सुन्दरः इति सुन्दरमनस्कानाम् अपि च सृष्टिरहस्यवेदिनां भावाविष्कारः। अश्वत्थवृक्षस्य प्रदक्षिणया नारायणांशभूषिताः बालाः भविष्यन्तीति दृष्टान्तपूर्वकः संप्रदायः प्रचलति। अश्वत्थनारायणमहिम्ना एव खलु सच्चिदानन्द-स्वरूपात्मानः श्रीज्ञानेश्वरादयः समुद्भूताः। ते सर्वे कायेन वाचा मनस-इन्द्रियैश्च सर्वसुन्दराः भूत्वा तदानींतनं विद्वन्मण्डलं स्वीयज्ञानप्रतिभया निर्जित्य भारतीयसाहित्ये ध्रुवरूपं प्राप्नुवन्। तस्मादश्वत्थः महिमासुन्दरमूर्तिः।

**अश्वत्थदर्शनादेव**
**सुन्दरैः भावपुञ्जकैः।**
**राजते सुन्दरं मर्त्यैः**
**किमुत स्पर्शनादिकैः॥**

अश्वत्थकाष्ठानि परमपवित्राणि यज्ञहोमादिषु तानि श्रौतिनः प्रयुञ्जते। अयं वृक्षः भूतले सच्चिदानन्दस्वरूप एव। अस्य वृक्षस्य पत्राकृतिः सृष्टिमूल-भूतस्थानाकृतिविशेषभावनां प्रजानां मनसि जनयति॥

## ४६. मङ्गलकरोऽयं नारिकेलतरुः।

एषः नारिकेलः हरितपीतदीर्घपत्रसमलंकृतः धूर्जटिरिवाभाति। अयं गङ्गा-धरः इव त्रिनेत्रधारी गङ्गाजलयुतफलसुन्दरः इवाभाति। असौ व्योमकेशः इव प्रांशुरस्ति। सज्जनान्तःकरणवत् निर्मलान्तःकरणफलसमुपेतः संराजते जगति। सर्वमङ्गलकार्येषु प्रत्यक्षः भवत्ययं सर्वत्र।

**हरितैः दीर्घपर्णैश्च**
**सुफलैः जलनिर्भरैः।**
**सुन्दरो वृक्षदेवोऽसौ**
**साक्षात् भातीव धूर्जटिः॥**

गृहपरिसरप्रवर्धमाननारिकेलतरुसुन्दरच्छायाभिः चित्रविचित्रसमलंकृतं निकेतनम् अनन्यसाधारणशोभया प्रविराजते। अयं श्रीफलतरुः श्रीनिवास-कल्पतरुः धरण्यां सर्वमङ्गलकारको भवति।

सुन्दरनारिकेलतरुततिविनिर्गतविच्छित्तिकलाविशेषैः भारतं लक्ष्मीछाया-परिवृतं लसते।

## ४७. पावकगर्भसुन्दरः शमीवृक्षः ।

'शमी शमयते पापम्' इति लोकोक्तिः वर्तते । शमीवृक्षः पावकगर्भितः आन्तरङ्गिकसौन्दर्येण शान्तः भ्राजते । अस्य वृक्षस्योपरि पाण्डवाः स्वीयायुधान् निक्षिप्य भद्रतरेण अज्ञातवासं निर्वर्तयामासुः । विजयादशमीदिवसे शमीपत्रं सुवर्णमिति मङ्गलकरमिति च भारतीयाः प्रातिवेशिकेभ्यः प्रयच्छन्ति । शमीवृक्षसमीपे विजयादशमीदिवसे देवपूजां विधाय भारतीयाः तं दिवसं पर्वदिवसमिति भावयन्ति ।

**तेजसाऽन्तर्हितोऽप्येषः**
**शान्तं विभ्राजते प्रियः ।**
**कण्टकाकृतिरूपोऽपि**
**सुन्दरः पापनाशकः ॥**

अग्निगर्भः शमीवृक्षः इत्यनेन हेतुना याज्ञिकाः शमीवृक्षस्य नीरसशुष्ककाष्ठद्वयनिर्मितारण्योः घट्टनेनाऽग्निमिद्ध्वा यज्ञं कुर्वन्ति । तेजसा सुन्दरोऽयं वृक्षः ।

## ४८. गन्धसुन्दरः बिल्ववृक्षः ।

शिवप्रियोऽयं वृक्षः । एषः पापपङ्किलं मनःसलिलं कतकवत् क्षणे पवित्रं करोति । त्रिदलं बिल्वं सत्त्वरजस्तमोगुणत्रयातीतं भूत्वा प्राणिभ्यः मोक्षं प्रदास्यतीति शैवानां सिद्धान्तः । शिवरात्रिदिवसे लक्षबिल्वपत्रार्चनां कुर्वन्ति ज्ञातशिवरात्रिमाहात्म्या भक्तजनाः शिवालयेषु ।

**भक्त्या यः त्रिदलं बिल्वं**
**मनसा चन्द्रशेखरे ।**
**समर्पयेत् स निःशङ्कं**
**कैलासमधिगच्छति ॥**

प्रसन्नपवित्रगन्धैः वृक्षोऽयं दिव्यसुन्दरः, अपि च निश्चलानन्दरूपमोक्षकारकः ।

## ४९. पावित्र्यसुन्दरः पलाशः ।

पलाशः पवित्रगुणसुन्दरः । सः मौञ्जीधारणविवाहादिकर्मसु प्रथमस्थानमाक्रम्य तिष्ठति । एषः गुणत्रयधारीव पलाशदलत्रयेण चकास्ति ।

**पुष्पैः सुरम्यैः शुकचञ्चुरागैः**
**प्रियः परं वैदिककर्मचारी ।**
**ध्रुवं पलाशः खलु दिव्यमूर्तिः**
**बाभाति पत्रत्रितये त्रयीव ॥**

अयं विरागवरकुसुमसमुच्चयैः चित्रितः निरन्तरं पत्रत्रितयेन राजते । अयमलौकिकसुन्दरः ।

## ५०. शमक्षमादिगुणसमुपेतः तुलसीवृक्षः ।

अयं श्रीलक्ष्मीविष्णुस्वरूपः वृक्षः । स्वीयदर्शनेन गन्धेन च सर्वलोकं निरामयं पवित्रं सुन्दरं च करोति ।

**तुलसीदामपूताङ्गः**
**भक्तः पूजां विधास्यति ।**
**वपुः तस्य भवत्येव**
**पुनीतं बहुसुन्दरम् ॥**

नारदादयो मुनीन्द्राः चारुतुलसीदलदामविभूषिताङ्गाः पवित्रतनुभिः सुन्दरा अराजन्त । तुलसीवृक्षस्यास्तित्वात् गृहप्राङ्गणावरणपरिसरवातावरणादिकं पुनीतं सुन्दरं भवतीति वृक्षशास्त्रतत्त्वज्ञानां मतम् । तुलसीवृक्षेषु प्रकारद्वयं वर्तते । एकः विष्णुतुलसीवृक्षः अपरः लक्ष्मीतुलसीवृक्षः इति । विष्णुतुलसीवृक्षः अतसीकुसुमाभः स्वच्छप्रच्छायकायः भाति । लक्ष्मीतुलसी हरितवर्णश्रिया प्रतिभाति ।

## ५१. गुणसुन्दरोऽयं शिग्रुवृक्षः ।

शिग्रुः शीतव्याधिनिवारकः । अयं हरितपीतपर्णसमलङ्कृतचित्राङ्गः शोभते दीर्घशलाटवः डिण्डिमयष्टिसमानाः अस्य वृक्षस्य शिरोजा इव लम्बन्ते । एतेषां

शलाटूनाम् आस्वादनेन हृद्रोगाः उपशमिताः भवन्ति। अस्य पुष्पाणि स्तबकरूपेण भ्राजन्ते। वातपित्तकफश्लेष्माणां शत्रुरयं वृक्षः।

सुन्दरोऽयं तरुः पूर्णः
दीर्घवेत्रशलाटुभिः।
पुष्पपर्णविचित्राङ्गः
शैत्यहृद्रोगनाशकः॥

अयं वृक्षः प्राणिलोकं स्वीयौषधगुणरूपविराजमानपत्रपुष्पशलाटुदानेनापास्तरोगं विधाय सुन्दरं करोति।

## ५२. शान्तिहर्षस्वभावसुन्दरोऽयमशोकः।

शोकरहितः अशोकः। अशोकः सर्वदा जनान् अशोकयुतान् करोति। आत्मान परितः विद्यमानान् सर्वदा संतोषे विराजमानान् करोति। अयं वृक्ष शोकविनाशकारकः अस्ति। तस्मादेवाशोकवृक्षं जना स्वीयगृहप्राङ्गणेषु पालयन्ति चारोपयन्ति च। सः अरालपल्लवैः प्रतिभाति। तस्मादेव रावणः, सीता शोकवती मा भूयादिति बुद्ध्या तां लङ्कायाम् अशोकवनिकायां निचिक्षिपे। अशोकः सुन्दरश्चोन्नतः भवति। अशोकः सुन्दरयुवतिपादस्पर्शेन पुलकितः पल्लवितः पुष्पितः भविष्यतीति सर्वदा युवतिपादस्पर्शसुखाभिलाषीति च कविसमयः।

अरालकुन्तलाकारैः
वक्रितैर्दीर्घपल्लवैः।
हरितच्छविभाभिश्च
सुन्दरं भ्राजते तरुः॥

अयं हरितच्छविचित्रितः वक्रितकेशः महोन्नतपुरुष इव सुन्दरं गभीरं भ्राजते। अयं कविप्रपञ्चे सुन्दरतरुः। अस्य पुष्पं पञ्चबाणेषु एकः राजते। अस्य पर्णानि छुरिकाः इव विरहिणां हृत्सु प्रविश्य संतापं जनयन्ति। अयं मन्मथप्रियः। अयमशोकः विरहिणीमनोविदारकः भवति।

## ५३. रागरञ्जितान्तरङ्गः कुरवकः ।

अयं श्रृङ्गारिकभावपूर्णः तरुः। एषः द्रष्टुं किञ्चित् कण्टकितस्वरूपोऽपि अतीव रागी भवत्यन्तरङ्गेण। एषः कामिनीहृदयंगमः। अयं वर्षासु कामिनी-पाणिग्रहणं सरागं करोति। ताभिः साकं रसिको भूत्वा रागमुद्रया ताभिः निवसति। अयं सुगन्धभासितः। अयं भद्रकारकः।

वर्षासु वर्धितो रम्यः
कामिनीहृदयंगमः ।
रागरञ्जितपाणिभ्यां
गृहीतोऽयं विराजते ॥

अस्य वृक्षस्य रागेण रञ्जितं मत्तकाशिनीनां पाणिपादं मदनभावसौन्दर्य-परिलिप्तमिव रसिकानां हृदयानि परिपीडयति। अन्तरङ्गसुन्दरोऽयं तरुः।

## ५४. श्रृङ्गारभावपूर्णोऽयं मन्दारवृक्षः ।

अयं मन्दारः सुरतरुः इति लोकप्रथा विद्यते। अयं कन्दुकाकारैः वर्तुल-रक्तपुष्पैः दीर्घपीतकेसरैः विलसति। अयं मन्दारः पुराणपुरुषस्य श्रीकृष्णस्य विलासस्थानिकमञ्जुलतरुवरः इति कवीनां समयः। श्रीकृष्णः मदनाभिरामः गोगोपगोपीजनमण्डलमण्डितः सर्वदा मन्दारमूले क्रीडति मुरलीं च वादयतीति भागवतानां कल्पना। अयं श्रृङ्गारक्रीडाखेलनप्रबोदकः तरुः इति कविसमयः।

मन्दारः कन्दुकाकारैः
मञ्जुलैः दीर्घकेसरैः ।
श्रृङ्गारभावसंपूर्णैः
रक्तपुष्पैः विराजते ॥

केषांचन वृक्षाणां पुष्पाणां दर्शनेन तेषां सुगन्धानुभावेन कामः सर्वदा पुष्पितः फलितः भविष्यतीति रसिकानाम् अनुभावः। तादृशपुष्पेषु मन्दारः एकः। अयं रूपगुणमण्डनसुन्दरः।

## ५५. परिमलसुन्दरः पारिजातः ।

पारिजातः गन्धेन नपुंसकमपि तामरसनेत्रवेशमगन्तारं करिष्यतीति कविसमयः । पारिजातगन्धेन वन्ध्याऽपि पुष्पवती भूत्वा सुरतकर्मणि व्यग्रमानसा भविष्यतीति जनश्रुतिः । पारिजातापहरणमिति काव्यम् अनेन पारिजातकुसुमेन संजातम् । अयं पारिजातः महारसिकः स्त्रीसुखसौन्दर्यरसपायी स्वयं भवति । अपि च स्वीयप्रभावेण रतिसुखसौन्दर्यं जनयति स्वीयगन्धैः ।

**पारिजातस्य गन्धेन**
**रतिसौख्यं महीयते ।**
**यथा च सत्यभामायाः**
**कृष्णस्यासीत् पुरा भुवि ॥**

सत्यभामाश्रीकृष्णयोः प्रणयसौख्यसौन्दर्यम अमुना पुष्पगन्धेन बहुमुखव्याप्तं सर्वसुन्दरं विकासमासत । अयं रूपगुणस्वभावैः सुन्दरः भ्राजते ।

## ५६. पङ्कजाऽपि पद्मालया पद्मिनी ।

कमलालया पद्मिनी जगन्मोहनाङ्गी भारतीयसाहित्ये प्रथमस्थानं भजते । एषा कमलनाभनाभिसंजाता । द्रुहिणजन्मस्थानभाजिनी चैषा । एषा कमलालया । एषा पङ्कात् संजाताऽपि अतिसुन्दरी ।

**पङ्कजा धातृयोनिश्च**
**पद्मनाभोद्भवा प्रिया ।**
**पद्मालया पद्मिनी च**
**सुन्दरा कविभावजा ॥**

एषा सूर्यकरप्रफुल्लिताङ्गी सूर्यप्रिया भाति । एषा शतपत्रसुन्दरी । क्वचित् सहस्रपत्रसुन्दरी । एषा मदवतीनां सुन्दरपुरुषाणां मुखलोचनपाणिपादोपमिता भवति । अस्याः सौन्दर्यं सर्वसद्गुणस्थानं वर्तते । अस्यारविन्दमिति नाम विद्यते । अनेन नाम्ना इदमरविन्दं मदनबाणेषु अन्यतमः प्रतिभाति ।

## ५७. सुरवनितालोचनसुन्दरं नीलोत्पलम् ।

उत्पलेषु नीलोत्पलमत्यन्तसुन्दरम् अस्ति । एतत् चन्द्रमसः अत्यन्तप्रिय-भाजनं भवति । एतत् पञ्चबाणस्य सायकेषु एकतमं भाति ।

**सितासितद्विवर्णाभ्यां**
**भ्राजिता चन्द्रकामिनी ।**
**कासारे सुन्दरं भाति**
**कौमुदी सहवासिनी ॥**

एकस्मिन्नेव सरसि समुत्पन्नानां विविधोत्पलानां मध्ये केवलं नीलोत्पलमेव सुन्दर-तमं शोभते । तस्मादेव अरविन्दानन्तरं सरसीरुहेषु नीलोत्पलस्यैव स्थानं भवति सौन्दर्यपरिचर्चाविषये ।

## ५८. सर्वसुमनःसौरभ्यसंवासिनी चम्पासुन्दरी ।

एषा सुवर्णवर्णा सुगन्धभरिता सुन्दरी । एषा वर्णसुन्दरी शरीरसुन्दरी गन्धसुन्दरी पुष्पसुन्दरी विराजते । पुष्पेषु चम्पा इति लोकोक्तिः । कवयः योषानासिकाम् अनया चम्पयोपमान्ति ।

**चम्पा सुवर्णवर्णाङ्गी**
**गन्धसंपृक्तजीवना ।**
**अन्तर्बहिश्च सौन्दर्ये**
**पुष्पेषु प्रविराजते ॥**

एषा वरवर्णिनी वर्णसुन्दरी गुणसुन्दरी म्लानाऽपि सुगन्धं दशसु दिशासु वितनोति । एतदेव सर्वतोमुखसौन्दर्यम् अस्ति ।

## ५९. वर्णगुणसौन्दर्यशालिनी मल्लिका ।

एषा कामधेनुधवला, सुगन्धनिर्भरा पञ्चबाणबाणेष्वेकतमा, सुदतीदन्तो-पमिता, कामिनीहसितधवला, हिमवन्नगशिखरशुभ्रा, पार्वतीपत्यट्टहासशुक्ला, क्षीरसागरफेनिलसमाना मत्तगन्धविसर्पिता विद्योतते । एषा पूर्वजन्मकृतसंस्कार-जनितसौन्दर्येण प्रियगन्धा प्रियदर्शिनी विभाति ।

दन्तकुड्मलपङ्क्त्या सा
प्रफुल्लमधुरानना ।
सर्वदा चारुगन्धेन
भ्राजते पत्रसुन्दरी ॥

एषा मल्लिका वैशिष्ट्यपूर्णसुन्दरीति पौराणिकानां मतम् ।

मल्लिकाऽर्जुनसंयोगे
नित्यगन्धिलभासिनी ।
अमरीकबरीभारे
गन्धिला भाति मल्लिका ॥

एषा पुष्पमतल्लिका मल्लिका दिव्यत्वमापन्ना सौन्दर्यगरिम्णा राराज्यते । मल्लीप्रसूनसौरभ्यैः वसन्तोऽपि कामविकारं प्राप्नोति किमुत मानवानां विषये ।

## ६०. गन्धिलरजोगुणस्यन्दनसुन्दरी केतकी ।

केतकी क्रकचपत्रचित्राङ्गी । कण्टकितपत्रशरीरा । तथापि गन्धिलात्मना विभाति । म्लानापि मृतापि सुगन्धान् लोकं परितः विकिरति । एषा श्वेतपीतहरिताङ्गी गन्धायते ।

गन्धपत्रप्रकीर्णाङ्गी
क्रकचाकृतिभासिनी ।
निर्दाक्षिण्यं लुनातीह
प्रेमिकानां गलानि सा ॥

एषा स्वीयगन्धसौन्दर्येण प्रेमिकान् तोषयन्ती, क्रकचरूपपत्रैः हृदयं क्रकचयन्ती, स्वीयान्तर्हितगन्धसौन्दर्येण शरीरधावल्येन च कामं प्रजनयन्ती राजते । एषा रसिकजनमनोभिरामा भाति ।

## ६१. रूपहीनोऽपि गन्धसुन्दरः बकुळः ।

बकुळः गन्धसंस्कारावृतः भाति । द्रष्टुमयं पृथुरुशरीरवानपि नक्षत्रभ्राजितपुष्पसंयुक्तः । एषः शुष्करूपपुष्पयुतोऽपि गन्धेन परं विभ्राजते ।

वृक्षेषु वकुलः सत्यं
भूतले वेङ्कटप्रियः ।
दिव्यरूपमवाप्यासौ
तनुते गन्धसञ्चयम् ॥

## ६२. श्वेतपीतवर्णगन्धभरिता श्यामन्ती ।

एषा तत्र तत्र श्वेतवर्णा पीतवर्णाङ्गी च भूत्वा नक्षत्ररूपेषु विराजमाना तदा तदा पद्मपीठवत् विभ्राजमाना मधुरगन्धान् वितनोति । एषा श्यामन्ती देवीप्रिया ।

देवीप्रिया हि श्यामन्ती
पीतवर्णा सुगन्धिला ।
द्वाभ्यां सुरूपगन्धाभ्यां
सुन्दरी लसते भुवि ॥

इयं सुन्दरी त्रिपुरसुन्दरीवाभाति ।

## ६३. निरन्तरं घृष्टमपि सुन्दरगन्धमेव तनोति चन्दनम् ।

चन्दनं युगान्तपर्यन्तं गन्धं वहत्येव । एषः सुन्दराङ्गः गन्धात्मना परिवृतः भवति । यथा सुन्दरी सुरतमृदिता सौन्दर्यं वितनोति तद्वत् चन्दनं घृष्टं घृष्टं गन्धसौन्दर्यमेव वितनोति ।

सुन्दराङ्गस्य गन्धेन
करोति वसुधातलम् ।
चन्दनं मोहितं नित्यं
कामिन्याः विभ्रमो यथा ॥

जनाः अस्य चन्दनस्य गन्धं शिरसि धारयन्ति सर्वाङ्गेषु चर्चयन्ति ।

## ६४. सुकुमार-सुम-लसितः शिरीषः ।

शिरीषः शरीरेण पृथुलाकार भ्राजितः। अयं बलिष्ठः द्राघिष्ठः। किन्तु तस्य पर्णानि अतिस्वल्पाकारभासितानि सन्ति। पुष्पाणि तावत् मृदुलानि कोमलानि सुकुमारपत्रकिंजल्कसंयुतानि सन्ति। अमुना शिरीषपुष्पेण कवयः स्त्रीसौकुमार्यम् उपमान्ति। कविकुलगुरोः प्रीतिकरमेतत् शिरीषपुष्पम्।

**अत्यन्तसुकुमाराङ्गैः**
**कोमलैः दीर्घकेसरैः।**
**व्यक्ताव्यक्तसुगन्धैश्च**
**हृदयाह्लादकं सुमम्॥**

एतस्य कुसुमस्य तादृशसौकुमार्यं मनमोहनकारकसौन्दर्यं कथं संप्राप्तं, तस्मै केन दत्तम् इति प्रश्नः।

## ६५. सुन्दररागस्नमधुराम्लरसस्यन्दपाण्डुरक्तबीजयुतफलसमुपेतः दाडिमीवृक्षः।

दाडिमीवृक्षः रक्तपुष्पैः हरितपीतरक्तवर्णशलाटुफलैश्चात्यन्ताकर्षणात्मकः भासते। अस्य फलस्य बीजानि श्वेतरक्तवर्णानि च भवन्ति। कवयः सुदतीनां दन्तान् श्वेतवर्णदाडिमीबीजपङ्क्तिभिः उपमान्ति। केचन कामिनीस्तनद्वयं दाडिमीफलोपमितं वर्णयन्ति। अन्ये सुन्दर्याः अधरोष्ठं दाडिमीपुष्पेण संतोलयन्ति। अयं वृक्षः सर्वथा सुन्दरः।

**दाडिमीफलसाम्येन**
**कामिनीकुचमण्डलम्।**
**कलिकारागरूपेण**
**वर्णयन्त्यधरं प्रियम्॥**

सृष्ट्यां सर्वमपि सावित्र्या संतुलनात्मकदृष्ट्या चित्ररूपेण विरचितं प्रतिभाति।

## ६६. पर्वतसुन्दरोऽयं हिमालयः ।

हिमालयः पर्वतेषु महोन्नतः सुन्दरश्च। स प्रशान्तमूर्तिरिवाभाति । अयमेव भारतीयसंस्कृतिप्रदाता जीवनदाता च । अयमेव भारतरक्षकः । एतादृशं महौन्नत्यं सौन्दर्यं प्रशान्तत्वं च कथं कुतः समागतम् इति प्रश्नः अनुत्तरितः तिष्ठति । अत्रैव विद्यते सृष्टिरहस्यम् ।

**नीहारनिम्नोन्नतदिव्यशेखरं**
**देवालयं भव्यधराधरोन्नतम् ।**
**शीतोष्णवातावरणादिमूलकं**
**को वा कथं सृष्टिपथीह सस्रजे ॥**

अनेके महाकवयः हिमालयं विलोक्य मुग्धाः भूत्वा कवितां विलिख्य कविताप्रपञ्चे सुस्थिराः अभूवन्। तेषु व्यासकालिदासादयः समुल्लेखनीयाः अग्रगण्याः भान्ति । कवयः सौन्दर्यनिर्माणचतुराः । ते सौन्दर्यस्रष्टारः । ते क्रान्त-दर्शिनः सन्ति ।

## ६७. रसिकतायुतं सिकतासौन्दर्यम् ।

सुन्दरयुवत्याः श्रोणीबिम्बे सैकतराशिभ्याम् उपमीयेते। सिकता पीतवर्णा श्वेतवर्णा च भवति । यमुनातीरसिकतासु राधामाधवयो रहःकेलयः विराजिताः इति कवीनां भावनाः सौन्दर्यानुमेयाः भवन्ति । सिकता सर्वदा समुद्रतीरे उत नद्यास्तीरे च लसते । अनया सिकतया नदी सुन्दरतरा भाति । गङ्गायमुनयोः संगमे सिकता पवित्रा शर्करा इव संदृश्यते । ततः सिकता शृङ्गारोद्दीपनकारिणी भवति ।

**कालिन्दीवीचिकापूता**
**गङ्गासंगमभासिता ।**
**राधामाधवपूताङ्गी**
**सिकता भातु सुन्दरी ॥**

सिकतासौन्दर्यम् अनिर्वचनीयम् अनुभवैकवेद्यं च भवति । सिकतातले रहःकेलयः जीवने अविस्मरणीयाः सन्ति ।

एवमेव प्रपञ्चे सकलतरुततयः गुणगन्धपुष्पशलाटुफलकाष्ठरसैः च सुन्दरमनोहरशरीरावयवैः च सर्वं लोकं समाकर्षन्ति संमोहयन्ति च। तस्मात् सवितृमण्डलान्तर्गततेजः सौन्दर्यं विविधप्रकारं विराट्स्वरूपेषु व्याप्य नरीनर्ति। प्रपञ्चे सर्वजनानुभवमूलभूतवृक्षादीनां सौन्दर्यमेव प्रादर्शयं किन्तु अज्ञाताः ब्रह्माण्डमण्डले बहवः वृक्षाः संराजन्ते। तेषां वर्णनं अशक्यं भवति। स्थालीपुलाकन्यायेन केषांचन वृक्षाणां गुणसौन्दर्यादीन् वयं विस्तारयामासिम।

इति श्री गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना महाकविना पण्डितपरीक्षित्शर्मणा विरचितायां सौन्दर्यमीमांसायां स्थावरसौन्दर्यप्रकरणं समाप्तम्।

## ६. मनुष्येतरजङ्गमानां सौन्दर्यप्रकरणम्।

मर्त्येषु यथा सुन्दरपुरुषाः सुन्दरस्त्रियः वर्तन्ते तद्वत् रूपगुणस्वभावस्वरादिविविधसौन्दर्यैः च मनुष्येतरप्राणिषु अपि सुन्दरस्त्रीपुरुषप्राणिनः लसन्ते। मनुष्येतरजङ्गमाः मनुष्याणां कृते सुखशान्ति--आनन्द-प्रजननविषये सहचराः सन्ति। मनुष्यसमाजात् तेषां निष्कासनम् असुन्दरममानुषं च भवति। मनुष्येतरप्राणिनः जीवन्तः प्रजानामत्यन्तोपकारकाः भवन्ति, मृताश्चापि स्वशरीरावयवैः सर्वथोपकारकाः भवन्ति। किन्तु मानवानां विषये तथा न भवति। मनुष्येतरप्राणिनां सर्वसौन्दर्यविलसितवस्तूनि प्रजोपयोगीनि भवन्ति। तस्मात् तेषु मृतेषु अपि तेषां सौन्दर्यं सुस्थिरं भवति। किञ्चित् कालं वस्तुरूपेषु जनैश्च जेगीयते।

ततः अस्यां सौन्दर्यमीमांसायां मनुष्येतरप्राणिनां वर्णनादिकं गुणस्वभावसौन्दर्यकथनं योग्यमिति मत्वा केषांचन चतुष्पदां द्विपदां च माहात्म्यं विवर्णयिषवो वयं आदौ बृहत्कायं गजमुद्दिश्य लिखामः।

### ६८. भद्ररूपो गजः सुन्दरः।

गजः चतुष्पात्सु बृहत्तमः प्राणी। एषः शरीरेणालसः मन्दः इव, त्वचा कर्कशः च संदृश्यते। किन्तु स मङ्गलकरः सूक्ष्मबुद्धिमान् भवति। गजनिवसितप्रदेशः लक्ष्मीविलसितः भाति। अयं मनसा बुद्ध्या गमनेन च सुन्दरः। अयं मूर्तीभूतात्मसौन्दर्येण विभ्राजते। तस्मात् तस्य दर्शनेन जनानां पवित्रानन्दः भवति।

अयमिन्द्रवाहनभूतैरावतस्य वंशजः वर्तते। गजाः सर्वेऽपि ऐरावतवंशजा एव अग्निहोत्रशापकारणात् गजानां जिह्वाप्रवृत्तिः आसीदिति पुराणोक्तमस्ति। गजघींकारात् निषादस्वरः संजातः इति केषांचन संगीतमर्मज्ञानां मतम्। अयं सुन्दर महोन्नतप्राणी।

मधुरगमनमूर्तिः शुभ्रदन्तावलोऽयं
शुभदवदनराजत् लम्बहस्ताभिरामः।
सतत चटुलशूर्पाकारकर्णः प्रशस्तो
विकिरति भुवि लक्ष्मीं वाहनो वज्रपाणेः॥

अपि च

द्विरदो लम्बहस्तेन
स्तम्भपादैर्महोन्नतः।
सुन्दरो बुद्धिभावाभ्यां
भद्ररूपो विराजते॥

अत्यन्तसूक्ष्मबुद्धिमान् प्राणी गजः।

## ६९. अश्वः वेगविश्वासादिरूपैः सुन्दरः।

अश्वाः सर्वे उच्चैश्रवसः, नो चेत् इन्द्रायुधस्य वा जातिजाः भवन्ति। अस्य हेषायाः धैवतं जज्ञे इति गन्धर्वशास्त्रज्ञानाम् ऊहः। अयं सदागतिरिव आशुगः। अयं शरीरेण स्वभावेन वेगेन स्वमिभक्त्या च सुन्दरः। अयं कल्कि-पुरुषस्य वाहनमिति कथयन्ति। एषः अश्वः प्रतापराणाधिपतिं समरे ररक्ष। अयं मानवानां अधिकं विश्वासपात्रम् अस्ति। अयं हयग्रीवावतारः। यथा –

उच्चैश्रवाः क्षिप्रगामी
दीर्घपुच्छविराजितः।
धावते तालबद्धश्च
भ्राजतां वेगसुन्दरः॥

एषः समुद्रे वाडव इति नाम्ना अग्निरूपेण वसति। एषः वर्चसा रूपेण च सुन्दरः।

अपि च

संमार्जनीतुल्यसुपुच्छभासुरः
सुग्रीवसंव्याप्तसटाच्छटावृतः ।
हेषारवैः ज्ञापितधैवतस्वरः
राराज्यतां वेगगुणेन घोटकः ॥

### ७०. हरिणः सुन्दरः वायुवेगधावनक्षमश्च ।

अयं सर्वेषां मोहं जनयति स्वसौन्दर्येण । सदागतिना तुलितगतिः वेगवान् भवति । अयं वायुदेवस्य वाहनम् । अयं विलोभनकारकसौन्दर्योपेतः भाति । मनसा भीतः चञ्चलः विराजते । अयं विश्वासपात्रम् । अस्य नेत्रे विशाले सुन्दरे भावप्रपूर्णे च भवतः । अयमुत्प्लुत्योत्प्लुत्य धावति । कालिदासस्य सारङ्गः मूर्तीभूतमधुरभाववेगसुन्दरः बभूव । अयं स्वभावेनात्यन्तदीनः करुणामयश्च भवति ।

अस्य नेत्राभ्यां वामलोचनानामपि नेत्राणि उपमितानि भवन्ति । सीता वने हरिणसौन्दर्येण विलोभिता बभूव । भगवदंशसंभूतः श्रीरामचन्द्रोऽपि लुलुभे मृगाय । एतदपेक्ष्याऽधिकं किं वक्तव्यं भवति । अस्य सौन्दर्यस्योदाहरणेनालम् ।

धावनोत्पतनं यस्य
मण्डनं भाति जन्मना ।
स एव हरिणः साक्षात्
लोकेऽस्मिन् नेत्रसुन्दरः ॥

अपि च

ग्रीवाभिरामः चपलायताक्षः
शृङ्गारशृङ्गातिमनोहरश्च ।
मृगस्तु वायोः द्रुतवाहनाख्यः
न कस्य चित्तं विशतीह लोके ॥

### ७१. अञ्जनद्युतिविषाणसुन्दरोऽयं महिषः ।

महिषः मूर्तीभूतान्धकारपुञ्जः इव विभाति । अयं तामसप्रकृतिरूपः ।

अयं सुन्दरविषाणधारकः। अयं यमराजवाहनः भवति। अयं कालवाहकः कालं वहन् प्रचलति। अयं धर्मात्मा कालस्वरूपः। भयदोऽपि तामसप्रकृतिरपि शान्तः सुन्दरश्च। पुष्करावर्तकादिगर्जनासंतुलितभीकरस्वरेण भयकारकश्च।

अञ्जनप्रभया तुल्यः
विषाणायुधधारकः।
नासिकारन्ध्ररज्ज्वा च
राजतां कालवाहनः॥

अपि च।

कालाभ्रसौन्दर्यसमानदेहिनं
कालस्य खड्गे इव वक्रशृङ्गिणम्।
एकत्रमूर्तीकृततामसश्रियं
नमामि तं कालविहारवाहनम्॥

### ७२. वृषभः ककुद्सुन्दरः।

वृषभराजः कैलास इव स्वच्छः धवलः महोन्नतः शृङ्गी च। अयं विरूपाक्षस्य वाहनभूतः नन्दिकेश्वरः अस्ति। शिवालये अस्य दर्शनं शङ्करात् प्रथमं भवति। अयं धवलाङ्गः सुन्दरमूर्तिश्च भवति।

कैलासोत्तुङ्गदेहश्च
शान्तरौद्ररसाकृतिः।
नन्दी ककुद्मन् शुभ्रोऽयं
द्योतते शिववाहनः॥

अपि च

स्फुरस्वनादसमं भूमिं
खनन्तं खुरकोटिना।
शृङ्गाभ्यां चन्द्ररेखाभ्यां
मण्डितं नन्दिनं स्तुमः॥

अयं कैलासोन्नतः धवलः सुन्दरश्च।

## ७३. कुकुरोऽयं विश्वाससुन्दरः।

यदा त्रिमूर्तयः ब्रह्माविष्णुमहेश्वराः दत्तात्रेयरूपमापन्नाः तदा त्रयी शुनकत्रयरूपं प्राप्य धरित्र्याम् अवतीर्णा तेन साकं इति पुराणगाथा अस्ति। अयं कालभैरवः। अयं वक्रपुच्छः सुन्दरः। अयं विश्वासपात्रम्। सुन्दराय कालभैरवाय नमः।

वक्रपुच्छः पतत्कर्णः
भीषणं भषणे रतः।
वेदमूर्तिश्च विश्वास्यः
सततं कुक्कुरः प्रियः॥

काशीयात्रां समाप्य प्रत्यागताः गृहस्थाः कालभैरवसमाराधनां विधाय कुक्कुरं समलंकृत्य ब्राह्मणभोजनादिकं कारयन्ति। अयं कुक्कुरः पवित्रविश्वाससुन्दरः भाति।

## ७४. मर्कटः चञ्चलस्वभावसुन्दरः।

शरीरेण मर्कटः सुन्दरः नास्ति। किन्तु हनूमतः अवतारेण तस्मिन् सुन्दरत्वं कर्मशीलत्वं वायुवेगित्वं समागतम्। सर्वमपि एकत्रीकृत्य तस्मै प्रदत्तं विधात्रा। अयं तेजसा वर्चसाऽत्यन्तसुन्दरः। नमोवाकं प्रशास्महे

हनूमान् कर्मशीलश्च
वायुवेगविराजितः।
अत्यन्ततेजसा दीप्तः
सुन्दरोऽयं विराजताम्॥

## ७५. अजः करुणशान्तस्वभावसुन्दरः।

अजस्य स्वरात् गन्धारस्वरः समुद्भूतः इति संगीतज्ञानां मतम्। अजः जडबुद्धिमान् सः तामसप्रकृतिना अमर्मज्ञ अमायकः भवति। सः वीतिहोत्रस्य वाहनं भवति। सः अग्नये रोचते। सः कृष्णवर्णः भवति। शान्तस्वभावपूर्णामायकत्वमेव तस्य शोभनं भवति। तेन स्वभावेन सुन्दरोऽयं प्रतिभाति।

**पर्णाहारी कृष्णवर्णः**
**करुणामयलोचनः ।**
**दयालुः सुन्दरात्माऽसौ**
**वाहनं जातवेदसः ॥**

अयं यज्ञपशुः भवति । 'अजामेकां कृष्णवर्णाम्' इति वेदोक्तिः विद्यते ।

### ७६. पवित्रा शान्तस्वभावसुन्दरा धेनुः ।

धेनवः कामधेनोः नन्दिन्यः एव । धेन्वां पवित्रसौन्दर्यं विद्यते । एषा रुद्राणां माता भवति । वसूनां दुहिता भवति । आदित्यानां स्वसा भवति । असौ अमृतस्य नाभिस्थानं भवति । एषा भूस्वरूपिणी विष्णुपत्नी । गौरूपेण एषा पालिता श्रीकृष्णेन । एषा स्वभावसुन्दरा शान्ता । इयं अमृतदायिनी पूजनीया वन्दनीया अर्चनीया च भवति । एषा ऋषभस्वरमण्डिता अम्बारवं करोति । अस्याः ऋषभस्वरः संजातः इति संगीतज्ञानां मतम् ।

**अन्तर्गतैः प्रियैः बाह्यैः**
**सुन्दरैर्वर्तनैः परम् ।**
**वेदवेद्या हिन्दुमाता**
**गौरियं भाति भूतले ॥**

12922

### ७७. सटाच्छटाच्छन्नपश्चाननः सुन्दरः ।

अयं सुन्दरोऽपि स्वभावेन मृगराजः । अस्याक्रोशं गर्जनमिति कथयन्ति । वपुः कान्तम् । मनः सुन्दरम् । यदि बुभुक्षितोऽयं वन्यप्राणिनः हन्ति । तस्मादस्य स्वभावः न्यायसौन्दर्यसमलंकृतः । अयं दशावतारेषु एकः वर्तते । तस्मिन् समये तस्य नाम नृसिंहः इति आसीत् । अयं विक्रमसुन्दरः ।

**सटाविशीर्णशीर्षोऽयं**
**जन्मना देहसुन्दरः ।**
**नरसिंहाकृतिर्देवः**
**विक्रमे शोभतां हरिः ।**

### ७८. क्रूरस्वभावोऽपि चित्रवर्णसुन्दरः शार्दूलः ।

अयं वर्णसुन्दरः । शरीरं पीतवर्णाभम् । शरीरं कालिमरेखाभिः चित्रितं भाति ।

अयं स्वभावक्रूरः। तस्य बुभुक्षा भवति वा न वा, वन्यप्राणिनः हन्ति। अयमत्यन्त-क्रूरः तथापि सुन्दरः शरीरवर्णेन। अयं विशेषेण नरभक्षकः भवति। अस्य चर्म पवित्रम्। शिवः व्याघ्रचर्माम्बरधारी। अयं अविश्वसनीयः अस्ति। अस्य चर्म पवित्रमिति कृत्वा तपस्विजनः अस्य चर्मणि उपविश्य तपः कुर्वन्ति। अयं बाह्य-सुन्दरः अन्तरङ्गेण क्रूरः भाति।

कृष्णरेखाविचित्राङ्गः
क्रूरभावाभिमण्डितः।
सर्वदा नरभक्षी च
शार्दूलः क्रूरभावुकः॥

अथ केषांचन द्विपदानां सौन्दर्यं प्रस्तूयते।

## ७९. मयूरः सप्तवर्णसमलंकृतपिच्छसुन्दरः।

अयं षड्जस्वरे केकां करोति। अस्य कूजनस्य नाम केका इति कथयन्ति। अयं पक्षी सर्वदा सुन्दरः। अयं चित्रवर्णपिच्छचित्रितः। अस्य नीलकण्ठः इति नामान्तरं विद्यते। अयं सरस्वत्याः कुमारस्य च वाहनम् अस्ति। अयं वाचा मनसा शरीरेण च सुन्दरः अस्ति। भारतीयपक्षिराजः। एषः मेघनादसंतुष्टः केकां कुर्वन् नृत्यति। अयं सुन्दरपक्षिराजः।

केकानाट्यस्वरूपैश्च
स्वभावेन च सुन्दरः।
वाण्याः कुमारदेवस्य
वाहनोऽयं विराजताम्॥

अपि च।

केकावाण्या लोकमेनं प्रतुष्टं
स्वीयैर्नाट्यैः मेघगर्जानुसारम्।
पिच्छैः चित्रैः सर्वशोभाप्रकीर्णैः
संकुर्वाणं केकिनं नौमि नित्यम्॥

## ८०. हंसः मन्दगमन-सुन्दरः।

अयं सात्त्विकस्वभावालंकृतः। एषः ब्रह्मणः वाहनम्। असौ शुक्लरूपः।

अस्य द्विपत्रितरागचञ्चुपुटं विद्यते। अयं रक्तपादः। केचन हंसाः सुवर्णपक्ष-चित्रिताः भान्ति। अयं कुशलः बुद्धिमान् च। असौ नीरक्षीरमिश्रणे क्षीरं पीत्वा नीरं त्यजति। अयं चञ्चुना मृणालानि कृन्तति खादति च। अनेन हंसेन नलचरितं बभूव। अयं सुन्दरः आकाशमार्गेण गन्तुं समर्थः जले च तर्तुं क्षमः भवति।

वाहनं ब्रह्मणो हंसः
सदा मानससुन्दरः।
नीरक्षीरविवेकी च
व्योमयानक्षमः प्रियः॥

चालने मधुरपादलसन्तम्
रागचञ्चुपुटदीप्तिरटन्तम्।
पूर्णिमालसितचन्द्रसमानम्
ब्रह्मवाहनममुं कथयामि॥

## ८१. शुकः पीतहरितरक्तवर्णसुन्दरः।

शुकः सरस्वत्याः हस्ते विराजते। सः मन्मथवाहनः भाति। अयम् अस्पष्टवर्णैः शब्दानुच्चरति। अयं फलरसास्वादी। अस्य चञ्चुः रक्ता। पक्षौ हरितौ किञ्चित् पीतवर्णछायाभिश्रितौ भवतः। एषः 'विठ्ठु राम' इति भणति। अयं सर्वथा सुन्दरः मनोहरश्च। तस्मादेव प्रजाः तं पञ्जरे बध्नन्ति। अग्निहोत्रस्य शापकारणात् शुकानाम् अस्पष्टोच्चारणं बभूवेति पुराणकथनं वर्तते। अस्य नाम्ना संगीते कीरवाणीति रागः संगीतज्ञैः गीयते। अयं पञ्चशरस्य वाहनम्। एषः सरस्वतीहस्ते विराजते।

अस्पष्टवर्णैः सानन्दम्
भणते भावसुन्दरम्।
शुकोऽयं भारतीहस्ते
राजते कामवाहनः॥

## ८२. पिकः स्वरमाधुर्यसुन्दरः।

पञ्चमस्वरोत्पत्तिः पिकात् जाता इति स्वरमर्मज्ञानां कल्पनाऽस्ति।

पञ्चमं कूजति पिकः। अयं मन्मथसहायकः। अयं कलकण्ठः जगति जेगीयते। अयं वसन्ते मधुरं कूजति। असौ कूजनसुन्दरः।

वसन्ततौं पिकः साधु
पञ्चमं कूजति प्रियम्।
सौन्दर्यकूजनेनैव
ज्ञायते भुवि मानुषैः॥

## ८३. अव्यक्तभाषणस्वरसुन्दरा सारिका।

सारिकेयं विप्रयोगे स्त्रीणामत्यन्तं सहायभूता भवति भाषणे इति कविसमयः। इयमव्यक्तभाषणस्वरसुन्दराऽस्ति। विरहेषु कालयापनार्थं विरहवेदनाजनितव्यथां स्पष्टीकर्तुं युवतीनां सहायकारिणी भवति।

सारिका शुकवद्रम्यं
भाषतेऽस्पष्टकूजनैः।
स्त्रीणां सहायभूताऽस्ति
विप्रलम्भे च भाषणे॥

## ८४. क्रौञ्चः मध्यमस्वरक्वणनसुन्दरः।

क्रौञ्चः प्रतिक्षणं सुरतकर्मणि संसक्तः भवतीति कविश्रुतिः। सुरतकर्मणि संलग्नं क्रौञ्चं व्याधः बाणेन जघान। तस्मात् विप्रलम्भादेव विप्रलम्भशृङ्गारकाव्यं जज्ञे। क्रौञ्चः मध्यमस्वरं क्वणति। अस्मादेव मध्यमस्वरोत्पत्तिः संगीते जाता इति गायकसमयः।

क्रौञ्चो रामायणस्रष्टा
मध्यमस्वरदायकः।
निमेषे सुरते लग्नः
शृङ्गाररसनिर्भरः॥

## ८५. मेघमण्डलपर्यन्तमुड्डयनसुन्दरः गरुडः।

अयं विष्णोः वाहनम्। महोन्नताकाशे डयते सवेगम्। सः अमृतं स्वर्गात् भूमण्डलमानयत्। सः पन्नगाशनः। सः सुन्दरः साहसी च। सः वेगवान् पक्षी।

**सुवर्णपक्षाचित्राङ्गः**
**पन्नगाशनतत्परः ।**
**विष्णोर्वाहनभूतश्च**
**घनान्तोड्डयने चणः ॥**

अयमुड्डयनसुन्दरः पक्षी । अयं शुभसूचकः । अयं खगराजः ।

### ८६. कुकुटः ह्रस्वदीर्घप्लुतरावकालसुन्दरः ।

एषः कुक्कुटः शाकम्भरीदेवतावाहनः । अयं कालज्ञापकः । मयूरवत् चित्रिताङ्गः सुन्दरः । अयं ह्रस्वदीर्घप्लुतरावसमञ्चितः सुन्दरपक्षी ।

**शाकम्भरीवाहनोऽयं**
**प्रभाते कालमापकः ।**
**को क्रो क्रो इति रावैश्च**
**घटिकायन्त्रकोपमः ॥**

### ८७. कलरवसुन्दरः पारावतः ।

अयं शान्तिरूपः । अयं संकेतज्ञः । एषः इन्द्ररूपी । पारावतः प्रतिक्षणं सुरतप्रियः । अयं संदेशहारी पक्षी ।

**पारावतः प्रियो लोके**
**सततं शान्तिदायकः ।**
**संकेतज्ञः स्वयं पत्रं**
**नीत्वाऽन्येभ्यः प्रयच्छति ॥**

अयं विश्वासपात्रं सुन्दरवार्ताहरः जगति ।

अथ केषांचन जलचराणां सौन्दर्यं प्रदर्श्यते ।

### ८८. स्वरूपाकृतिसुन्दरः मत्स्यः ।

मत्स्यः सुन्दराङ्गः शोभते । अयं सुन्दरयुवतीनयनाभ्याम् उपमितः भवति । अवतारेषु प्रथमोऽवतारः । एषः सुन्दरः इति मन्मथः स्वीयरथकेतने मीनं निचिक्षिपे । ततः अस्य मन्मथस्य मीनकेतनः इति नामान्तरं विद्यते ।

**अवतारेषु सर्वेषु**
**प्रसिद्धः प्रथमो भुवि ।**

सोमकासुरहन्ता च
सुन्दरो विष्णुरूपकः ॥

अपि च ।

मीनः सुन्दररूपोऽयं
स्वभावे शान्तभासितः ।
मारः तस्मात् गृहीत्वैनं
प्रथितो मीनकेतनः ॥

स्त्रियः स्वीयालंकारेषु पुरुषाणां कामं वर्धयितुं स्त्रीसौन्दर्यं सुभासितं कर्तुं च स्वकपोलभागेषु मीनचिह्नानि विलिखन्ति । इयं प्रथा काव्यनायिकासु प्रथिताऽस्ति ।

## ८९. सुन्दरदेवतासाहचर्यात् मकरः सुन्दरः ।

मन्मथः मकरध्वजः अस्ति । मकरः वरुणस्य वाहनम् । अस्याकारस्य सुन्दरत्वात् मन्मथः स्वीयध्वजे तं निक्षिप्य मकरध्वजः इति नाम्ना प्रथितयशाः बभूव ।

काश्चन युवत्यः स्वीयमुकुरकपोलेषु मकराकृतीनि पत्राणि विलिखन्ति कामं वर्धयितुं पुरुषाणाम् ।

मकरः सुन्दरो नैव
प्रकृत्या भ्राजते वरः ।
जातो मकरसंबन्धात्
मन्मथो मकरध्वजः ॥

## ९०. भारवहनक्षमसुन्दरः कूर्मः ।

अयमवतारेषु द्वितीयः । अयं सुन्दरः नहि । किन्तु गम्भीरे जले स्थातुं समर्थः । ततः समुद्रमथनवेलायां स्वीयपृष्ठभागे मन्थानाचलस्य सर्वमपि भारं कूर्मः एव सेहे । अयं सहनशक्तिसमन्वितः सुन्दरः प्रतिभाति ।

अवतारेषु कूर्मस्तु
द्वितीयः प्रथितो भुवि ।
सत्यं सहनशीलोऽयं
यस्मात् सो मन्थितोदधिः ॥

### ९१. आदिशेषः सहस्रफणालिसुन्दरः ।

आदिशेषः सुन्दरः किन्तु विषपूरितः । तस्य भारवाहनशक्तिः सहनशीलता च वर्तेते ।

सः सर्वमपि धरातलं स्वीयसहस्रफणालिभिः वहति । सः विष्णोः तल्पः भाति । सः सर्वज्ञः अत्यन्तसुन्दरः ।

शेषः सुन्दरमूर्तिश्च
धरित्र्वीवहनक्षमः ।
विष्णुशय्या बभूवासौ
सर्वशास्त्रविशारदः ॥

अपि च ।

फणासहस्रैः भुवि सर्वभारं
वहन्नजस्रं यशसाऽदिशेषः ।
विराजते लोकहिताय सर्वं
शक्तिं प्रदायात्र परोपकारे ॥

इति श्री गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना, महाकविना पण्डित ओगेटि परिक्षित् शर्मणा विरचितायां सौन्दर्यमीमांसायां मनुष्येतरजङ्गमानां सौन्दर्यप्रकरणं समाप्तम् ॥

## ७. दिक्पालकादिदेवतानां सौन्दर्यप्रकरणम् ।

जगत्यस्मिन् सहृदयाः रसिकमानवाः सौन्दर्याभिलाषिणः प्रकृत्यां सर्वं सुन्दरं विलोक्य स्वीयभावनासौन्दर्येण द्रष्टुमशक्यवस्तुनः अपि रूपमेकं परिकल्प्य एकैकस्य विभागस्य पालकं संरक्षकं च कल्पनाप्रभावेन चैकैकं विधायानूह्यं सौन्दर्यं तेषु प्रकल्पयामासुः । अरसिकानामसहृदयानां कल्पनाशक्त्यभाववतां मानवानां सर्वाण्येतानि प्रकल्पितानि रूपाणि चित्राणि च नानुमेयानि भवन्ति यतः ते दृश्यमानेषु सौन्दर्येष्वपि असंलग्नमनस्काः भवन्ति । तस्मात् सौन्दर्यानुभूतिः सर्वेषां भवत्येव तारतम्येनाधिकानधिकरूपेण जगति । संपूर्णसौन्दर्यप्राप्तिः सर्वकालेषु सर्वावस्थासु कवीनां केवलमुत्कटतरा भवति । कवयः शब्दचित्ररङ्गभाव-

रसध्वन्यानन्दसौन्दर्यादीन् स्वीयकवितायां निक्षिपन्ति तथाऽन्यकलाकाराः निक्षेप्तुं शक्यं न भवति ।

अस्मत्पूर्वजाः सौन्दर्ये चेतनाचेतनेषु अनन्यसाधारणभावनाम् आत्मस्वरूपामपश्यन् । ततः चेतनाचेतनं सुन्दरासुन्दरं परमात्मस्वरूपं प्राप्य पवित्रसौन्दर्ये राजेते । इयं सृष्टिः दैवांशसंजातानां महापुरुषाणां सौन्दर्यशिल्परचनानिपुणानां न त्वाधुनिकधातुनिर्मितसौन्दर्यनिर्मातृणां भवति । ततः प्राचीनकलाकाराणां कवीनां सृष्टिः सर्वेषामनूह्या भवति । पूर्वजाः सौन्दर्यस्रष्टारः महानुभावाः । तेषां सृष्टयां बह्व्यः सुन्दरदेवताः सन्ति । तथापि कांश्चन देवता उद्दिश्य तेषां कुटुम्बं प्रति प्रीतिकरवस्तुततिमुद्दिश्य किञ्चित् विस्तारयेम ।

अष्टदिक्पालकानां कल्पना वेदेषु न संदृश्यते । केषांचन नामधेयानि देवतानामरूपैः दृश्यन्ते श्रूयन्ते च । ऋग्वेदे इन्द्रः अग्निः वरुणः ब्रह्मणस्पतिः मरुत् ईशानः इत्यादीनां नामानि मन्त्राश्च संश्रूयन्ते । अनन्तरं सौन्दर्यभावनया प्राशासनिककल्पनया एकैकदेवाय एकैकप्रशासनाधिकारं प्रदाय पूर्वजाः सर्वमपि वसुधातलम् अष्टदिक्पालकप्रशासितं नवग्रहसंरक्षितं च वर्णयामासुः । क्रमेणेन्द्राग्नियमनिऋतिवरुणवायुकुबेर-ईशानादीनां तेषां परिवारं राजयोगलक्षणं च तेषां इष्टनाट्यकलां संक्षिप्तरूपेण विवृणमः । एतेषां दिक्पालकानां सृष्टिः सकलदिगन्ताश्च विश्वक्सौन्दर्यसंविलसिताः भवन्ति । महानुभावानां कल्पनयाऽनया जगति मानवानां सौन्दर्यकल्पना संजाता । तस्मात् सर्वं जगत् सुन्दरं प्रतिभाति । 'आ सत्येन रजसा वर्तमानो निवेशयन् अमृतं मर्त्यं च । हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन् ।'

प्रपञ्चस्रष्टा सवितादेवः सर्वदा अम्बरतले विराजमानः स्वीयतेजसा देवान् अष्टदिक्पालकान् जगति प्राणिजालं भुवनानि च स्वीयतेजसा सुन्दरं अमृतत्वं च विधाय एते सर्वे ममांशसंभूताः दिक्पालकाः अष्टसु दिक्षु तैः निर्वर्तनीयं कुर्वन्ति वा न वा इति पश्यन् हिरण्मयेन रथेन याति ।

एते अष्टदिक्पालकाः सर्वमपि लौकिकव्यवहारं चक्षुभिः पश्यन्तः यथायोग्यं स्वीयानुष्ठेयं विदधति सूर्येण सार्धं एते सर्वे दिक्पालकाः अविरामं दिवारात्रं कर्म कुर्वन्ति । स्वीयकुम्टुबेन सार्धं लौकिकजीवनम् अनुभवन्ति । तत् कथं पश्यामः ।

## ९२. प्राग्दिशाधिपतिरिन्द्रः ।

सुराधिपतिः प्राक्दिशाधिपतिरिन्द्रः भवति । अस्य वाहनस्य नाम ऐरावतः । अस्यायुधः वज्रायुधः । अस्य नगरी अमरावती । इन्द्रस्य सहधर्मचारिणी शची सुन्दरी । इन्द्रस्याभीष्टनाट्यं ललितम् । सवनकर्मसु अस्मै आहुतिः प्रथमं दीयते । सुन्दरमूर्तिरयमिन्द्रः सर्वदा सुरसुन्दरीलसितनाट्यकलापेषु कालं यापयन् स्वीय-पूर्वदिशं सुन्दरं परिवर्तयति । अयं वेदे प्रतिपादितमहामूर्तिः । अयं सर्वशक्तिमान् देवः ।

ललितलसितनाट्यं पूर्वरङ्गे प्रवृत्तं
विशदविमलनेत्रैः नाल्पसंख्याप्रदीप्तैः ।
अनुदिनममरेन्द्रः पश्यतीह प्रहर्षं
सुरयुवतिविलासैः मञ्जुलं भावरम्यम् ॥

## ९३. आग्नेयाशाधिपतिरग्निः ।

सूर्यांशसमुद्भूतः अग्निः आग्नेयाधिपतिः अस्ति । अस्य वाहनं मेषः । तस्य निवासपत्तनं तेजोवती । तस्यायुधं शक्तिः । अस्य पत्नी स्वाहादेवी । तस्य प्रियं नाट्यं कलिङ्गः अस्ति । क्रतुषु चाध्वरेषु नाट्यमेतं कुर्वन्ति तस्य प्रीत्यै ।

अनल्पदीप्तिश्रियसप्तभानुः
कलिङ्गनाट्ये बहुसक्तचित्तः ।
आग्नेयभागे निवसन्नजस्रं
समस्तलोकं प्रभया प्रशास्ति ॥

एषः एकत्र स्थितोऽपि स्ववर्चसा देहिनां प्राणमाश्रितः मरणपर्यन्तं परिरक्षति । अयमस्य धर्मः । अयं भूतले सर्वोपयोगार्थं सूर्यप्रतीको भूत्वा आग्नेयदिग्विभागे वसति ।

## ९४. दक्षिणाशाऽधिपतिर्यमः ।

यमः दक्षिणदिशाऽधिपतिः । अयमेव जननमरणनियन्ता । अस्य वाहनं

महिषः। अयं निवसति संयमिन्यां नगर्याम्। तस्यायुधं दण्डः। तस्य पत्नी श्यामला देवी। अस्य देवस्य प्रीतिकरं नाटयं कर्तरीत्याख्यं भाति। यमं तोषयितुं कर्तरीत्याख्यं नाट्यं कलाराधकाः कुर्वन्ति।

**संयमिन्यां वसन् पत्न्या**
**कर्तरीनाटयलोलुपः।**
**रक्तेक्षणविशालाक्षः**
**शास्ति लोकं शमो विभुः।**

अयं यमराट् भूभारनियन्ता। धरित्रीं जननमरणादिभिः तुलादण्डसमानं तुलनात्मकदृष्ट्या परिरक्षति।

## ९५. नैर्ऋतिदिक्पतिः निर्ऋतिः।

नैर्ऋतिदिक्पतिः निर्ऋतिः। अस्य वाहनं नरः। अमुष्य निवासस्थानं कृष्णाङ्गना नाम नगरी। तस्यायुधं कुन्तः। एतस्य पत्न्याः नाम दीर्घा देवी। अस्मै रोचते विधृतं नाम नाट्यम्।

**कृष्णाङ्गनानगर्यां तु**
**दीर्घादेव्या समाहितः।**
**नाटयं पश्यति पर्याप्तं**
**विधृतं निर्ऋतिप्रभुः॥**

अयं स्वीयनगर्यां विधृतं नाम नाटयं दिदृक्षुः कृष्णाङ्गनायां नाम नगर्यां दीर्घदेव्या सहितः समाविष्टः इति चमत्कारभावनाजन्यसुन्दरानुमेयः भवति।

## ९६. पश्चिमाशाधिपतिः वरुणः।

'इमं मे वरुण श्रुधी हवमद्या च मृडय। तामवस्युराचके। तत्त्वा यामि ब्रह्मणा वन्दमानः तदाशास्ते यजमानो हविर्भिः।' इति वेदमन्त्रः विद्यते। अयं जलाधिपतिः। एषः पश्चिमाशामलङ्कृत्य धर्माधर्मं पश्यति। अस्य वाहनं मकरः। अस्य निवासपत्तनं श्रद्धावती। एतस्यायुधं पाशः। अमुष्य पत्नी कालिकादेवी। अस्मै रोचते उत्सङ्गो नाम नाट्यविशेषः।

पश्चिमाशापतिर्नित्यं
श्रद्धावत्यां मुहुर्मुहुः ।
कालिकाम्बासमेतश्च
वरुणोत्सङ्गमीक्षते ॥

अयं वेदोक्तदेवः । किन्तु पौराणिकभावनया भात्ययं पश्चिमाशाधिपतिः ।

## ९७. वायव्याशाधिपतिः वायुः ।

एषोऽपि वेदोक्तदेवः । किन्तु दिक्पतिरूपे भावनया प्रतिष्ठापितः वायव्याशायाम् । एतस्य वाहनं हरिणः । अस्य निवासपत्तनं गन्धवती । एतस्यायुधं ध्वजः । एतस्य सहधर्मचारिणी अञ्जनादेवी । तस्य प्रीतिकरं नृत्यं सुव्यापकम् ।

अञ्जनासहितो वायुः
वायव्यां दिशि संस्थितः ।
नृत्यं सुव्यापकं नाम
पश्यतीहापरिप्लुतः ।

अयं हरिणवाहनमारुह्य लोकसंचारेण सर्वप्राणिभ्यः प्राणवायुं प्रददाति । एषः गन्धवत्यां निवसन् सुव्यापकं नृत्यं पश्यन्नास्ते । एषु दिक्पालकेषु सर्वत्र कल्पनासौन्दर्यं संदृश्यते ।

## ९८. उत्तराशाधिपतिः कुबेरः ।

कुबेरः धनाधिपः उत्तराशाधिपतिः । तस्य वाहनम् अश्वः । तस्य नगरी अलकापुरी । तस्यायुधं खड्गः । एतस्य सहधर्मचारिणी चित्ररेखादेवी । अस्य प्रीतिकरं नृत्यं संकीर्णम् ।

चित्ररेखासमाश्लिष्टः
नृत्यं संकीर्णनामकम् ।
अजस्रमलकापुर्यां
कुबेरः पश्यति प्रियम् ॥

अयं धनाधिपतिः कुबेरः सर्वदा उत्तराशामुपविश्य सानन्दं चतुरं मुहुर्मुहुः संकीर्णं नृत्यं पश्यति । अलकापुरी सुन्दरनगरीति रसिकानामूहः ।

## ९९. ईशान्याशाधिपतिः ईशानः ।

ईशानस्य वाहनः वृषभः । एतस्य निवासनगरी यशोवती । एतस्यायुधं त्रिशूलः । अस्य सहधर्मचारिणी सर्वमङ्गला पार्वती । अस्यै रोचते दण्डपादो नाम नाट्यम् ।

ईशानो वृषभारूढः
पार्वत्या प्रेक्षते भृशम् ।
दण्डपादं बृहन्नृत्यं
ईशान्यां फाललोचनः ॥

स्वयं पार्वतीपरमेश्वरौ नृत्तविद्याविशारदौ प्रपञ्चमातापितरौ भवतः । तथापि उभावप्येतौ दण्डपादं नाम नृत्यं द्रष्टुं समुत्सुकौ भूत्वा यशोवत्याम् उपविष्टावास्ताम् ।

दिक्पालकादि देवतानामित्यत्र आदिशब्देन असंख्याकदेवसमुदायः समागमिष्यति । किन्तु अत्र न तथा भवति । केवलं निर्दिष्ट देवतादीनाम् अर्थात् कामरतिलक्ष्मीसरस्वत्यादीनां सौदर्यं प्रपञ्चयेयम् । कल्पनामूर्तिषु मदनः अत्यन्तसुन्दरमूर्तिः प्राणिप्रजननहेतुश्च भवति । विना चैनं जगत्सृष्टिश्च न भवतः । ततः प्रथमतः तं कामदेवं तस्य पत्नीं रतिं विवृणमः ।

## १०० सौन्दर्यजगत्यनवरतविहारशीलो मदनः ।

मदनः अत्यन्तसुन्दरः । तस्य नाम भावजः । सः सौन्दर्यमूर्तिदर्शनेन सरसः भवति । सः सर्वान्तर्यामी लोके जीवनं कामस्यादानप्रदानेन भवति । तद्यथा । सर्वमपि जगत् कामेन केवलं जायते म्रियते च ।

कामस्तु लोके खलु सौख्यदाता
प्रतिग्रहीता च तथा प्रदाता ।
अभावकामो न हि सौख्यभाजी
चराचरं कामगुणाभिसक्तम् ॥

सर्वाश्च यत्नाः प्रभवन्ति लोके
निरन्तरं कामविलासभावैः ।
कामो यदि स्यान्नहि भूतलेऽस्मिन्
नास्त्येव सत्यं भुवि रम्यसृष्टिः ॥

कामस्य पत्नी रतिः वर्तते । सा कामानुसारं रम्यसृष्टिं विलोक्य तस्याः अनुभवेन मूर्तीभूता सौन्दर्यराशिः इव भासते । रतिसौन्दर्यं सर्वैरपि जगति नानुमीयते । केचन रत्या रञ्जिताः तस्याः सौन्दर्यं जानन्ति न त्वन्ये । रतिसौन्दर्यं यथा ।

## १०१. सर्व सुखविलासलसिता रतिः ।

कामस्य भावनातता
मधुविश्वेविसारिणी ।
रतिः संगमदत्ताङ्गी
राजतेन्द्रियसुन्दरी ॥

सुरतमज्जितवेलायां
कामापीडितसुन्दरी ।
तनोति देहसौन्दर्यं
लीलामाधुर्यमण्डिता ॥

## १०२. आपः इव सरसाः अप्सरसः ।

अप्सरसां सौन्दर्यं शुष्कवृक्षमपि पल्लवितं करिष्यति । नपुंसकमपि यथाभावासक्तचित्तं विधास्यति । तासां नामस्मरणेन सौन्दर्यानुमानेन च शरीरं पुलकाञ्चितं भवति । अधुना ताः व्याख्यास्यामः ।

आपः इव सरसाः अप्सरसः अप्सुरस्यन्ते इति अप्सरसः । ताः सर्वदा आपः इव सरसाः अपि चाप्सु केवलं खेलन्ति इत्यस्मात् हेतोः अप्सरसः । तासां नामधेयानि तासां व्युत्पत्त्यर्थाश्चाधो वक्ष्यमाणप्रकारेण सन्ति ।

घृताची मेनका रम्भा
चोर्वशीच तिलोत्तमा ।
सुकेशी मञ्जुघोषाद्याः
कथ्यन्तेऽप्सरसो बुधैः ॥

( १ ) घृताची नाम घृतवत् स्निग्धशरीरकान्तिच्छटापरिव्याप्ताङ्गी घृताची अर्थात् अत्यन्तलावण्योपेतसुन्दरसर्वाङ्गशोभिनीत्यर्थः ।

( २ ) मेनका इत्यस्य स्वीयसौन्दर्येण सर्वेषां माननीया जाता इत्यस्मात् हेतोः मेनका जाता ।

( ३ ) रम्भासमानोरुभासिता समागमाह्लादप्रदायिनीति हेतोः कृत्वा रम्भा बभूव ।

( ४ ) विष्णोः ऊरुसंजाता इति हेतोः कृत्वा ऊर्वशी नामाञ्चिता बभूव ।

( ५ ) तिलवत् अर्थात् तैलवत् स्निग्धत्वेन परिसृताङ्गी तिलोत्तमा ।

( ६ ) सुन्दरकेशपाशलसिता इति हेतोः कृत्वा सुकेशी जाता ।

( ७ ) रत्यां मञ्जुघोषापूर्णं मणितं विधाय रसिकं परमानन्दभरितं करोतीति हेतोः मञ्जुघोषेति नाम बभूव ।

एताः सर्वाः सुन्दराः मनमोहनकारिण्यः सुन्दर्यः । अत्रास्मिन् संदर्भे सुन्दरशब्दस्य व्युत्पत्तिं व्याख्यास्यामः । जगति सुन्दरसृष्टिनिर्माणार्थं प्रक्रिया-कलापः बहुक्रियते । सौन्दर्याराधका एव सुन्दरसृष्टिरहस्यं ज्ञास्यन्ति न त्वन्ये ।

दरविकसितसुमं प्रकृत्यां यत् आनन्दानुभूतिं रसिकप्रेक्षकेभ्यः प्रददाति तथैव दरविकसितशरीरम् ईषत्विकसितयौवनम्, अर्थात् त्रयोदशवर्षीयाणां शरीरयौवनं वर्णनातीतानन्दम् अनुभवैकवेद्यानन्दं प्रयच्छतीति हेतोः सुन्दरशब्दस्य निर्माणं बभूव । तस्य भावः एव सौन्दर्यम् । अनन्तरं यथासंदर्भानुसारं सुन्दरशब्दस्यार्थाः संजाताः । पञ्चेन्द्रियानुभूतिप्रकारं प्रेक्षणसुन्दरं श्रवणसुन्दरं आघ्राणसुन्दरं स्वादुसुन्दरं स्पर्शसुन्दरं अपि च बुद्धिसुन्दरं मननसुन्दरं भावसुन्दरं आत्मसुन्दर-मिति । तस्मात् सुन्दरं सापेक्षपदं यथासंदर्भं सौन्दर्यगुणतत्त्वार्थं प्रतिपादयामः ।

मनने दर्शने यत्र
नावीन्यं तनुते श्रियम् ।
पठने नैकवारं यत्
सुन्दरं कथ्यते हि तत् ॥

दरविकसितसुमं यत् दर्शनीयं शोभाविशेषं ददाति तथैव रम्यवस्तूनि आनन्दं च ददति । सून + दर = सूनदर इत्युच्चारणे कालक्रमेण सुन्दरमिति ।

नो चेत् सुम + दर = सुमदर, मकारस्यानुस्वारः । सुंदरम् जातम् । इति सौन्दर्यमीमांसकानां शब्दोत्पत्तिविचारः ।

सुमदरविकसितयौवनहावः
जनयति रसिकमनसि मञ्जुलभावम् ।
मधुपदसुमदरयुगलात् खलु जातः
जगति जनगणभणनसुन्दरशब्दः ॥

सौन्दर्यदृष्टिसंस्थितरङ्गविशेषैः वस्तुषु संस्थितरङ्गविशेषैश्च परस्पराकर्षण-कान्तिपुञ्जचयनेन संजायते । एकस्य सौन्दर्यम् अन्यस्यासौन्दर्यं भवति । ततः सौन्दर्यासौन्दर्यनिर्णयः व्यक्तिगतदृष्टिविशेषेण संजायते । सौन्दर्यासौन्दर्यनिर्णयः द्रष्टॄणां दृष्टिकिरणपुञ्जेषु विद्यमानरङ्गाणाम्, अपि च द्रष्टव्यानां शरीरकान्ति-अवयवसंस्फुरच्छायापुञ्जैः विद्यमानरङ्गाणां यदि योग्ययुतिः भवेत् तर्हि द्रष्टव्यस्य वस्तुनः सौन्दर्यं दृष्टिरूपेण मनःपटे प्रविश्य भावनया संचित्रिता सौन्दर्यं वा असौन्दर्यं वा यथा दृष्टिवस्तुसंगमानुसारं भवति । तस्मात् यथा दृष्टिः तथा सौन्दर्यम् । ततः एवम् उच्यते ।

यथा दृष्टिः तथा भावः
यथा भावः तथा गतिः ।
गतिर्यथा च संपर्के
सौन्दर्यं जायते तथा ॥

एतादृशरङ्गकिरणरञ्जनया युत्या मनसि रागः भवति । ततः रागात् सौन्दर्यं प्रतिभाति । सौदर्यं द्विप्रकारकं भवति । यथा च वेदान्तिनां मते आत्मा परमात्मा इति द्वौ प्रकारौ स्तः, तथैव सौन्दर्यकाङ्क्षिणां मतेऽपि सौन्दर्यं भौतिकमिति दिव्यमिति च द्विप्रकारकं वर्तते । दिव्यसौन्दर्यं तेजोमयं परब्रह्मस्वरूपं च भवति । यथा च भौतिकशरीरनाशात् शरीरान्तर्गतात्मा परमात्मनि सायुज्यं प्राप्नोति तद्वत् भौतिकसौन्दर्यं शरीरनाशात् सर्वव्याप्ते दिव्यसौन्दर्ये सायुज्यं प्राप्नोति । यथाऽनन्ताकाशात् घटपटाकाशाः जाताः तेषाम् अस्तित्वनाशेषु चान्ततः ते अनन्ताकाशे मिलिताः भवन्ति तद्वत् दिव्यसौन्दर्यभूतसंध्यासौन्दर्यात् समुत्पन्नं

सर्वजगत्सौन्दर्यं चान्ते दिव्यसौन्दर्ये विलीनं भवति। तस्मात् कारणात् सौन्दर्यं सर्वमपि सूर्यान्तस्थायाः तमसः परस्तात् विद्यमानायाः सन्ध्यायाः एव भवति।

तेजसा सुन्दरी सन्ध्या
सर्वलोकप्रकाशिका।
धरित्रीवलयं सर्वं
शास्ति सर्वाङ्गसुन्दरम्॥

## १०३. सूर्या हिरण्मयी लक्ष्मीः।

सौरमहसा हिरण्मयी लक्ष्मीः जाता। एषा स्थावरजङ्गमादिषु चेतनाचेतनेषु नरीनर्ति पवित्रतेजसा। लक्ष्मीच्छायापरिसृतः प्राणी सर्वदा शोभते। तस्मात् सर्वोऽपि लक्ष्म्याः अनुग्रहसम्पादनार्थं प्रयतते। लक्ष्मीशब्दस्यार्थः कान्तिविशेषः इति भवति। किन्तु रूढ्यर्थः धनविशेषः इति। यस्य कान्तिविशेषः वर्तते सः लक्ष्मीवान् शुभलक्षणः भवति। यस्य कान्तिविशेषो नास्ति केवलम् अर्थः एव अस्ति सः सन्तोषेण जीवति कान्तिमान् च भवति। ततः लक्ष्मीशब्दः न केवलं धनविषयकः किन्तु अन्यगुणसंपत्तिविषयकः शुभलक्षणयुतः। एषा लक्ष्मीः धनरूपेण वा भवतु, नो चेत् शोभारूपेण वा भवतु सर्वदा शोभावती भाति। सा प्राणिनं श्रीमन्तं करोति। एषा भगवतः सूर्यनारायणस्य पत्नी हिरण्मयी। ततः लक्ष्मीसूर्यनारायणौ जगत्सर्वं पालयतः शोभायुतं पावनं च कुरुतः। एषा लक्ष्मीः प्रभाते अरुणकिरणसंपर्कसंजातश्रिया शोभते पद्मेषु। तस्मात् कारणात् एषा पद्मालया इत्याहूयते। कवीनाम् ऊहानुसारं सुन्दरभावनानुसारं एषा दिव्याकृतिस्वरूपिणी विराजते। अस्याः करुणाकटाक्षवीक्षणेन मानवः सुखेन संसारसागरं तरिष्यति। लक्ष्मीः सौन्दर्यस्थानमावहति लोके। तद्यथा।

नित्यं लक्ष्मीः लसति मधुरं सूर्यशोभाप्रसूता
विश्वे चास्मिन् जलजनिचये भूरुहेषु प्रभासा।
नानालक्ष्मीं भवति कठिना मानवानां च यात्रा
तस्मान्नित्यं सुखदसुषमामूलभूता हि विष्णोः॥

## १०४. ब्रह्मणः पत्नी सरस्वती ।

"असावादित्यो ब्रह्म" इत्युक्तत्वात् सूर्यः एव ब्रह्म । अमुष्य पत्नी सरस्वती । एषा विद्यारूपेण ज्ञानरूपेण संस्थिता । सरस्वती लक्ष्मीवत् बहिः-प्रकाशिनी न भवति ।

एषा ज्ञानरूपेण सर्वदा मनोबुद्धिहृदयेषु अन्तर्वाहिनी निःसरति । सरस्वती अत्यन्तशोभावती श्रीयुता च । सरस्वत्या समाश्रितः प्राणी परमशोभावान् भवति । सरस्वत्या समलङ्कृतः प्राणी सर्वपथगामी भवितुमर्हति । सरस्वतीसुन्दरः प्राणी सर्वसमादरणीयो भवति । अनेन हेतुना सरस्वतीमावाहयामीति संध्यावन्दन-मन्त्रेषु संध्याऽऽराधकाः कथयन्ति । सरस्वती नाम सन्ध्यासमये सूर्ये सरस्वती-रूपेण संस्थितसन्ध्यादेवता इत्यर्थः । एषा अत्यन्त रसशालिनी लसति । रसवती वर्णव्यत्ययेन वर्णागमेन च सरस्वती बभूव ।

सरस्वतीसमाश्लिष्ट-
सूर्यबिम्बं महौजसा ।
ज्ञानलक्ष्मीं ददातीह
प्राणिनां श्रेयसे सदा ॥

एषाऽतीव सुन्दरीति कवीनां कल्पना । एतादृशी भावना सर्वेषामनुभवे नास्ति किन्तु स्वानुभवैकवेद्या भवेद्यदि मनसि सर्वमपि रससौन्दर्यमेव प्रवहिष्यति ।

संगीतसाहित्यकलाधिदेवी
रसाश्रिता प्राप्य सरस्वतीत्वम् ।
ददाति सौन्दर्यरसार्णवं तु
प्रजाहितायेति मदीयतर्कः ॥

लक्ष्मीसरस्वत्यौ सूर्यस्य सुषमे भवतः । किन्तु भावुकाः चित्रकाराश्च भावनया रङ्गाभ्यां सुन्दरचित्रं परिकल्प्य ताभ्यां सुन्दरमूर्तित्वं प्रायच्छन् पूर्वसूरिणः ।

एते द्वे भुवनं सर्वं
पालयन्त्यौ महौजसा ।
नित्यसुन्दरपूर्णं च
भ्राजेताममरश्रिया ॥

१०५. ब्रह्मारुद्रविष्णुसमुपासिता सन्ध्या ।

गभस्तिमण्डले ब्राह्ममुहूर्तादारभ्य मध्याह्नकालपर्यन्तं हंसवाहनरूपतेजःपुञ्जे समुपाविष्टः ब्रह्मा गायत्रीरूपसन्ध्यादेवतां समुपासतेति अर्थात् मध्याह्नकालपर्यन्तं ब्रह्मेति नाम्ना सूर्यः लोकं पावयतीति, अपि च सुन्दररूपे परिवर्तयतीति । तस्मादेवासौ सूर्यः ब्रह्मेति मन्त्रानानामभिप्रायः ।

ब्रह्मारुद्ररमाधिपादिविबुधैर्नित्यं समाराधिता
सन्ध्याऽऽदित्यहृदन्तरालवसिनी सर्वं जगत् सुन्दरम् ।
कुर्वन्ती भुवि वाडवादिविबुधश्रेण्युक्तमन्त्रादिभिः
सत्यं दीपितदीप्तिदीधितिरियं भाभाति च श्रेयसे ॥

१०६. प्रातः विभाति हंसवाहने ब्रह्मस्वरूपोऽयं सूर्यः ।

ब्राह्मे मुहूर्ते ब्रह्माऽसौ
हंसरूपं समाश्रितः ।
संध्यावाहनरूपेण
मित्रेऽस्मिन् परितिष्ठति ॥
ब्रह्मरूपं समापन्ना
गायत्री नाम सुन्दरी ।
प्रभातसन्ध्यासौन्दर्यं
व्याकिरन्तीव राजते ॥

प्रातः सन्ध्याप्रभासितादित्यः ब्रह्मेति जेगीयते वैदिकैः ।

मध्याह्ने यदा सूर्यः अम्बरमध्यगः भवति तदा वृषभरूपतेजःपुञ्जे समुपाविष्टः रुद्रः सावित्रीरूपसन्ध्यादेवतां समुपासतेति, अर्थात् सायंकालपर्यन्तं रुद्रनाम्ना सूर्यः लोकं तप्तकाञ्चनसंनिभकान्त्या सुन्दररूपे परिवर्तयतीति । तस्मादेवासौ आदित्यः रुद्रः इति सूर्योपासकानां मतम् ।

१०७. असावादित्यो मध्याह्ने रुद्रः ।

रुद्रो मध्याह्नसन्ध्यायां
सूर्यं प्राप्य विराजते ।

वृषभाधिष्ठितः कामं
सावित्रीरश्मिवेल्लितम् ॥

तस्मात् सूर्यस्य मध्याह्ने
रुद्रनामसमागतः ।
यस्माच्च रुद्रो रौद्रेण
प्रचण्डो भ्राजते सदा ॥

मध्याह्नसन्ध्याप्रभाभासितादित्यः रुद्रः इति वैदिकदेवोपासकानां सिद्धान्तः ।

## १०८. सायंसन्ध्यासमये तरणिर्विष्णुः ।

सायंकाले त्रयीतनौ पश्चिमाशां चुम्बति सति विष्णुः गरुडरूपतेजःपुञ्जे समुपाविष्टः सरस्वतीरूपसंध्यादेवतां समुपासमानः लोकं प्रशान्तवातावरणे शान्तं सुन्दरं परिवर्तयतीति तस्मादेवासौ सूर्यः शान्ताकारः विष्णुः इति सन्ध्यावन्दन-तत्त्ववेदिनां सिद्धान्तः ।

सायं सूर्यस्य बिम्बे तु
विनतासुतवाहनः ।
सन्ध्यावन्दनमाकुर्वन्
सरस्वत्या विराजते ॥

विष्वक्किरणसंघातैः
विष्णुरित्यभिधीयते ।
शान्ताकृतिमवाप्यासौ
शेते पश्चिमवार्निधौ ॥

सर्वमिदं भुवनत्रयं एकरूपे संस्थितत्रिमूर्तिभिः त्रिकालेषु सुन्दरे वातावरणे सुन्दरं भवतीति पञ्चमहाभूततन्तुसमुदाये त्रिमूर्तयः तन्तुवायाः इव सन्ध्याप्रसारित सूर्यकिरणप्रसारणैः तेषां संचारप्रभावप्रचारवयनैः सुन्दरं जगत्पटं चित्रविचित्रं दिवारात्रम् अनादिरहितं निर्मान्तीति दिनकरमध्यगा सन्ध्या केवलं ब्रह्मारुद्रविष्णु-देवानां समुपासनया तृप्ता, तत् मूर्तित्रयं सूर्यमण्डले विभिन्नदशासु निक्षिप्य लोक-सौन्दर्यनिर्माणार्थं त्रिकालेषु तान् शास्तीति सौन्दर्यमीमांसकानां निष्कर्षः ।

सन्ध्या चैषा जगत्श्रेयसे सत्यं विभाति सुन्दरोत्पत्तिं करोति ।

## १०९. पञ्चमुखभासुरा गायत्री ।

ब्राह्ममुहूर्तादारभ्य दिनकरास्तपर्यन्तं सन्ध्यादेव्याः मुखानि पञ्चरङ्गप्रभाभासुराणि भवन्ति । एकैकस्मिन् कालावधौ एकैकेन मुखेन सा प्रपञ्चं रञ्जयति अनिर्वचनीयप्रभया शास्ति ।

पञ्चरङ्गसमाकीर्णा
पञ्चास्या भावभासिता ।
समस्तधरणीचक्रं
प्रचालयति तेजसा ॥

सन्ध्यायाः मुखरूपाणि वक्ष्यमाणप्रकारेण रङ्गेषु विराजन्ते । तस्या मुखनामानि ।

( १ ) प्रातःसन्ध्यामुखम् ( २ ) पूर्वाह्णसन्ध्यामुखम् ( ३ ) मध्याह्नसन्ध्यामुखम् ( ४ ) अपराह्णसन्ध्यामुखम् ( ५ ) सायंसन्ध्यामुखम् इति ।

## ११०. प्रातः मुक्ताफलच्छायारूपं गायत्रीसन्ध्यामुखम् ।

एषा त्रिलोकजननी प्रातः मुक्ताफलवर्णसदृशमुखेन विराजयन्ती प्रकृतिं विशदयति नैकरङ्गैः ।

मुक्ताफलाभस्वच्छास्या
विश्वविष्वक्प्रभान्विता ।
प्रशान्तरूपलावण्या
पुनाति धरणीं प्रिया ॥

## १११. पूर्वाह्णे विद्रुमारुणाच्छरूपं गायत्रीसन्ध्यामुखम् ।

गायत्रीसन्ध्या विद्रुमकान्तिपुञ्जपिञ्जरितास्या पूर्वाह्णे लोकं किञ्चित् अरुणारुणितं व्यदधाति ।

विद्रुमारुणशोभास्या
किञ्चित् रागत्वमाश्रिता ।
भ्राजते हरिदन्तेषु
कमेलादरसान्निभा ॥

## ११२. मध्याह्ने सुवर्णमुखी सावित्रीसन्ध्या ।

सावित्रीसन्ध्या मध्याह्ने खरकिरणतरणिप्रभाभासिताङ्गी हेममालिनी भूत्वा लोकं सुवर्णकान्तिच्छटाभासुरं कुर्वन्ती अनन्तागण्यकान्तिवैभवगर्वाभिव्याप्तप्रौढा विश्वजनैः संकीर्त्यते ।

मध्याह्ने प्रौढभावाप्ता
हेमवर्णनिभानना ।
सुवर्णं व्याकिरन्तीव
स्फुरते कामितानना ॥

## ११३. अपराह्णे चेन्द्रनीलास्या सावित्रीसन्ध्या ।

नीलास्या सावित्री नाम्नी सन्ध्या धरणीतलं स्वकीयाभया लिम्पतीवापराह्णे विलसति ।

अपराह्णे तु नीलास्या
नीलवर्णश्रियाऽवृता ।
नीलाभया परिव्याप्तं
करोति धरणीतलम् ॥

## ११४. दिनान्ते दुग्धवर्णास्या सरस्वतीसंध्या ।

दुग्धवर्णास्या सरस्वतीसंध्या स्वीयदुग्धवर्णप्रभया लोकं परिपुष्टं पुष्णातीव प्रेक्ष्यते जनैः ।

सायंकाले प्रिया शान्ता
क्षीरवत् धवलानना ।
व्यापयन्ती स्वकीयाभां
चित्रितं कुरुते महीम् ॥

एवं पञ्चमुखसुन्दरा गायत्री स्वीयप्रभाप्रतिभासौन्दर्यैः सकलां धरित्रीं विविधवर्णचित्रितां विचित्ररङ्गरञ्जितां चैतन्यवतीं करोति । तस्मात् जगत्-सौन्दर्यं सूर्यसन्ध्यासंप्राणितं विवर्धितं पर्यवसितं च भवति । जगति चैतन्यकारक

सृष्टिस्थितिलयादिकारकः सर्वशक्तिमान् प्रत्यक्षदेवः मित्रः गभस्तिमानिति अस्मादृशानां सौन्दर्यं दैवतं मन्वानानां सिद्धान्तः ।

इति श्री गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना महाकविना पण्डित ओगेटि परीक्षित् शर्मणा विरचितायां सौन्दर्यमीमांसायां कामादीनामष्टदिक्पालकादि देवतानां सौन्दर्यप्रकरणं समाप्तम् ।

## ८. मानवसौन्दर्यप्रकरणम् ।

अस्मात् प्रकरणादारभ्य मानवसौन्दर्यं प्रति विवृणमः । प्रायेण जनाः सौन्दर्यमित्यस्य पदास्यार्थं केवलं मानवसौन्दर्यमिति प्रत्यक्षदृश्यमानसौन्दर्यमिति ज्ञाताज्ञातज्ञानेन कथयन्ति तत् असङ्गतमेव । तथा कथनं तेषाम् असंस्कृतभावनाविशेष एव । तदर्थमेव एषा सौन्दर्यमीमांसा जिज्ञासूनां सौन्दर्यपदस्यार्थं विशदयितुं प्रारब्धा । मानवस्यायुषि सौन्दर्यदर्शनं सौन्दर्यश्रवणं सौन्दर्यमननं सौन्दर्यचिन्तनं सौन्दर्यवसनम् इत्यादिकं प्रामुख्यं वहति अशनानन्तरम् । दैनंदिनकार्येषु सर्वोऽपि जन्तुः व्यापृतः भवति । सर्वे प्राणिनः सौन्दर्यानुमेयिनः न भवन्ति । केचन प्राणिनः संगीतश्रवणेन, अन्ये सत्काव्यपठनेन दर्शनेन, परे भोजनेन तृप्ताश्च भूत्वा आनन्दमनुभवन्ति । सामान्यतः साधारणदृष्ट्या जगति मानवः केवलं दृश्यसौन्दर्यं श्रवणसौदर्यं मननसौन्दर्यं भावसौन्दर्यं जगति परिदृश्यमानानि चान्यसौन्दर्याणि विलोक्य आनन्दीभवति । यथार्थकथने तु सर्वेषां सौन्दर्यपूर्णवस्तुप्राप्तिः न भवत्येव । सौन्दर्यं नानाप्रकारं वर्तते । सर्वे प्रकाराः सुन्दरात्मनाऽन्तर्लीनाः प्रकाशिताः भवन्ति । यदि सुन्दरात्मा न स्यात् तत् वस्तु अप्रकाशितं भवति । आत्मा सुन्दरस्वरूपः । आत्मना सर्वं सुन्दरं प्रभावपूर्णं संदृश्यते ।

### ११५. अथातः सौन्दर्यजिज्ञासा ।

अथ इत्यत्र दशवर्षेषु पदार्पणानन्तरमित्यर्थः । अतः इत्यत्र दशवर्षादारभ्य-इत्यर्थः । दशवर्षीयाः आरोग्यप्रफुल्लिताः अत्युत्साहिनः प्रकृत्यां सुन्दरवस्तुषु लग्नमनस्काः भवन्ति । यथा क्रमशः त्रयोदशवर्षीयाः भवन्ति ताः अथवा ते स्वीयशरीरावयवसौकुमार्ये संधिबन्धनादिषु द्योतमानं स्यन्दमानं स्निग्धसौन्दय

विलोक्य संमोहिताः भवन्ति। तथैव परेषां हावभावादिकं शरीरसंधिबन्धनादिषु प्रद्योतमानस्निग्धत्वं बारंबारं प्रविलोक्य कामपि अनिर्वचनीयतादात्म्यभावनां प्राप्नुवन्ति। तदा तदा आदर्शे स्वीयसौन्दर्यं विलोक्य कामपि अव्यक्तभाववेदनामनुभवन्ति। प्रत्येकवस्तुवृक्षलतादीन् स्पृशन्ति चुम्बन्ति च। मकलचेष्टादिकं अनधिगताव्यक्तरूपेषु प्रकटयन्ति। यं कंचन नवीनपुरुषं अथवा सुन्दरस्त्रियं पश्यन्ति विस्फारितलोचनारविन्दाः भवन्ति। जगति सामान्यतः दशवर्षादारभ्य अष्टादशवर्षपर्यन्तं सौन्दर्यदृष्टिः सौन्दर्यविषये भावना कल्पना च भवतः। एतानि अष्टवर्षाणि सौन्दर्यज्ञानदशावर्षाणि भवन्ति। तस्मात् एषु वर्षेषु कुमारकुमार्यः विभ्राजमानसौन्दर्यजगति स्त्रीपुरुषेषु संदृश्यमानशरीरकान्तिम् आसमन्तात् कोमलत्वं च विलोक्य मन्मथभावजाले पतिताः प्रकृतिसौन्दर्ये पञ्चेन्द्रियसौख्ये च संलग्नमनस्काः भूत्वा स्त्रीरसुन्दरभावनाप्रवाहं निर्मान्ति। तस्मात् त्रयोदशवर्षात् प्रभृति साधारणतः मानवेषु सौन्दर्यजिज्ञासा, सौन्दर्यं प्रति विचारधारा, सौन्दर्यदृष्कोणसमालोचनापद्धतिश्च संजायन्ते। तस्मात् प्रथमतः समक्षं परिदृश्यमानप्रकृतिसौन्दर्ये जातमानवानां प्रकृतिमाहात्म्यं प्रति जिज्ञासा सहजतया प्राथमिका भवति। तर्हि यदि प्रथमतः सौन्दर्यं प्रति ज्ञानं भवति कालक्रमेण अवस्थान्तरेण अन्यजिज्ञासाः सुलभमार्गेण ज्ञाताः भविष्यन्ति। अतः त्रयोदशवर्षादारभ्य अष्टादशवर्षपर्यन्तं यदि सौन्दर्यजिज्ञासा परिपूर्णतां याति अनन्तरं वेदान्तधर्मादीनां तत्त्वसौन्दर्यज्ञानं विदित्वा मानवः मोक्षपथं प्राप्स्यति। सर्वधर्माणां वेदान्तानां प्रथमसोपानमार्गभूतासौन्दर्यमीमांसा एव इत्यर्थः। भारतीयानां सर्वाः कलाः सर्वाः विद्याः अन्ततः परमात्मज्ञाने अन्तर्लीनाः भवन्ति। सैव भारतीयकलानां विद्यानां परमावधिः। ततः इयं सौन्दर्यमीमांसा अपि परमात्मस्वरूपसौन्दर्यदर्शने दर्शनं भविष्यतीति निःशङ्कं वक्ष्यामः। भौतिकसौन्दर्यं सर्वमपि तात्कालिकानन्दप्रदानयोग्यसौन्दर्यमेव। यदा भौतिकं प्रणश्यति तदा परिदृश्यमानं सौन्दर्यं अन्तर्हितं भवति। किन्तु आत्मसौन्दर्यम् उत अन्तःसौन्दर्यं तथ्यं जन्मनि जन्मनि अनुसरत्येव। तदेव पुण्यं, स एव ब्रह्मपदार्थः। अयमेव पदार्थः सन्ध्याप्राणितः भातीत्यस्मादृशानां ऊहः।

**११६. आकर्षणात्मकमाह्लादकारकमनिर्वचनीयमनुभवैकवेद्यमविरल-रसधारापरिप्लुतं परमात्मस्वरूपं सौन्दर्यम् ।**

१) आकर्षणात्मकं यथा ।

**प्रथमे दर्शनं यच्च**
**लोहोऽयस्कान्तवत् भृशम् ।**
**सततं चुम्बनासक्तं**
**परमाकर्षणात्मकम् ॥**

अकस्मात् प्रथमदर्शनेन यत् आकर्षणात्मकं भवति तदेव सौन्दर्यम् । तेन सौन्दर्येण चेतनाचेतनमपि प्रफुल्लितं भवति । तादृशाकर्षणात्मकव्यापारः लोहोऽयस्कान्ताकर्षणवत् विना पूर्वचिन्तनां यदि भवेत् तदेवाकर्षणात्मकमिति मतम् । तद्यथा मदीययशोधरामहाकाव्यात् समुद्धृतम् । यशोधरायाः दर्शनेन प्रकृतिः आकृष्टा कथं बभौ तत्पश्यामः ।

**अचेतनं तत्र तदीयचेतनैः**
**सचेतनं भाति नवोद्गमाङ्कुरैः**
**प्रसन्नलीलाऽदरचारुविभ्रमैः**
**विना च तां चेतनमेत्यचेतनम् ॥**

२) आह्लादकारकं यथा ।

**आह्लादकारकं येन**
**चेतनं रसनिर्भरम् ।**
**जायते तत् दिवारात्रं**
**सौन्दर्यमिति कथ्यते ॥**

प्रथमदर्शनेन मनसि संजातं रसनिस्तुलं यत् दिवारात्रं संतोषभरेण मनन-रूपं भजते तत् सौन्दर्यमिति कथ्यते ।

अन्यत् यथा ।

**यदा धरण्यां खलु यौवनश्रीः**
**प्रमोदभावप्रसृता विभाति ।**

दिवानिशं लोचनयोः समक्षं
निगद्यतेऽह्लादकमूलभूता ॥

आह्लादकमूलभूतमानवसौन्दर्यं मधुररसायनं भूत्वा गुळिकारूपेण गिळितं षाड्गुण्यं प्राप्य उत्साहशक्तिं प्रददाति ।

३) अनिर्वचनीयं यथा ।

मनसि सौन्दर्यदर्शनेन जनित आनन्दविशेषः सर्वाङ्गेषु प्रसरन् लसति । तथापि कोऽपि तमानन्दं मातुं न शक्नोति किं वक्तव्यं कथने ।

यच्चानिर्वचनीयं तु
शब्दाभावं विराजते ।
भाषते लसते सार्थं
तच्च सौन्दर्यमुच्यते ॥

यच्च शब्दानामभावात् अनिर्वचनीयं भवति, अपि च अनवरतं भाषते रहसि कर्णे, अपि च भ्राजते समक्षम् अर्थयुक्तं तत् सौन्दर्यमिति अनिर्वचनीयानन्दराशिः इति सौन्दर्यमीमांसकानां भावः ।

अन्यत् यथा ।

भ्राजते पुरतः पश्चात्
रसिकान् बाधतेऽनिशम् ।
लभ्यं चालभ्यमापन्नं
निरतं रसनिर्भरम् ॥

४) अनुभवैकवेद्यम् ।

रससौन्दर्यमाहात्म्यं
न कोऽपि कथयिष्यति ।
किन्तु सर्वोऽपि भुङ्क्ते च
यथाशक्ति महीतले ॥

रसस्यापि सौन्दर्यं विद्यतेति अनुभवैकवेदिनां सौन्दर्यमीमांसकानां मतम् । रससौन्दर्यस्य माहात्म्यम् इदमित्थमिति कृत्स्नेन सविस्तरं न कोऽपि विशदयितुं

पारयति। तथापि वसुधातले सर्वोऽपि तत् माहात्म्यम् अनुभवति यथामति यथाशक्ति यथाभावं च एतत् स्वीयानुभवैकवेद्यं भ्राजते। विविधव्यक्तीनाम् अभिप्रायाः सौन्दर्यमुद्दिश्य विविधाः भवन्ति। सौन्दर्यरसास्वादनविषये यथाभावं सर्वेषां सर्वासां भिन्नभावाः भवन्ति। कश्चन कथयति मित्रं प्रति स्वयं कृतं कर्म स्वयमनुभुक्तं दृश्यसौन्दर्यं च। यथा।

उपत्यका शीतनगस्य रम्या
काश्मीरदृश्यं बहुभावपूर्णम्।
सौन्दर्यमेकत्र परिस्रुतं तत्
नेतःपरं रे प्रभवामि वक्तुम्॥

इति स्वविलोकितसृष्टिसौन्दर्यं प्रति विवर्णयिषुः एतावन्मात्रं विलिख्य इतोऽधिकं कथयितुं न शक्नोमीति विरराम। न अनुभवैकवेद्यस्य कथने वर्णने च भावाविष्कारः अपर्याप्तः भवति। भावाः संचरन्ति, तस्मात् अनुभवैकवेद्यं व्यक्तेः मनसि, किन्तु ते वाङ्निचये न मान्ति। व्यक्तौ भिन्नरूपेण असंपूर्णं व्यक्तं भवति। अनुभवैकवेद्यभावाविष्करणे मनसि विद्यमानं सर्वं वयं प्रकटीकर्तुं न पारयामः। अनुभवैकवेद्यं कामिनीसुरतसौख्यसंजातरससौन्दर्यं वर्णयन् मित्रं प्रति पत्रप्रेषणेऽपि भावाविष्कारः अनभिव्यक्तः बभूव। तद्यथा–

तया सार्धं रतिक्रीडा
मल्लयुद्धस्वरूपिका।
बभौ कुट्टमिते सर्वं
सौन्दर्यं भुक्तमेव हि॥

एतस्मात् भिन्नं नाहं मदीयानुभवं वक्तुं समर्थः। सौन्दर्यसौख्यमनुभवैकवेद्यं भवति। मल्लयुद्धस्वरूपिका इत्यत्र चतुरशीतिबन्धनेषु परस्परम् आवां रससौन्दर्यमेवानुभवाव। अतः परम् अधिकं नाहं वक्ष्ये इत्यर्थः।

५) अविरलरसधारापरिप्लुतं यथा–

सौन्दर्यमेतत् अविच्छिन्नाच्छधारारूपं प्रवहति चेतनाऽचेतनेषु। एतत् सलिलवत् सलीलं वल्गुना वहति। शैशवे वात्सल्यपूर्णसौन्दर्यं यौवने अनुभवैकवेद्यम् आकर्षणात्मकं भूत्वा भिन्नं भवति। वार्धक्ये तदेव कलुषितं भूत्वा कान्तिविहीनं

भवति। एवं सौन्दर्यमपि दशान्तरं वस्त्वन्तरं प्राप्य पृथक् पृथक् रूपेण प्रकाशते। तस्य मूलस्वरूपं तेजोमयम्। तदेव भिन्नास्ववस्थासु भिन्नविभिन्नं भिन्नस्वरूपं प्रद्योतते।

**चपलारूपसंपन्नं**
**रसधारापरिप्लुतम्।**
**प्रकृत्यां यत्स्वयं भाति**
**तच्च सौन्दर्यमुच्यते॥**

विद्युत्संकाशं रूपमाप्त्वा रसधारारूपेण सुन्दराङ्गेषु (सुन्दरवस्तुषु) अन्तर्वाहिनी भूत्वा यत् नैगनिग्येन द्योतते अपि च कविहृदयेनानुमीयते तादृशरसस्वरूपं सौन्दर्यमिति प्रकृतिरहस्यवेदिनां मतम्। रसस्वरूपं अन्तर्बहिश्च व्याप्य विराजते।

परमात्मस्वरूपं यथा—

**निश्चलानन्दरूपेण**
**वसुधायामनारतम्।**
**भाति सौन्दर्यतेजस्तु**
**परमात्मस्वरूपवत्॥**

यथा परमात्मा सनातनः ब्रह्मानन्दस्वरूपेण भाति तद्वत् निश्चलानन्दस्वरूपं सौन्दर्यं ब्रह्मानन्दस्वरूपवत् विभाति। परमात्मसौन्दर्ययोः अविनाभावसंबन्धः विद्यते। परमात्मा सर्वव्यापी। सौन्दर्यमपि सर्वव्यापकं परमात्मस्वरूपम् इति सौन्दर्याभिलाषिणां मतम्।

एतादृशलक्षणोपेतं सौन्दर्यम् बाह्यसौन्दर्यम् आन्तरङ्गिकसौन्दर्यमिति च द्विविधं भवति। प्रथमतः अत्र बाह्यसौन्दर्यमुद्दिश्य प्रपञ्चयामः।

बाह्यसौन्दर्यं विशिष्टस्थानेषु स्थानान्तरेषु च आधाराधेयभावेन तरतमस्थानेषु न्यूनाधिक्यभावेन च पात्रानुसारं शरीरमनुसृत्य पूर्वजन्मकृतसंस्कारसुकृतपरिपाकदशया प्रद्योतते। यथा लोके धनं व्ययीकृत्य वस्तु क्रियते तद्वत् सौन्दर्यं क्रेतुम् अशक्यं भवति। अन्येषां वशीकरणेन उन्नतपदं प्राप्तुं शक्नोति नरः न किन्तु सौन्दर्ये उन्नतपदं प्राप्स्यति। सौन्दर्यं केवलं दैवदत्तं भवति। केचन लावण्ययुताः गौरवर्णीयाः अपि निस्तेजाः भावाभिव्यक्तमुखाः न भवन्ति। केचन

कालिमवर्णीयाः अपि सुन्दरावयवसंपृक्ताभिः शरीरयष्टिभिः अत्यन्ततेजोविराजिताः भावप्रकटनानुयोग्यमुखारविन्दाः भवन्ति । ततः सौन्दर्यं यदि सर्वास्ववस्थासु सर्वसन्निवेशेषु अन्तर्बहिश्च व्याप्य सर्वचलनेषु सर्वक्रियासु सुन्दरं द्योतते तदेव सौन्दर्यमिति रसाधीश्वराणां मतम् । सर्वव्यापिनमीश्वरं केचन सौन्दर्यमिति कथयन्ति । श्रीमदादिशङ्करभगवत्पूज्यपादानां सौन्दर्यलहरी मूर्तीभूतसौन्दर्यसुषमा भवति । तेषां महानुभावानां सौन्दर्यलहरी वर्णनायां पतित्वा मज्जनोन्मज्जनं विधाय पूतात्माऽहं तस्याः लहर्याः अवतीर्य एनां सौन्दर्यमीमांसां विरचयामि । सौन्दर्यं चिदानन्दपरमात्मस्वरूपमिति भारतीयानां भावः । भारतीयानां सर्वकलाः सर्वशास्त्राणि अन्ततः सच्चिदानन्दस्वरूपसौन्दर्यप्रकटने समर्थाः भवन्ति ।

## ११७. बाह्यसौन्दर्यं चतुर्विधम् ।

जगति सर्वमानवानां सर्वसमारम्भाः बलवर्धकपेयलेह्मभचोष्यपानाशनालंकरणविविधशिक्षणाभ्यासविविधकार्यकारणसेवाकरणमित्यादिकैः कामजनितसौन्दर्यभोगाशयैः संप्राणिताः भवन्ति । जगति सर्वजन्तूनां विशेषतः मानवानां ज्ञाताज्ञातरूपैः रससौन्दर्यपानमेव अन्तिमध्येयं भवति । अन्ततः सौन्दर्यमग्न आनन्दरसपानमेव परमात्मस्वरूपं दर्शयति । ततः सौन्दर्यगामी मोक्षगामी भविष्यतीति सः नश्वरभूतं सौन्दर्यं विसृज्य विस्मृत्य च अनश्वरं परमात्मस्वरूपं शोधयितुं अग्रेसरो भवतीति केषांचन मतम् । तत् अस्मादृशानामपि अङ्गीकार्यमेव । यत्र सौन्दर्यं मनोवाक्कायकर्माणि आनन्दयति तत्र पूर्णसौन्दर्यं भवतीति तत्रैव भगवतः आदित्यस्य तेजः भ्राजतेति वैदिकानां मतम् । सौन्दर्यं पूर्वजन्मकृतसुकृतपरिपाकेन सर्ववस्तुषु सर्वप्राणिषु संदृश्यते । ( सर्ववस्तुषु इत्यत्र वस्तूनां निर्माणात् प्राक् जनितसुकृतविशेषेण मृत्तिकाधातुलोहसंगमसंजातमिति अनुमेयम् ) कतिपयेषु वस्तुषु सुकृतविशेषः अक्रमबद्धकालमूलकत्वात् सुन्दरः न भवति । ततः तद्वस्तु असौन्दर्यमयं कलाविहीनं रूपरेखाविहीनं विभाति । प्राणिषु पूर्वजन्मसुकृतपुण्यपापपरिपाकवशात् रूपरेखादिकं स्निग्धत्वं सजीवत्वं च अस्निग्धत्वं निर्जीवत्वं च संदृश्येते । उत्तमदम्पत्योः जनितकुमारीकुमारमण्डलेषु सौन्दर्यविषये शक्तिबुद्धिज्ञानविषयेषु संस्कारेषु इष्टानिष्टेषु चरितेषु च तरतमभावः संदृश्यते । अपि च एकवातावरणस्थितेषु संस्कारवत्योः दम्पत्योः जनितेषु एकरूपान्नखादितेषु एकरूपपोषितजनेषु सर्वत्र सर्वविषयेषु हस्तिमशकान्तर-

भेदाः संलक्ष्यन्ते । तत्कथमिति प्रश्ने उद्भवति सति, उत्तरमित्थं भवति-पूर्वजन्मकृत-पापपुण्यसंक्रान्तमिति । सौन्दर्यं परमात्मस्वरूपमिति मन्यमानानां सौन्दर्यमीमांसकानां भारतीयानां सनातनमतानुयायिनां वैदिकानां हैन्दवानाम् अक्षरोऽयम् अभिप्रायः ।

### ११८ आकर्षणात्मकावयवैः पूर्वजन्मसुकृतपरिपाकेन देवांशत्वेन च जन्मतः संक्रामितं उत्तमसौन्दर्यम् ।

दिव्यरूपजनितेन भासता
चारुसौष्ठवरुचा महितेन ।
सुन्दरावयवसन्धियुतेन
सुन्दरं ननु शरीरमुच्यते ॥

सौन्दर्यं यदा परमात्मस्वरूपं तदा तस्याः वर्णधर्माश्रमसाम्प्रदायत्वं नैव भविष्यति ।

सुन्दरावयवनिर्मितं वपुः
व्यक्तभावमधुरं प्रियं मुखम् ॥
कान्तिसर्पितविलासचालनं
नैव रञ्जयति कस्य मानसम् ॥

एतादृशसौन्दर्यस्य प्रत्यक्षदर्शनेन वर्णाश्रमधर्माः जातिमतभेदाश्च द्रवित्वा रससौन्दर्यदिदृक्षवः अहमहमिकया परस्परं युद्धं कुर्वन्तः अग्रेसराः भविष्यन्ति । वैदिकाः अपि यज्ञयागादिकं विहाय स्वर्गारोहणचिन्तां परित्यज्य एतादृशसौन्दर्यं भूतलस्वर्गमिति मन्वानाः कामातुराः भूत्वा सौन्दर्यसुखरसपानाय सोमपानं विसृज्य यास्यन्ति । लोके सौन्दर्यं बलवत्तमम् । सौन्दर्यं दैवमिति तमेवाराधयन्ति लोके सौन्दर्यलोलुपाः ।

### ११९. शारीरकमानसिकाध्यात्मिककलाचिन्तनया जातं निरोगं मध्यमसौन्दर्यम् ।

शरीरसौन्दर्येण मानासिकभावसौन्दर्येण आध्यात्मिकभावभरितजीवनेन च यत्र शरीरं दृश्यते तत्र तत् सौन्दर्यं मध्यमसौन्दर्यमिति कथ्यते ।

तद्यथा–

शरीरसौन्दर्यविलासहावैः
समं स्वभावैः नवजातरम्यैः ।
नीरोगमाध्यात्म गुणान्वितं च
तन्मध्यमं तज्ज्ञजना वदन्ति ॥

यत्र नीरोगशरीरं दृश्यते तत्र सौन्दर्यमेव भासते । तच्च नीरोगत्वं सर्वोऽपि भास्करादेव प्राप्नोति ।

### १२०. सुन्दरशरीरावयवहीनेन सदाङ्गरागादिप्रसादनेन समार्जितं सौन्दर्यम् अधमसौन्दर्यम् ।

सुन्दरशरीराभावात् तत् शरीरं सुन्दरं प्रेक्षणीयं कल्पयितुं गन्धभस्मचर्चित भवेत् तत् अधमसौन्दर्यमिति सौन्दर्यज्ञानिनां मतम् ।

सुन्दरावयवहीनशरीरम्
गन्धयुक्तबहुभस्मविलिप्तम् ।
भासते यदिह मानवसङ्घे
तद्वदन्ति बहुधाऽधमरूपम् ॥

### १२१. अनुकरणजनितसौन्दर्येण सौन्दर्यराशिरिति भानम् अधमाधमसौन्दर्यम् ।

शरीरे न किञ्चिदप्यस्ति द्रष्टुम । तत् शरीरं सुन्दरमिव प्रतिभासते । ततः एतादृशसौन्दर्यम् अधमाधमसौन्दर्यमिति मे मतिः ।

निम्नोन्नतं च नैवास्ति
मांसलं नहि भासते ।
शरीरं दृश्यते किन्तु
गन्धभस्माविलेपितम् ॥

शरीरे कुत्रापि नखशिखपर्यन्तं निम्नोन्नतं न दृश्यते। अपि च शरीरं अस्थिपञ्जरेण समं भासते। तैलाङ्गरागादिभिः समलङ्कृतं समक्षमेति तत् अधमाधमसौन्दर्यमिति रसज्ञानाम् आशयः। अपि च यत्र हस्तिडिम्भकवत् स्थूलशरीरं दृश्यते तत्र तदपि अधमाधमसौन्दर्यमेव तद्यथा –

तुन्दिलोदरसंपृक्ता
पृथुलोरुविघट्टिता।
भाति ताटकरूपाङ्गी
व्यामग्राह्यपयोधरा॥

यत्र मण्डोदरेणसहिता अतिपीवरमांसलोरुविघट्टिता ताटकरूपविकृताङ्गी अपि च व्यामग्राह्यबृहत्पयोधरा संदृश्यते तत्र तत् अधमसौन्दर्यमिति मे मतिः।

सौन्दर्यं कामयन्ती या
सर्वानुकरणैः प्रिया।
कृत्रिमावयवैः लोकं
लोभयन्ती विराजते॥

शरीरे निम्नोन्नतार्थं कुचकचभारान्, दन्तान्, नेत्रे कृत्रिमरूपेण परिकल्प्य अहं सुन्दरी इति या स्वीयसौन्दर्यं दर्शयति तत् सौन्दर्यं अधमाधमसौन्दर्यमिति चाभिप्रायः।

अपि च

तिन्तिणीदळविशाललोचना
मेरुमन्थरसमानमध्यमा।
ग्रामसूकरमुखेन सुन्दरा
कुब्जदेहविलसन्नवरूपा॥

अस्याः लोचनयुगलं चिञ्चापत्रमिव विशालं प्रतिभाति। मध्ययष्टिः मेरुपर्वतसमानं प्रतिभाति। अपि च ग्रामवराहवदनवत् राजमानवदनसौन्दर्येण भाति। अपि च कुब्जस्वरूपा द्योतते, तस्याः सौन्दर्यम् अधमाधमसौन्दर्यमिति कथ्यते।

अधमाधमसौन्दर्यलक्ष्यभूतानां दर्शनेन कामः विरागी भूत्वा शान्तिमवलभ्य सुप्तः भविष्यतीति कामरसविचेष्टमानानां मतिः।

## १२२. विहाराहारसंजातं सौन्दर्यं पुनः चतुर्विधम् ।

जगति विहाराहारादीनां क्रमपद्धत्या अभ्यासपूर्णप्रभावेण शरीरसौन्दर्यं भावनासौन्दर्यं च मानवेषु भवतः। यदि सात्त्विकाहारविहारादिभिः शरीरमेधते तर्हि तत्र सात्त्विकी प्रवृत्तिः सात्त्विकसौन्दर्यं च भवतः। यदि मादकद्रव्यैः शरीरमेधते तर्हि तत्र राजसी प्रवृत्तिः रजोगुणमिश्रितसौन्दर्यं च भवतः। तथैव अनियमितासीमितान्नपानादिव्यवहारैः यत्र शरीरं वर्धते तत्रासौन्दर्यं तामसप्रवृत्तिश्च संदृश्येते। आहारविहारादिभिः सौन्दर्यपूर्णशरीरं वर्धयितुम्, अपि च नीरोगपूर्णं शरीरं पोषयितुं शक्यं भवति। तदर्थमेव योगशास्त्रे आहारविहारादीन् उद्दिश्य बहुस्थलेषु समुल्लिखितम्। सौन्दर्यमीमांसकाः अधोनिर्दिष्टप्रकारेण विवृण्वन्ति स्वीयमतं गुणत्रयात्मकसौन्दर्यमुद्दिश्य।

**सात्त्विकं राजसं चेति**
**तामसं मिश्रितत्रयम्।**
**चत्वारीह भवन्त्येव**
**सौन्दर्याणि महीतले॥**

सौन्दर्यम् उपर्युक्तप्रकारचतुष्टये प्रद्योतते॥

## १२३. सात्त्विकाहारेण प्राणायामासननियमादिसाधनासंवर्धितं सात्त्विकसौन्दर्यम् ।

दधिक्षीरघृतशर्करामधुमिश्रितभक्ष्यभोज्यपेयानि शाल्योदनेन मेळयित्वा स्वादुतिलगोधूमपिष्टकानि अपि च नानाप्रकारजम्बीरनारङ्गकदलीफलरस-विशेषैः, अपि च बहुविधशाकशलाटुभोजनेन यत् सहजातं नैसर्गिकं सौन्दर्यं जगति वर्धते तत् प्राणायामासननियमादिभिः सुसंस्कृतं लोके सात्त्विकसौन्दर्य-मिति कथ्यते।

सात्त्विकसौन्दर्ये सरसता दिव्यता आर्द्रता प्रसन्नता मनमोहनकारिता च संदृश्यन्ते। इदम् अलौकिकसौन्दर्यम्। सर्वोऽपि तत् सौन्दर्यं भोक्तुम् उदरपूरं पातुम् अपि च कामेन नाशयितुं प्रयतते। भावनायां सर्वं सुलभमेव भवति किन्तु आचरणे दुर्लभम् अशक्यं च भवति। उत्तमोत्तमसौन्दर्ये पावकत्वम् अन्तर्लीनं

संदृश्यते। यदि यः कश्चन ग्रहीतुं प्रयतते तर्हि सः दग्धः भविष्यति नो चेत् अन्यथा शप्तः भविष्यति। बहवः दृष्टान्ताः सन्ति यथा शचीं कामयमानः नहुषः, अहल्यां कामयमानः शक्रः, अन्ये च बहवः नानाकष्टान्यनुभूय अन्ततः सत्यज्ञानिनः अभवन्। सात्त्विकसौन्दर्यवृद्धिः अधोनिर्दिष्टप्रकारेण भवति।

**यद् वर्धतेऽत्र मिलितैः मधुभक्ष्यपेयैः**
**दाल्यन्नयुक्ततिलगोधूमपोळिकाभिः।**
**नानाप्रकारफलशाकरसायनैश्च**
**सौन्दर्यमेव हि तनौ ननु सात्त्विकं तत्॥**

एतादृशसात्त्विकाहारेण सात्त्विकदृष्टिः तात्त्विकभावना च व्यवहारे प्रशान्तता, शरीरसौन्दर्ये प्रसन्नता, आकर्षकता, सुगन्धता च संभवन्ति। अस्मिन् सात्त्विकाहारसौन्दर्ये दिव्यत्वं नर्तिष्यति। ब्रह्मज्ञानिनां मुनीनां दिव्यपुरुषाणां दिव्यस्त्रीणां विषये च सात्त्विकसौन्दर्यमेव संदृश्यते, यथा अनसूया सावित्री वसिष्ठादिषु भवति तथा। अपि च।

**नियमैः योगशास्त्रोक्तैः**
**प्राणायामासनादिकैः।**
**सौन्दर्यमेधते यत्र**
**सात्त्विकं तत् हि कथ्यते॥**

योगशास्त्रोक्तप्रमाणेनासनादिप्राणायामादिनियमैः यत्र शरीरसौन्दर्यं सौष्ठवं चैधते अपि च शरीरम् उत्थानयोग्यं भवति तत्र सात्त्विकसौन्दर्यमुच्यते।

## १२४. राजसाहारेण विविधव्यायामादिपरिश्रमैः संवर्धितं राजससौन्दर्यम्।

कटुतिक्ताम्लमत्स्यमांसाद्याहारैः धावनतरणाश्वारोहणमिल्लादिव्यायामादिभिः संवर्धितं सौन्दर्यं राजससौन्दर्यं भवति। अत्र रजोगुणस्याधिकप्रभावात् कामक्रोधवर्गाणाम् आविष्कारः भूत्वा सर्वदा तत्र राजसप्रकृतिव्यवहारः संजायते। कान्तिलावण्यादिकं शरीरे विद्यमानेऽपि तत्र प्रसन्नतागणस्य अभावात् दिव्यसौन्दर्यं सात्त्विकसौन्दर्यं च न भवतः। तत्र केवलं कामोद्रेकमूलकगुणस्याविर्भावः भवति। तस्मादिदं रजोगुणसमुद्भूतं राजसं भवति।

मत्स्यमांसादिमद्येन
क्रियते यत्र भोजनम् ।
भ्राजते तत्र सौन्दर्यं
रजोगुणसमुद्भवम् ॥

रजोगुणसौन्दर्यं वीरपुरुषाणां क्षत्रियाणाम् अन्तःपुरवासिनां वनितानां विषये भवति । रजोगुणप्रभावेण अनालोच्य कार्यकरणम् उद्वेगपूर्णभावनासक्त-चित्तव्यादारादिकं सान्तत्यं भवत्येव ।

महर्षिणा वसिष्ठेन
नित्यं कुशिकनन्दनः ।
अकरोत् कलहं मत्तः
रजोगुणसमावृतः ॥

सर्वमपि धरातलं रजोगुणप्रभावेणैव विविधकष्टनष्टेषु प्रचलति । जगति शते पञ्चाशत् संख्यापर्यन्तं रजोगुणपरिवेष्टिताः एव संदृश्यन्ते । रजोगुणप्रभावे कर्मणः सौन्दर्यस्य च प्रसन्नतागुणः न भवत्येव ।

रजोगुणसमाश्लिष्ट-
सौन्दर्येणाभिभूषिताः ।
शुद्धान्तवनिता एव
दृष्टान्ताः भान्ति सर्वतः ॥

## १२५. तामसाहारेण अनियामितवर्तनेन संवर्धितं तामससौन्दर्यम् ।

नियमोल्लङ्घनं विधाय पूतिगन्धयुतमत्स्यमांसादिभक्षणेन अऋजुवर्तनेन जनितेन्द्रियसंवेदनामूलकप्रभावेण जनितं संवर्धितं सौन्दर्यं तामसं भवति ।

मत्स्यामिषादिमद्यानां
सेवनेन यथा तनौ ।
सौन्दर्यं वर्धते सुप्तं
तदेतत् तामसं ध्रुवम् ॥

तामसप्रवृत्तीनां जनानां व्यवहारः तन्द्रायुतः भवति। तेषां सौन्दर्यं सर्वदा सुप्तं संकोचितं भवति। तेषां सौन्दर्यं मूर्खमुखे संदृश्यते। यथा कुम्भकर्णताटकादिषु। तामसाहारसंलग्नप्रवृत्तीनां व्यक्तीनां दिनचर्या शोभारहिता दुर्गन्धसमाकुला च प्रतिभाति।

**तामसे रञ्जितं सर्वं**
**सौन्दर्यं निष्प्रभावितं।**
**सुप्तं मदेन सर्वत्र**
**दृश्यतेऽसह्यवेदनम्॥**

## १२६. गुणत्रयेण मिश्रितं साधारणसौन्दर्यमिति कथ्यते।

असौन्दर्यावच्छिन्नं सौन्दर्यं गुणत्रयावृतं ससंदर्भम् रागद्वेषादिभिः प्रकाशते एतत् सौन्दर्यं सर्वत्र लोके दरीदृश्यते। अत्रास्मिन् सौन्दर्ये गुणत्रयाणां सौन्दर्यविशेषाः एकत्र मिलित्वा यथाकालं यथास्थिति संदृश्यन्ते।

**गुणत्रयाभूषितभावरूपं**
**वैविध्यभावे परिवर्तनात्तम्।**
**षड्वर्गशत्रूदयचित्तसद्म**
**सामान्यसौन्दर्यमिति प्रचष्टे॥**

एतत् लौकिकसौन्दर्यं जगति कामक्रोधलोभमोहमदमात्सर्यादिभिः परिवेष्टितं शैलूषीरूपभासितं विविधस्थानेषु विविधरूपेषु आविर्भवति। तस्मात् सर्वदा जगति अनेन सौन्दर्येण कलहाः संभवन्ति।

**सुन्दरं प्रथमं भाति**
**पश्चान्नैकमुखान्वितम्।**
**निरतं कलहासक्तं**
**वञ्चनाभावपूरितम्॥**

प्रथमतः दर्शने संगमे च सुन्दरं प्रतिभाति। किन्तु कालक्रमेण सर्वदा कलहासक्तं वञ्चनापूर्णं संसारमसंसारं कुर्वत् विराजते साधारणसौन्दर्यम्। एतादृशसौन्दर्यं जगत्यत्र सर्वत्र आधुनिकदिवसेषु संदृश्यते। आधुनिकसौन्दर्यं सर्वं कृत्रिमं मृगतृष्णिकावत् हानिकारकं भवति।

## १२७. अलंकारधारणामूलकसंजनितसौन्दर्यं चतुर्विधम् ।

अलंकुर्वन्तीति अलंकाराः । एते अलंकाराः शरीरमलंकुर्वन्ति शोभामयं च कुर्वन्ति । अनुरूपालंकारधारणं योग्यमेव । एते अलंकाराः यदि यथायोग्यम् अनुरूपं ध्रियन्ते तर्हि ते अलंकाराः भवन्ति । अधिकालंकारधारणेन शरीरं सुन्दरं न प्रतिभाति किन्तु असह्यवेदनां प्रतिपादयति । यथायोग्यं धारणेन अलंकारः अलंकारः भवति नो चेत् अनलंकार एव । अलंकारानन्तरेण शरीर-सौन्दर्यप्रद्योतनम् । शरीरसौन्दर्येण अलंकाराणाम् अलंकारत्वसिद्धिः अपि चान्योन्याश्रयभावेन प्रकाशनम् । शरीरस्य प्रभाहीनत्वे सौन्दर्यासंक्रमणम् इत्यादिकं लोके अस्मादृशैः संदृश्यन्ते । तत् विवृणमः ।

## १२८. निरलंकारं सहजातम् उत्तमोत्तमं सौन्दर्यम् ।

अलंकारान् विना शरीरे जनितं सौन्दर्यम् उत्तमोत्तमं भवति । निरलंकार-सौन्दर्यं सुन्दरशरीराकृतिबन्धे सुन्दरावयवैः नातिस्थूलनातिकृशनात्युच्चनातिह्रस्वाकारैः विराजमानानां युवतीनां सहजातं भवति । लावण्यसरसि विराजमानसरसिज-मुखीनां, नयनाञ्चलैः जगत् सर्वं स्वपादपीठतले विराजन्तं कुर्वतीनाम् अलंकाराः कुतः । अत्र निरलंकारता एव सौन्दर्यम् ।

निरलङ्कारतन्वङ्गी
तनोति च दिगन्तरे ।
चन्द्रिकासमसौन्दर्यं
विलासैः नेत्रसुस्मितैः ॥

अत्र विना चाभरणानि तटिद्गौरी चन्द्रमुखी तन्वी सहजातसौन्दर्येण स्वीयसौन्दर्यं दिगन्तरे सहजसमुद्भूतैः अनिर्वचनीयविलासैः लोचनान्त-विनिर्गतसुस्मितदृगञ्चलैः विकिरति सौन्दर्यचन्द्रिकां जगति । अस्मिन् सहजात-सौन्दर्ये कृत्रिमवेषभूषाः अनलंकारभावं कलयिष्यन्ति । तस्मादिदम् उत्तमोत्तम-सौन्दर्यम् ।

## १२९. अन्योन्यशोभाप्रदानेन वर्धितं सौन्दर्यम् उत्तमसौन्दर्यम् ।

अस्मिन् सौन्दर्ये युवतीनां विलासभासिताङ्गैः धृतं सर्वमपि मण्डन-मण्डलं युवत्याः देहकान्त्या अधिकं शोभते वा, अलंकाराणां छविप्रसारितकान्ति-विशेषेण युवत्याः शरीरं शरीरावयवानि अधिकतरं भ्राजन्ते वा इति शङ्का जायते। तस्मात् इदं उत्तमसौन्दर्यलक्षणं भवति । उत्तमसौन्दर्यलक्षणोपेताः युवत्यः विरलाः भवन्ति ।

तन्व्याः संबन्धमापाद्य
भूषणानि चकासति ।
नो चेत् भूषणसंपर्के
तन्वङ्गी प्रविराजते ॥

अत्र भूषणभूष्यभावः अन्योन्याश्रयेण भवति। अपि च

भूषणानि मिलितानि शरीरे
भूषणेषु मिलिता तनुशोभा ।
तत्र केवलमहो वहतीव
दृश्यते मधुरकान्तिललामा ॥

न चात्रास्ति अतिशयोक्तिः नापि उत्प्रेक्षा किन्तु वर्तते उत्तमसौन्दर्यमेव । जगति सन्ति एतादृशसौन्दर्यसमुपेताः काश्चित् ।

## १३०. अलंकारैः शरीरसौन्दर्यवर्धनं मध्यमसौन्दर्यम् ।

यत्र अलंकारधारणेन शरीरस्य सौन्दर्यं प्रवर्धमानं संदृश्यते तत्र मध्यम-सौन्दर्यमितिकथ्यते । अलंकारमण्डनैः अलंकाराणां प्रभाभिः शरीरमालिन्यं क्षालितं भूत्वा शरीरं स्नानसंस्कारं प्राप्तमिव विद्योतते। एतादृशलक्षणसमुपेतं सौन्दर्यं मध्यमसौन्दर्यमिति कथ्यते ।

सुवर्णाभरणादीनां
सुषमा क्षालितं वपुः ।
भ्राजते स्नानसंस्कारं
आप्त्वा स्वच्छं निरन्तरम् ॥

अत्र युवतीनां शरीरं मण्डनादीनां सुषुम्णा प्रक्षालितं भूत्वा स्नानसंस्कारमाप्तमिव नित्यं शोभामयं विद्योतते। पवित्रत्रिवेणीसंगमस्नानेन यथा शरीरं पूतं भवति तथा आभरणादीनां कान्तिसलिलेन युवत्याः शरीरमालिन्यं धूतं भूत्वा विराजतेत्यर्थः।

शरीराभरणैः तन्वी
सुन्दरा भांति सर्वदा।
निरस्ताभरणा भूत्वा
तुदतीवास्ति मानसम् ॥

यावत्कालम् आभरणधारणं तावत्पर्यन्तं सौन्दर्यम् अपगताभरणे सति मनः संतुदत्यैव। एतत् मध्यमसौन्दर्यलक्षणम्।

## १३१. शरीरसंबंधेनालंकाराणां सौन्दर्यविलोपनम् अधमसौन्दर्यम्।

शरीरम् अस्ति किन्तु तत् आकृतिबन्धहीनं आकर्षणविहीनं दृश्यते तस्मिन् शरीरे समस्तमण्डनस्य विद्यमानेऽपि शरीरस्य न किमपि सौन्दर्यं भवति। परिणामे आभरणानां शोभा ह्रसिष्णुतां प्रयाति। तत्र अलंकाराणाम् उपयोगो न भवति शरीरस्यापि मण्डनविषये निरुपयोगित्वमेव भवति।

शरीरे भूषितं सर्वं
मण्डनं निष्प्रभावितम्।
भाति सौन्दर्यहीनं च
युवतिर्जीविता सती ॥

अत्र युवतिः जीवितांऽपि शरीरे अलंकृतमण्डनजालं सर्वं तेजोहीनं बभूव। शवरूपे मण्डनं प्रभावितं न भवति। तरुण्यां जीवति मण्डनं तेजोविरहितं बभूव। अत्र सौन्दर्यहीनत्वं द्योतते।

सौन्दर्यहीनकाये तु
निष्प्रभावं हि भूषणम्।
मण्डितं वज्रहारेण
किं कुड्यं भाति सुन्दरम् ॥

ततः पूर्वजन्मनि संस्कृतात्मनः सौन्दर्याभावात् सुन्दराङ्गसुन्दरावयवाभावात् सर्वं निष्प्रभावितं भवति।

काश्चन युवत्यः केशकर्तनं मण्डनमिति मत्वा शिरोजकर्तनं विधाय शरीरे निम्नोन्नतभागाभावात् ताः पुरुषा इव संदृश्यन्ते। यदा स्त्री पुरुषः इव संदृश्यते, अपि च पुरुषः स्त्री इव परिदृश्यते तत्र सौन्दर्यस्य अभाव एव भवति। तत् न जानन्ति आधुनिकाः केवलवेषधारणे अङ्गरागे लोलुपाः। शरीरसौन्दर्यमेव शरीरावयवनिर्माणमेव प्रधानसौन्दर्यम्। आहार्या अङ्गरागाश्च गौणाः भवन्ति। यदि शरीरनिर्माणं सुन्दरं भवति तदाऽऽनुषङ्गेण सर्वाणि सुन्दराणि भवन्ति। शिरोजकर्तनं सर्वासां सौन्दर्यवर्धकं न भवते। काश्चन युवत्यः कर्तित-शिरोजेषु तासां अवयवनिर्माणस्य सुन्दरत्वात् मूर्तीभूतस्त्रीलक्षणानाम् अस्तित्वात् सुन्दर्यः प्रतिभान्ति। एकस्याः सौन्दर्यभूतम् अलंकरणं अन्यासां सौन्दर्य-भूतं न भूत्वा असौन्दर्यभावमेव असह्यभावनामेव च संजनयति। अस्थानेषु सौन्दर्यकरणं मण्डनविधानं अधमसौन्दर्यस्योदाहरणमेव भवति। काश्चन कृत्रिम-दन्तान् कृत्रिमनेत्राणि कृत्रिमनितम्बमण्डलं कृत्रिमस्तनमण्डलं परिकल्प्य स्वात्मानं अलंकृत्य परितुष्टात्मानाः भवन्ति। अनुकरणसौन्दर्यं हास्यास्पदं भवति। कृत्रिमसौन्दर्यम् एकान्ते यदि दृष्टं भवति अनुपदमेव वैराग्यं जायते। तत्र सौन्दर्य-दर्शने न कापि भावना भवति। समष्ट्याम् अन्ततः अयमेव निष्कर्षः यत् शरीरे निम्नोन्नताभावभागस्य दर्शनात् स्त्रीसौन्दर्यमुद्दिश्य भावनाः न भवन्ति। तथैव पुरुषाणां विषयेऽपि भवति। स्त्रीषु स्त्रीत्वम् आवश्यकं भवति, पुरुषेषु पुंस्त्वं। द्राघिष्ठबलिष्ठताः च प्रधानभूताः भवन्ति। एतदेव पुरुषसौन्दर्यम्। यथाकथमपि सुन्दररूपे भानं सौन्दर्यमिति आधुनिकानां मतम्।

## १३२. आङ्गिकसौन्दर्यं सहजालंकरणं भवति।

शरीरयष्टिना समविभक्ताङ्गेन यथायोग्यं भवितव्यम्। यथानुरूप-सुन्दरशरीरावयवेषु सौकुमार्यं सरसता कान्तिमत्त्वम् आकर्षणात्मकता चावश्यकाः भवन्ति। यदि अङ्गानि सुन्दराणि तर्हि भावप्रकटनार्थं नृत्यनाट्यकरणार्थं सुलभानि मनमोहनकारणानि भविष्यन्ति। यदि शरीरावयवेषु सौकुमार्यस्याभावः तर्हि केवलसुन्दरात्मना अपि न प्रयोजनं भवति। ततः सर्वसुन्दरगुणानां धर्माणां भावनानां चैकत्रस्थानं योग्ये भवति शरीरे। तदेव सौन्दर्येण रसस्वरूपं

तस्य स्वरूपस्य सौन्दर्यं च ज्ञास्यन्ति रसिकाः। उपरोक्तगुणधर्माणाम् अभावे रसोत्पत्तिः न भविष्यति रसोत्पत्त्यभावे सौन्दर्यस्याविर्भावः न भवति। तस्मात् आङ्गिकसौन्दर्यप्रधानभूतम् आङ्गिकसौन्दर्यस्याभावे आहार्यसौन्दर्यस्य निरुपयोगित्वमेव भवति।

आङ्गिकं गुणधर्माप्तं
मधुरं वल्गुविभ्रमैः।
समासक्तं प्रियं कान्त्या
तद्वदन्यत्र सुन्दरम्॥

अपि च

शरीरं यदि सम्पन्नं
मधुराकृतिबन्धनैः।
रसेन स्यन्दितैरङ्गैः
उच्यते तत् हि सुन्दरम्॥

## १३३. असमसमशरीरनिर्मितिरेव सौन्दर्यम्।

असम इत्यत्र निम्नोन्नतमित्यर्थः। शरीरस्य निम्नोन्नतास्तित्वमेव सौन्दर्यस्य प्रधानकारणम्। सम इत्यत्र तुल्यमानात्मकः इत्यर्थः। सम इत्यत्र मध्यात् ऊर्ध्वं यो भागः शरीरस्य, तेन भागेन समं, मध्यात् अधोभागेन वर्तितव्यं तदेव समस्समविभक्ताङ्गत्वम्। अर्थात् शरीरं मांसलं भूत्वा कुचकचजघननितम्बभागैः समतायुतशरीरभागैः तदनुरूपावयवैः सहजतया सुसज्जितं भवेद्यदि तदेव शरीरनिर्माणसौन्दर्यमुच्यते।

असमशरीरसौन्दर्यं यथा।

स्रस्तांसलसरसा तन्वी
पीनोन्नतपयोधरा।
नितम्बभारगुर्वङ्गी
भ्राजतेऽसमसुन्दरा॥

समशरीरसौन्दर्यं यथा।

मध्यादूर्ध्वं शरीरस्य
भवेतां चाधरं प्रियम् ।
वपुः कान्तं समाचष्टे
तुल्यमानेन सुन्दरम् ॥

असमशरीरे समविभक्ताङ्गे च यदि सौन्दर्यं सर्वत्र व्याप्य आत्मसौन्दर्येण द्योतते तदेव शरीरसौन्दर्यमिति अस्मादृशानां सिद्धान्तः

समासमशरीरेण
या स्फुरन्ती विलोक्यते ।
सा तन्वी कथ्यते लोके
जन्मना खलु सुन्दरी ॥

यशोधरायाः सुविभक्तदेहे
शोभा क्षणे या नवतामुपैति ।
अन्यत्र माऽगादिति तामभिख्यां
बद्धेव सा प्रावरणा विरेजे ॥

अत्र यशोधरा समविभक्ताङ्गी शरीराङ्गैश्च लावण्येन च सुन्दरी भूत्वा प्रावरणाबद्धैकत्रसौन्दर्यमूर्तिरिव बभौ । पद्यमेतत् मद्रचितयशोधरा महाकाव्यात् समुद्धृतम् ।

## १३४. अङ्गेष्वतिमहत्त्वपूर्णम् उत्तमाङ्गसौन्दर्यम् ।

शरीरे विद्यमानेषु अवयवेषु शिरः उत्तमाङ्गं भवति । पञ्चेन्द्रियेषु चत्वारीन्द्रियाणि मेधा चोत्तमाङ्गे विद्यन्ते । तस्मात् शिरसः उत्तमाङ्गत्वं नाम सिध्यति । यद्येतदुत्तमाङ्गम् आकर्षणात्मकरूपसौन्दर्यं वर्तिष्यति चेत् प्रेक्षणीयं भवति ।

तद्यथा ।

भूगोळवत् शिरः सम्यक्
प्रज्ञायुतसुमेधया ।
यथायोग्यं शरीरस्य
वर्तनीयं हि सुन्दरम् ॥

सुन्दरेन्द्रिय संपृक्तोत्तमाङ्गदर्शनेन कामः सकामः भविष्यतीति रसिकानां वितर्कः। सर्वविषयसंग्रहेण यथा भूगोळं भ्राजते तद्वत् मेधायुतशिरः अपि भ्राजते। तादृशमेधासौन्दर्येण शरीरानुरूपवर्तुलेन शिरः सुन्दरकेशपाशमण्डितम् अतिसौन्दर्येण समाकर्षकं भाति।

## १३५. मानसोल्लासकारकं शिरोजसौन्दर्यम्।

प्रकृतिसुन्दर्याः आकाशशिरसि मेघमण्डलशिरोजाः प्रतिक्षणं सुन्दरं प्रतिभान्ति। अलंकारशास्त्रे साहित्यशास्त्रे च शिरोजानां अत्यन्तमहत्वपूर्णस्थानं वर्तते। जले पतित मीनः इव रसिकः शिरोजसौन्दर्येण आकर्षितः युवत्याः शिरोजसौन्दर्यजाले विचेष्टमानः सकामं राजते। न कोऽपि कविः विश्वसाहित्ये शिरोजवर्णनं तत्याज स्वीयकृतकाव्येषु। अनेन ज्ञायते शिरोजानां मूर्धन्यस्थानं वर्तते साहित्यशास्त्रे सौन्दर्यशास्त्रे च। यथा

चञ्चरीकचयकालिमकेशा
नीलनीरदसमाश्रितकान्त्या।
नीलकण्ठवरपिच्छविभासा
भ्राजतां वरमरालकुन्तला॥

अपि च - यशोधराकाव्यात्

यशोधरादीर्घमरालकेशान्
विलोक्य लज्जाऽकुलिता मयूराः।
कुर्वन्ति ते काननवासमेव
त्रपाभराश्चिन्तितबर्हपृष्ठाः॥

अपि च

कबरीभरेण सौन्दर्यं
द्विगुणं भासते प्रियम्।
तदेव रसिकानां तु
काम्यं भवति सर्वदा॥

अपि च

मुखचन्द्रप्रकाशेन
द्राविता रजनी द्रुतम् ।
पृष्ठभागे तु चन्द्रस्य
कबरीरूपेण राजते ॥

कबरीभारेषु विविधबन्धनाः सन्ति रसानुगुण्यम् । यदि केशजालं यथा-दीर्घं चिक्कणं पुष्कळं भवेत् तदा विविधकबरीभारबन्धनानां न कोऽपि क्लेशः भवति । तस्मात् चिक्कणं मञ्जुलकेशनिकुञ्जं मूर्धन्यम् अलङ्कारेषु भवति ।

## १३६. शङ्खाकृतिवत् आकर्षणात्मकं ग्रीवासौन्दर्यम् ।

कण्ठः शङ्खाकृतिवत् वलित्रयेण अर्थात् शङ्खनादानुरूपस्वरेण च विराज-मानः भवेत् सः सौन्दर्यभावुकानाम् अत्यन्ताकर्षणात्मकः भविष्यति ।

रेखात्रयेण संपृक्ता
पाञ्चजन्यसमाकृतिः ।
चुम्बनश्रीसमाश्लिष्टा
ग्रीवा शोभतु सुन्दरम् ॥

वात्स्यायनमतानुयायिनां कम्बुकण्ठचुम्बनेन कामः पुलकितः सौन्दर्य-वान् भवतीति मतम् । ग्रीवासौन्दर्येण कण्ठहारोऽपि वज्रहारोऽपि सुन्दरौ भवतः इति सौन्दर्यशास्त्रज्ञानां मतम् । सुन्दरकण्ठाश्लेषेण ग्रीवालिङ्गनेन चुम्बनेन च सर्वमपि शरीरं विद्युत्प्रसारितं भूत्वा शरीरे रक्तं सर्वमपि पावनं भवतीति अनुभवज्ञानां मतम् ।

## १३७. अष्टमीचन्द्रवदाकर्षणात्मकं निटलतटसौन्दर्यम् ।

कलास्थानेषु निटलतटमपि एकं भवति । निटलतटभागे अव्यक्तमधुर-भावनावळयः संदृश्यन्ते । निटलतटम् अव्यक्तसौन्दर्यं पूर्णं भवति ।

प्रसरन्तं महाकान्त्या
ज्ञानसौन्दर्यशोभितम् ।
अर्धेन्दुतुल्यं निटलं
चुम्बनोन्मुखसुन्दरम् ॥

अपि च

कुङ्कुमाञ्चितमनोज्ञदीधिभिः
चूर्णकुन्तलविसर्पिताकृतिम् ।
भावसुन्दरमहाशयावृतं
संवदन्ति निटलं हि सुन्दरम् ॥

कान्त्या परिव्याप्तं व्यक्तिमत्वाभिव्यञ्जकं अपि चाष्टमीचन्द्रवत् विराजन्तं चुम्बनविधौ सुन्दरं विभ्राजमानं निटलं कुङ्कुमरागाञ्चितं पवित्रसौन्दर्येण विविध-भावमहाशयलसितमिति कलाराधकानां भावः ।

## १३८. सकलभावनाव्यञ्जकं लोचनसौन्दर्यम् ।

लोचनयुगळं सुन्दरप्रकृत्याः सौन्दर्यं प्रतिक्षणं निपीयामोदेन विस्फारित-स्वरूपमिवानन्तभावपूर्णसौन्दर्येण विराजमानं भवति ।

कंजातदळसंकाशं
भावपूर्णमनोहरम् ।
उत्फुल्ललोचनं रम्यं
प्रोचुः सौन्दर्यपूजकाः ॥

लोचनसौन्दर्येण सर्वं जगत् जेयं भविष्यति। केषांचन, नो चेत् कासांचन नयनानि हसितानि, ज्ञानपूर्णानि, करुणालवालानि, श्रृङ्गाररसपूर्णचषकसमानि भवन्ति, शान्तरसपूर्णानि च प्रकाशन्ते । जनाः प्रायेण निटलतटे अपि च लोचनेषु व्यक्तिगुणगणविशेषं पठितुं शक्नुवन्ति। सौन्दर्यगणनायां लोचनानाम् अत्यन्तमहत्त्वपूर्णस्थानं विद्यते । मद्रचितयशोधरामहाकाव्यात् समुद्धृतम् ।

नीलोत्पलाभ्यां नयने मनोज्ञे
चिकाय तस्याः कमलासनः किम् ।
तथेति ते कज्जलरेखलिप्ते
विरेजतुः चञ्चलरल्लकैश्च ॥

अपि च युवत्यः अनुक्त्वा नेत्रस्पन्दनविलासैः हृद्गतभावं व्यक्तीकरिष्यन्ति। दृगञ्चलेन ताः जगत् शासति। काश्चन युवतयः केचन पुरुषाश्च सभासु मण्डलेषु रहस्यमपि दृगञ्चलैः परानभिज्ञं परस्परं वार्तयन्ति।

हृदयभावनाऽऽविष्कारार्थं शब्दान् अनुपयोज्य तत्स्थाने केवलविलास-चटुलदृगञ्चलैः व्यवहरन्ति। "स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु"। ताः भाषणं विना केवलं स्वीयविभ्रमैः लोकं संमोहयन्ति। सुन्दरयुवत्यः नितान्तचणाः लोचनमाध्यमेन भावं व्यक्तीकुर्वन्ति। न केवलं मानवेषु भवति नेत्रव्यवहारः किन्तु पशुषु अपि व्यक्ताव्यक्तलोचनान्तदृग्भिः भावाः सुस्पष्टाः भवन्ति। मूकेषु जनेष्वपि भावप्रकटना परमसुन्दरा भवति। अनभिव्यक्तानि अतिमधुराणि भवन्ति भावार्थकानि व्यक्तमधुरेभ्यः। तस्मात् नेत्रसौन्दर्यपरीक्षायाम् अधिक-गुणान् प्राप्नोति सर्वसुन्दराङ्गेभ्यः। पश्यन्तु नेत्रयोः भावसौन्दर्यम्।

**प्रिया दृष्ट्वा प्रियं कामं**
**चक्रे नेत्रे निमीलिते।**
**सर्वान् त्यक्त्वा प्रियः शान्तं**
**तया रन्तुं ययौ गृहम्॥**

चक्रे नेत्रे निमीलिते इत्यत्र नेत्रं योनिसंसूचकपदं निमीलितं तन्मयत्व-सूचकं भवति। अर्थात् मया साकं रमित्वा माम् अधुना तृप्त्या निमीलिताक्षीं करोतु भवान् इति। सुन्दरनेत्राणि भावप्रकाशनयोग्यानि ध्वनिकाव्यानि भवन्ति। तस्मात् सौन्दर्यमेव सर्वत्र सर्वेषां सर्वासां मूलकारणं भवति। विना च सौन्दर्येण नेत्राभ्यां भावप्रकटना अशक्या भवति। तस्मात् सौन्दर्यमेव मूलकारणं जगति।

## १३९. व्यक्तिस्वभावगुणसंसूचकं नासिकासौन्दर्यम्।

नासिकाद्वारा गन्धसौन्दर्यं ज्ञायते। यदि नासिका सुन्दरा दीर्घा चम्पा-समानाकारा भवेत् सा नासिका द्रष्टॄणां कमपि भावम् आवश्यकं जनयिष्यति। तद्यथा—

मद्रचितयशोधरामहाकाव्यात्।

घोणा तदीया चरितार्थसूची
मनोजभावास्पदचारुरेखा ।
सुरागिणी दाडिमकुड्मलाभा
विराजते कामितदायिनीव ॥

अपि च

चम्पासूनसमाकारा
श्वासनिःश्वासगन्धिला ।
चारित्र्यं दर्शयन्ती सा
घोणा सर्वजनप्रिया ॥

सौन्दर्ये नासिकायाः अत्यन्तमहत्त्वपूर्णं स्थानं वर्तते । नासिकया व्यक्तेः स्वभावः ज्ञायते ।

## १४०. लोचनानन्दकरं मुखाब्जसौन्दर्यम् ।

मुखाब्जसौन्दर्यदर्शनेन लोचनयोः शीतलत्वं नासिकायाः गन्धिलत्वं च भवतः । मुखदर्शनेन परमानन्द एव भवति, विना च लेशमपि जुगुप्साभावः, तदेव मुखसौन्दर्यम् ।

ग्लौबिम्बरम्यं जलजेन निस्तुलं
नीरजगन्धैः मनोमोहकारिणम् ।
सान्तत्यसंदर्शनभाग्यकाङ्क्षिणं
माधुर्यपूर्णं वदनं वदन्ति हि ॥ (यशोधरामहाकाव्यात्)

अपि च

मुखं तदीयं कमलश्रिया भृशं
सुधामयूखस्य रुचा विनिर्ममौ ।
ततः तदीयं वदनं च वर्ण्यते
परागपद्मेन सुधांशुमालिना ॥ (यशोधरामहाकाव्यात्)

सौन्दर्यशास्त्रे मुखस्याग्रस्थानं विद्यते । वदनमेव सकलभावानां प्रकटना-सिद्ध्यर्थं यवनिकारूपेण विराजते ।

## १४१. अतिमधुरमधरसौन्दर्यम् ।

अधरपानम् अधरचुम्बनं च मन्मथोज्जीवनाय परमौषधं भवतः इति सुरतचातुर्यचणानाम् उद्गारः । ओष्ठे सुन्दराकारे वर्तितव्ये । ते भाषणे वक्रभावमनापन्ने स्याताम् । भाषणम् ओष्ठसंबन्धेन मधुरं श्रवणीयं भवति ।

सदारुणं बिम्बफलानुतुल्यं
विचुम्बने भव्यसुधां स्रवन्तम् ।
प्रवालकान्त्या विजितप्रवालं
बिभ्रन्वते सुन्दरमोष्ठमार्याः ॥

अपि चान्यत् – यशोधरामहाकाव्यात्

चूतप्रवालेन तदीयमोष्ठं
वसन्तकाले प्रथमोद्गमेन ।
अनारतं तोलयितुं सुयोग्यं
प्रियं भवत्येव कलाप्रियाणाम् ॥

अन्यत्

यदा च भाषते तन्वी
निर्गच्छन्ति मुखात् ध्रुवम् ।
शब्दा मौक्तिकरूपेषु
माधुर्यगुणपूरिताः ॥

शब्दाः अधरोष्ठनिष्यन्दनेन माधुर्यगुणपूरितमौक्तिका इव मधुरायन्ते ।

## १४२. चुम्बनाह्वानकारकं कमलोदररक्तिमं मुकुरमिवातिनिर्मलं कपोलसौन्दर्यम् ।

कपोलसौन्दर्यं मुकुरवत् निर्मलम् अपि च भावरागरञ्जितं चिक्कणदुग्धवर्णपरिव्याप्तं चुम्बनक्रियाप्रेरकं भवेद्यदि तत् कपोलसौन्दर्यमुच्यते । चिक्कणकपोलद्वयं करकमलपुटे संयोज्य चुम्बनक्रियाकरणे परमानन्दं भवतीति स आनन्द एव ब्रह्मेति रसिकानाम् अनुमेयः । नायकः नायिकां कथयति तद्यथा –

तव देवि कपोले तु
चुम्बनं प्रविधीयते ।
किन्तु चुम्बामि तत्राहं
मदीयवदनं कथम् ॥

तत् श्रुत्वा जहास सुन्दरं सुन्दरी । ततः परं चुम्बनव्यापारकर्म निर्निरोधं बभूव । स नायकः चुम्बनप्रक्रियायां मग्नो भूत्वा तस्याः कपोलसौन्दर्यम् अचूचुरत् । अत्र मत्तकाशिन्याः कपोलचुम्बनसमये स्वीयमुखं कपोले प्रतिबिम्बितं तत् प्रतिबिम्बं सः चुम्बति । अर्थात् तस्याः कपोलं मुकुरातिनिर्मलमिति रागरञ्जितत्वात् चुम्बनक्रियाप्रेरकं बभूवेति ऊह्यम् । तादृशसौन्दर्यं कथं भवति स्त्रीणां, पुरुषाः कथं उन्मत्ताः भवन्ति सौन्दर्यपाने, तदनूह्यं, तत्रैव विद्यते सृष्टिरहस्यम् । सौन्दर्यमेव जगति सृष्टिप्रेरकं भवति ।

## १४३. कुन्दकुड्मलनिभं दन्तसौन्दर्यम् ।

धवलदन्तसौन्दर्यस्य प्रभावेन हसितं सर्वं वदनमण्डलं सर्वं विकासयति । तदा सा नारी शुचिस्मिता भवति ।

नवोद्गमैः कुन्दमनोज्ञकुड्मलैः
सुपाण्डुरैः दाडिमबीजरोचिभिः ।
निरन्तरं सुन्दरदन्तशोभितं
रसार्द्रचित्ता वदनं प्रचक्षते ॥

अपि च यशोधरामहाकाव्ये यथा ।

कुन्दैश्चकल्पे सितदन्तपङ्क्तिं
निर्दुष्टरूपेण परं विधाता ।
तनोति शुभ्रं स्मितमासमन्तात्
ताम्राधरव्याप्ततदीयकान्तिः ॥

दन्तसौन्दर्यनिर्गतसुषमाभिरञ्जितप्रियाप्रियौ परस्परम् आकृष्टौ विलासमिलितधवलहसितैः दन्तक्षतैश्च मन्मथं पल्लवितं पुष्पितं च कुरुतः इति लोकविदितसत्यम् ।

## १४४. पयःपूर्णकलशोपमितम् उरोजसौन्दर्यम् ।

स्रस्तांसवधोधः उत्सेधबाहुमूलसान्निध्ये रत्नगिरिपक्वाम्रापूसफलोपमितं पयःप्रपूर्णकलशोपमितम् उरोजसौन्दर्यं युवतीनां गर्वहेतुः भवति । यतः तत् सौन्दर्यं यौवने सुखकरं किञ्चित्कालानन्तरं अथवा कालान्तरेण मातृहृदयरूपं प्राप्य संतान-प्रवर्धकमूलकारणं भवतीति । सर्वथा उरोजसौन्दर्यं सुखावहं भवति यौवतस्य यूनां च ।

**प्रतिक्षणं नव्यरुचा विभासिनं**
**प्रवर्धमानं मदगर्वयौवने ।**
**ध्रुवं मनोरञ्जकमूलकारणं**
**मनोजसौन्दर्यमुरोजमेव हि ॥**

उरोजानां पीवरत्वम् औन्नत्यं च पदे पदे यौवने स्त्रीपुरुषाणां बहुधा उद्दीपनविभावहेतू भवतः ।

यशोधरामहाकाव्यात् समुद्धृतम् ।

**बभौ तदीयं कुचमण्डलं तु**
**शरीरलावण्यनिमज्जितानाम् ।**
**संरक्षणार्थं बहुमानपात्रं**
**सृष्टं तदेतत् खलु चित्तजेन ॥**

उरोजसौन्दर्यं स्वतः स्त्रीणां कामोद्दीपनहेतुः भवतीति तदा तदा ताः स्वकुचमर्दनं कुर्वन्तीति, अपि च रसिकानाम् उरोजसौन्दर्यं कामसरसि तरण-वेलायाम् आलम्बनं भवतीति रसिकजनानां भावः ।

## १४५. सुषमापरिव्याप्तम् ईषदुत्सेधं सुखं जनयति भुजमूलसौन्दर्यम् ।

युवतीनां पीवरभुजमूलसौन्दर्येण उरोजसौन्दर्येण च मोहितः पुमान् तत्रैव भुजयुगमध्ये मांसलच्छविसंछादित उरोजतल्पे स्वपितुमीहतेति अनु-भवज्ञानां कथनम् ।

बाहुमूलरुचिभूषितस्तनी
बाहुबद्धवलयाङ्गदरामा ।
केशबन्धनछलेन पूरुषं
कामुकं तु विदधाति धरण्याम् ॥

भुजयुगलम् उद्धृत्य सर्वाङ्गसुन्दरी स्वकेशपाशसंहरणकार्यं करोति तदा पीवरोरोजोत्सेधसौन्दर्येण बाहुमूलरुचिमण्डितेन विलासविभ्रमेण यूनः कामुकान् करोति । पुरुषानां कामोन्मुखीकरणं भुजमूलोरोजसौन्दर्येण भवति, न तु मुखमण्डलेनेति कामशास्त्रे मज्जनोन्मज्जनं कुर्वाणानां मतम् ।

अपि च यशोधरामहाकाव्यात्,

मृणालनालेन समं तदीयौ
स्रस्तांसरम्यौ मृदुलौ च बाहू ।
विलोकिनां कण्ठगतौ तदानीं
प्रवर्धयन्तौ मकरध्वजाधिम् ॥

सामान्यतः सौन्दर्यं कामभावम् आनन्दं च जनयति । स एवानन्दः चिरकालं मानवमनसि मुद्रितः प्रतिक्षणं सौन्दर्यभावनया परिपुष्टिं प्राप्य जीवने अनिर्वचनीयानन्दं प्रजनयति। सौन्दर्यं प्रति कल्पनाचातुर्येण कृतसौन्दर्यमेव चिरकालं मानवम् आरोग्यवन्तम् आनन्दनिर्भरस्वान्तं करिष्यति । सौन्दर्यमेकानन्दस्वरूपम् । आनन्द एव ब्रह्म । तस्मात् सौन्दर्यमेव ब्रह्मज्ञानप्राप्त्यै मूलकन्दं भवति ।

## १४६. मानसोल्लासकारकं पाणिसौन्दर्यम् ।

पाणिसौन्दर्यमनिर्वचनीयं भवति । यदि मृदुलपाणिः भवति स पाणिः तुहिनकरकौमुदीव शीतलः भवति । अनुरूपाङ्गुलिसंपृक्तः प्रधानरेखासंचित्रितः नखप्रभाभूषितरक्तवर्णाक्तः कङ्कणच्छविनिर्गतसुषमापरिव्याप्तः पाणिः प्रेक्षणीयः भवति । स एव पाणिः सर्वकर्माणि सुन्दरं परिवर्तयति । स एव पाणिः जगति चैतन्यं जनयतीति सौन्दर्याराधकानां मतम् ।

मृणालनालबाहुं च
नागवल्लीदलोपमम् ।
पाणिं सर्वत्र कांङ्क्षन्ते
रसार्द्राः सततं भुवि ॥

मृणालोपमितं बाहुं नागवल्लीदळोपमं पाणिं दार्विकासमानाङ्गुळीन् रसिकाः काङ्क्षन्ते। एतादृशलक्षणसमन्वितः पाणिः सुन्दरः इति भावुकाः कथयन्ति। तादृशपाणिरङ्गुळिनखक्षतैः रसिकाः परमानन्दमनुभवन्ति।

तद्यथा—

सुचित्रितं पल्लवितं च भाति मे
शरीरमेतन्भवदीयसंगमे ।
त्वदीयपाणेः सुनखक्षताङ्कुरैः
सदाऽहमानन्दरसार्णवे स्थितः ॥

इत्येवं प्रियां प्रति प्रियः तस्याः पाणिसौन्दर्यं तत्कृतनखक्षताङ्कुरसौन्दर्यं वर्णयन् तया कृतनखक्षताङ्कुरजन्यानन्दपारावारे मज्जितः इति कथयति ।

अपि च—

पाणिस्पर्शेन ते देवि
शरीरं पुलकाञ्चितम् ।
नित्यं ते संगमान्नूनं
प्राणाः पुष्टिं प्रयान्ति च ॥

सुन्दरपाणिस्पर्शेन समस्तरोगाः अपास्यन्ते, अपि च शरीरं पुष्टिं मनः तुष्टिं च प्राप्नुतः।

## १४७. सिंहेन्द्रमध्याभिरामं तनुमध्यसौन्दर्यम् ।

सिंहेन्द्रमध्याभिरामतनुमध्यसौन्दर्यभासितायाः युवत्याः देहालिङ्गन-सौख्यम् अत्यन्तसुन्दरमिति मध्ये क्षामानां मन्दयानानां युवतीनाम् उपरति-चातुर्यं सुन्दरं भवतीति परमसुखदमिति च तज्ज्ञानाम् अभिप्रायः। तनुमध्यसौन्दर्यं सुन्दराकृतीनां लक्षणम्।

तद्यथा–

उरोजभारात् बहुनामितं तत्
नितम्बबिम्बात् पृथुलात् विभीतम् ।
स्थातुं न शक्नोमि बलोद्धतानां
मध्येऽहमित्याशु ययौ हि मध्यम् ॥

लोके बलवतां मध्ये वसनं कठिनं भवति दुर्बलानाम् इति पीवरोन्नत-उरोज-भारेण उद्धृतं बलवन्तम् अपि च बलवत्तरं पृथुलनितम्बं विलोक्य द्वयोर्मध्यस्थं मध्यं भीतं यत्र कुत्र वा दाधाव । अर्थात् तनुमध्यम् अत्यन्तकृशमिति ज्ञायते । इदमेव तनुमध्यसौन्दर्यम् ।

## १४८. इतस्ततः स्पन्दनमेव पृथुलनितम्बसौन्दर्यम् ।

मत्तकाशिन्याः चालने पृथुलनितम्बस्यैकैकस्पन्दनं स्वर्गसुखारोहण-सौन्दर्यप्राप्त्यर्थं सोपानमिवाभाति । कामराज्यप्रशासनवेलायां नितम्बस्पन्दनोपरि उपविश्य मदनसदनकदनकरणे अत्यन्तसुखं भवतीति तदैव पृथुलनितम्बस्य सौन्दर्यं ज्ञायतेति वात्स्यायनमतानुगानां वाग्विजृम्भणम् ।

इतस्ततः चञ्चलचालने रतं
नितम्बबिम्बं पृथुचक्रभासुरम् ।
विशालरूपं मदनाय सौख्यदं
रतिक्रियायां प्रवदन्ति सुन्दरम् ॥

अपि च– यशोधरामहाकाव्यात्

तथा तथा चालनचञ्चलं परं
यशोधराश्रोणिरथाङ्गवर्तुलम् ।
करोति यूनां हृदयं तु रञ्जितं
मनोजभावोच्चयखेलनायतम् ॥

पृथुलनितम्बोपरि कामराज्यशासनमेव शासनमिति कामराज्यशासनतज्ज्ञानाम् अभिप्रायः । समष्ट्यां सुन्दरावयवनिर्माणाकृतिरेव सौन्दर्यम् । तच्च

सौन्दर्यं पूर्वजन्मसंस्कारजनितप्रभावसंपृक्तात्मसौन्दर्यावच्छिन्नं दिव्यं शोभते। तस्मात् सर्वत्र सौन्दर्यमेव तदेव सत्यम्।

## १४९. सकलजनान्दकारकं मर्मावयवसौन्दर्यम्।

मर्मावयवसौन्दर्यं सर्वेन्द्रियसुखानामायतनम् अस्ति। मर्मावयवसौन्दर्याज्जनितानन्दः एव मानवस्य सुखजीवनहेतुः भवति। सर्वदेवतानां मानवानां राक्षसाणाम् अन्यप्राणिनां चेतनाचेतनानां प्रजननकर्म सृष्ट्यां मूलकन्दः भवति। सर्वप्राणिनां चेतनाचेतनानाम् आहारनिद्राभयमैथुनानि सहजातानि सन्ति। यदि पशुपक्ष्यादीनां श्रृङ्गारः वर्ण्यते काव्येषु सः रसाभासः भवति। अपि च देवतानां मानवानां श्रृङ्गारचेष्टादिकं स्वभावोक्तिप्रमाणेन यथातथं वर्ण्यते लिख्यते वैपुल्येन विश्लेषणात्मकं कथ्यते तत् अनौचित्यं, स कविः श्रृङ्गारप्रियः औचित्यज्ञानविहीनः इति च तं प्रति, तस्य काव्यं प्रति टीकां कुर्वन्ति। तदानींतनकाले क्षेमेन्द्रादयः तथाकथनं वैपुल्येन कामक्रीडावर्णनं सर्वथा अनौचित्यमिति चर्चाम् अकुर्वन्। सर्वदा सर्वत्र सर्वमपि कालमानप्रमाणेन आचारव्यवहारादिकं जगति संचलति। ह्यस्तनम् अद्य असुन्दरं भवति, अद्यतनं श्वः, नोचेत् परश्वः असुन्दरं भवति।

कालप्रवाहे प्राचीनम् अर्वाचीनं च मिलित्वा हस्तावलम्ब्य समानगत्या परस्परं भावयन्तः श्रेयसा चलतः। सत्यमेतत् कालप्रवाहे वहतां नः अनङ्गीकार्यं भवतीति न। मदनस्थानस्मरणेन दर्शनेन तस्य वर्णनश्रवणेन स्त्रीपुरुषौ सहजभावेन यत्रकुत्रापि भावसौन्दर्ये तन्मयीभूतप्रपञ्चे निवसन्तः इव आनन्दमनुभवन्ति। आनन्दानुभूतिः चेतनाचेतनानाम् अपि भवति। "आनन्दादेव इमानि भूतानि जायन्ते", किन्तु सौन्दर्यदर्शनचक्षुः मानवानां केवलं भवति।

वेदान्तिनां मतानुसारं सर्वं यत् दृश्यं तन्नश्यं भवति। अपि च शीर्यते इति शरीरम्. शरीरं नश्वरमिति च तदुक्तिः। अपि च शरीरं वसागन्धरक्तास्थिमज्जातन्तुभिः भरितं दुर्गन्धपूरितमिति सर्वेषामनुभवैकवेद्यम्। तथापि उपर्युक्तसर्वविषयविदितोऽपि वृद्धोऽपि समक्षमायातं सुन्दरं वस्तु विलोक्य वर्णयितुं प्रारभते। तत् वस्तु प्राप्तुं समीहते। एतत् किमर्थं भवति, कथं भवति। तस्योत्तरं सौन्दर्यस्य माहात्म्यमेवेति कथनं भवति। अत्रैव सृष्टिरहस्यं विद्यते।

कलाकारेषु चित्रकाराः शिल्पकाराः कुड्यचित्रेषु तक्षितप्रस्तरशिल्पेषु पवित्रदेवालयेषु चित्राणां शिल्पानां सर्वावयवान् सुन्दरान् निर्माय दर्शयन्ति । सौन्दर्यानुभोक्तारः प्रत्यहं तादृशशिल्पानां चित्राणां विलासलसितसर्वावयवान् मर्मस्थानविशेषान् दृष्ट्वैव सकामं तेषां सौन्दर्यपानं कुर्वन्ति । किन्तु कलाकाराः कवयः नव्यसृष्टिकर्तारः एतावत्पर्यन्तं विशदं मर्मस्थानं न वर्णयामासुः कुत्रापि स्वीयकाव्येषु । तदानींतनकाले तदनौचित्यमिति ते अजानन् । अधुनातनकाले समाजव्यवस्था अस्तव्यस्ताऽभूत् । कालधर्मानुसारं चलनं योग्यं भवति । तस्मात् मर्मस्थानवर्णनाया अनौचित्यभीतिः कुतः । विचार्यमाणे शरीरे अनौचित्यास्पदस्थानानि बहूनि सन्ति । शरीरे सौन्दर्यमधोधः असौन्दर्यं गुप्तं व्यवहरति । तथापि तानि स्थानानि पूर्वकवयः सुन्दराणीति वर्णयामासुः, सर्वमसुन्दरं दूरीकृत्य । तत्कथं विशदयामि । सिङ्घाणभरितनासिकासौन्दर्यं, दूषिकादूषितनेत्रसौन्दर्यं, दुर्गन्धभरितं दन्तप्रभाप्रभासितं मुखस्याधरोष्ठपानं, कन्दुकाकारमांसलस्तनद्वयम् इत्यादि सर्वं सर्वे कवयः नैकोदाहरणैः उपमानोत्प्रेक्षाद्यलङ्कारैः वर्णयन्ति वर्णयिष्यन्ति च । तत् वर्णनादिकम् अहमहमिकया रसिकाः पठित्वा हा किं काव्यं किं सौन्दर्यं कोऽयं कविः इति आनन्दातिरेकेण ननर्तुः नर्तन्ति नर्तिष्यन्ति च । अनुपदमेव सौन्दर्यदर्शनानन्तरं सिङ्घाणदूषिकादुर्गन्धानां गन्धः तेषां समक्षं भवत्येव किन्तु तं गन्धम् अधरीकृत्य सौन्दर्यमेव ते वारंवारं भावयन्ति । तत्र तेषां जुगुप्साभावः न भवत्येव यतः हृदयाह्लादकारित्वं सौन्दर्यानन्दप्रदानकारित्वं च विद्येते ।

सृष्टिमूलभूतस्थानं सुन्दरस्थानमिति वर्णनायां किमनौचित्तं जुगुप्साभावं च विद्येते । तदपि शरीरे मुखस्थानमेव । अत्र नवीनसमाजव्यवस्थायां सर्वेऽपि सर्वा अपि षोडशवर्षादारभ्य त्रयोदशवर्षादारभ्य च यथाक्रमं लौकिकव्यवहारं लैङ्गिकव्यवहारादिकं स्वेच्छासमाजे गुप्तरूपेण प्रकटनरूपेण वा समाचरन्त्येव प्रायेण प्रतिशतं पञ्चाशत्प्रमाणपर्यन्तम् युवतियुवकाः । सर्वे युवकाः सर्वाः युवत्यः मर्मावयवस्थानमुद्दिश्य जानन्ति तस्य सौन्दर्यानन्दानुभूतिं चानुभवन्ति । अस्मिन् सन्दर्भे अस्यां समाजव्यवस्थायां विलिखितां कवीनां लेखकानां बन्धनं किमर्थं मर्मावयववर्णने । तत् मर्मस्थानवर्णनं सुतराम् अनौचित्यास्पदं न भवति ।

एकदा समाजे स्त्रीणां वेषभूषा शरीरावयवसंदर्शिनी मा भूयादिति नियमः अवर्तत । अधुना स नियमः शिथिलितः अपि च स्वेच्छया कचकुचभारान्

युवत्यः दर्शयन्ति रथ्यासु, किं वक्तव्यं अतःपरं। कालक्रमेण मदनसदनसंदर्शनमपि अधिकप्रमाणतरं रथ्यास्वेव भविष्यति अस्मिन् विषये न कोऽपि संशयः भवति।

खाद्यपदार्थेषु अपि ज्ञाताज्ञातरूपेण केचनपदार्थाः मर्मावयवरूपाकारिताः सन्ति। तान् पदार्थान् यौवनं यूनः अत्यन्तरोचकं लिह्यन्ति रसनया ओष्ठ्याभ्यां मुखे धरन्ति आचमन्ति। सृष्टिस्थानमेव सर्वत्र रूपान्तरेषु विलसति। तस्मात् सृष्टिस्थानवर्णनम् औचित्यपूर्णम्। अपि च काव्यस्य निसर्गत्वं सिद्ध्यति। जगति सर्वसमारम्भाः मदनसदनकदनकुतूहलजनितानन्दसौन्दर्याय केवलं भवन्ति। जीवने अशनानन्तरम् इदमेव प्रामुख्यं भवति। निर्गतवयसां वृद्धानां परमसंन्यासिनां नपुंसकानाम् अल्पकामतृष्णाभासितानां सुन्दरमपि असुन्दरं द्योतते। दशवर्षादारभ्य आमरणं सौन्दर्यदृष्टिः कामविकारः जगति मानवेषु वर्तते। स कामविकारः वयोवेगे यौवने विना च विचिकित्सां प्रवहति। वयसि गते शरीरे कामः अन्तर्लीनः विनावेगं कार्यकरणे असमर्थः भवति। किन्तु भावना अस्त्येव। ततः वार्धक्ये कामतृष्णा हसिता शरीरे प्रेङ्खती वर्तते। तथापि वयोमर्यादानुसारं तां कामतृष्णां पिहितां विदधाति मानवः। सः मानवः बहिः सज्जनः इव चरित्रवानिव प्रवर्तते। यदि एकान्ते या काचन युवती प्रत्यक्षं समायाति नयनेन्द्रियैः दर्शंदर्शं चतुरशीतिबन्धनैः एकस्मिन् एव क्षणे दृष्टिमैथुनं करोति। एतादृशाः जगति शते एकोनशतसंख्याकाः सन्ति। ते एव सौन्दर्यमीमांसां तृणाय मत्वा विमर्शयिष्यन्ति। किन्तु रहसि ते एव गूढं पदेपदे पठिष्यन्ति मदनसदनभावनाजनितसौन्दर्यस्यानन्दमनुभवन्तः स्वप्नान् विलोकमानाः स्वपिष्यन्ति च। सौन्दर्यदृष्टिः अन्ततः परब्रह्मसौन्दर्ये परिणमति। केवलं दिव्यसौन्दर्यं पवित्रभावं जनयति। अन्यसौन्दर्याणि शनैःशनैः कामभावनां संजनयन्ति काममार्गपथानुयायिनः च कुर्वन्ति मानवान्। जगति सर्वमपि जीवितं कामासक्तं कामायत्तं च भवति। आदानप्रदानमपि कामेन भवति जगति। सर्वमपि सत्यमेतत् वेदे प्रतिपादितं विवाहमन्त्रेषु कन्यादानसमये केचन मन्त्रा सन्ति। तद्यथा

देवस्य त्वेति मन्त्रे अन्ततः 'कामः कामाय। कामो दाता। कामः प्रतिग्रहीता। कामं समुद्रमाविश। कामेन त्वा प्रतिगृह्णामि। कामैतत्ते। एषा ते कामदाक्षिणा' इति। सर्वमिदं विश्वं कामे प्रतिष्ठितम्। सौन्दर्यस्य भावनामन्थनेन

कामरूपता समायाति। तदा मनसि कामः जायते। अनुपदमेव कामभावनया रतिकरणभावना जायते। रतिक्रियानन्तरं तस्याः आनन्दः समुद्भवते। आनन्देन ब्रह्मसंदर्शनं ब्रह्मसंदर्शनेन दिव्यसौन्दर्ये समाप्तिः एवं सौन्दर्यस्य प्रगतिः विद्यते। तस्मात् रतिसौन्दर्यमुद्दिश्य सविस्तरलेखनं योग्यमेवेति अभिप्रायेण विशदीकृत्य प्रस्तुतांशं विशदीकरिष्यामः।

## १५०. भौतिकसौन्दर्येषु परमोत्तमं रतिसौन्दर्यम्।

सर्वसौन्दर्येषु रतिसौन्दर्यं महत्त्वायते जगति इति सुरतरससौन्दर्यद्रष्टॄणां मतम्। यतः रतिशब्देनैव भावसौन्दर्यं कामनासौन्दर्यं च ओजस्विनौ भवतः। तस्मिन् भावसौन्दर्ये शरीरधारिणः विहारं विधाय प्रशान्तमनस्काः भवन्ति। रतिसमये स्त्रीपुरुषा स्वीयभावसौन्दर्येण रतिसाम्राज्ये सौन्दर्यं परिकल्पयतः। तस्मिन् रतिकाव्ये परस्परं शृङ्गारप्रकरणं प्रदर्शयतः। तौ तदा पुरतः विद्यमानं भौतिकप्रपञ्चं विस्मृत्य तौ कुत्र स्थितौ किं कुर्वाते इति रसाधिक्येन केवलं स्वीयकृतरतिसौन्दर्यप्रपञ्चे विहरतः। तस्मात् द्वयोः मनसि परस्परभावचित्रणा सुखचित्रणा शीत्कारचित्रणा नखक्षतदन्तक्षतरचनया मिलित्वा रतिं सौन्दर्यमयीं कुर्वन्ति। तत् मिथुनं मैथुने लग्नं सर्वं जगत् विस्मृत्य सौन्दर्यभूयिष्ठे रतिसौख्ये मज्जनोन्मज्जनं कुर्वत् विराजते। तस्मात् रतिसौन्दर्यं सौन्दर्याणामायतनम्। अनूह्यं रतिसौन्दर्यं केचन सौन्दर्यज्ञाः एव जानन्ति न त्वन्ये। रतिसौन्दर्योदाहरणानि मत्कृतयशोधरामहाकाव्यात् दर्शितानि सन्ति।

**संयोगकाले स्मरभावचित्रैः**
**अज्ञातशीत्काररवप्रभूतैः।**
**उद्रिक्तचेष्टाकृतबाहुबन्धैः**
**विरेजतुः फूत्कृतनागबन्धैः॥**

यशोधरागौतमौ अन्योन्यबाहापरिरम्भणैः अविदितरतिसुखशीत्कारैः उद्रिक्तचेष्टादिभिः फूत्कारविराजितनागबन्धैः संयोगकाले रतिमन्मथाविव विरेजतुः।

अत्र भूपः गौतमः रसभावनाब्धिं वितीर्य रतिसुखसौन्दर्यमन्वभूदिति ज्ञायते।

अपि च

विलासिनी कामनिमीलिताक्षी
मग्ना दृढं सा सुरतप्रसङ्गे ।
चकार रम्यं मणितं सरागं
पारावतीरावमिवात्मतृप्त्या ॥

अत्र सुरतसौख्यसौन्दर्ये यशोधरा मत्ता सरागं मणितरूपेणात्मतृप्तिं प्राकट्य रतिसुखसौन्दर्यमन्वभूदिति ज्ञायते । मणितं कलरवस्वनमिव भवतीति मणितरवतज्ज्ञानां मतम् ।

अपि च

अन्योन्यबाहापरिरम्भणैश्च
नितम्बबिम्बोपरिलुण्ठनैश्च ।
तौ दम्पती प्रेमरसे निमज्य
वितेरतुः सौख्यपयोधिमाशु ॥

संसारसागरे निमज्जितमानवाः सर्वे रतिसौख्यं यथायोग्यम् अनुभवन्ति । किन्तु रत्यां विद्यमानं प्रद्योतमानशरीरसौन्दर्यं मानसिकसौन्दर्यं शब्दसौन्दर्यं भावसौन्दर्यं चाल्पसंख्याकाः एव स्त्रीपुरुषाः जानन्ति तस्मात् रतिसौन्दर्यम् अनुभवितुं सर्वेऽपि शक्ताः योग्याः न भवन्ति । रतिसुखसौन्दर्यानुभूत्यर्थं शरीरारोग्यताकलादृष्टिभावावत्यन्तावश्यकौ भवतः । केचन दैनंदिनकार्यमिव रतिं कुर्वन्ति । तथाकरणे यन्त्रवत् ते रतिसौन्दर्यानभिज्ञाः भवन्ति । अन्योन्योत्कटभावनाकलितं तदातदाकृतरतिप्रपञ्चे सौख्यं सौन्दर्यं च दृश्येते न तु दैनंदिनरतिसौख्ये ।

## १५१. मृदुलपीवरमांसलास्निग्धत्वमेवोरुसौन्दर्यम् ।

करभाकृतिभासितं स्निग्धमृदुलमांसलपूर्णत्वात् पीवरितं सुंदरं परिदृश्यमानम् ऊरुसौन्दर्यमेव सौन्दर्यमिति रसिकभणनम् ।

ऊरू मांसलपूर्णौ च
स्निग्धलावण्यभासितौ ।
यदि स्तः सपदं कामी
भजते रतिभावनाम् ॥

अपि च - कथम् ऊरुसौन्दर्यं मानवप्रकृतिं रञ्जितं करोति, कथं मानव-प्रकृतिः सौन्दर्यदर्शनानन्तरं परिवर्तनां प्राप्नोति तत् दर्शयेयम्। कश्चन माषान् क्रेतुं विपणीं गतः। तत्र एका युवतिः सुन्दरा प्रेक्षणीया भूमावुपविश्य प्रस्थैः माषान् माति। तस्याः उपवेशने मांसलोरुस्निग्धसौन्दर्यं स युवा विलोक्य माषमानं विस्मृत्य तस्याः ऊरुद्वयं पश्यन् आस्ते। तस्याः ऊरुदर्शनेन सः विचलितान्तरङ्गः बभूवेति ज्ञायते।

भामा भूमावुपाविश्य
प्रस्थैर्माषान् प्रमाति च।
क्रेताऽविलोक्य मानं तु
भामोरू पश्यतीहया॥

ऊरुसौन्दर्यमेव रतिसमये परमसुखं आनन्दरूपसौन्दर्यं प्रजनयति। ऊरुदर्शनमेव रतिकर्मणि व्यक्तिं प्रचोदयति

अपि च यशोधराकाव्यात् उद्धृतम् -

ऊरू सुतन्व्याः सुषमाभिरामौ
अपूर्वरम्याकृति चारुरूपौ।
नितान्तरत्यन्तसुखान्तकाले
लतान्तशय्येव वितेनतुस्तौ॥

यशोधरायाः सुषमाभिरामावूरू रत्यन्ते गौतमाय लतान्तशय्यारूपं प्रापतुः। तावत्यन्तसुखकारकौ बभूवतुः इति तात्पर्यम्।

अपि च -

स्निग्धत्वरम्भास्तम्भाभ्यां
रम्योरू सततं समम्।
भ्राजेते यदि रूपाभ्यां
सौन्दर्यं कथ्यते ध्रुवम्॥

सौन्दर्यात् ऋते अन्यत् किं विद्यते जगति आनन्दकारकम्? तस्मात् सौन्दर्यं सर्वोत्तमं भवति शाश्वतं च भवति।

## १५२. मांसलं वृत्तानुपूर्वं स्निग्धमनोहरं जङ्घासौन्दर्यम् ।

उद्धृतवसनात् दृष्टं मांसलं वृत्तानुपूर्वं स्निग्धत्वेव मनोहरं प्रध्मामिव दृश्यमानं जङ्घासौन्दर्यं मनोमोहनकारणं भवति ।

तूणीररूपौ मृदुमांसलौ तौ
जानू तदीयौ कुरुतः प्रकामम् ।
संचारयोग्यौ नटनानुरूपौ
मनोजभावं मदमज्जितानाम् ॥ यशोधराकाव्यात्

यशोधरायाः जानू तूणीराकारभ्राजितौ । संचारयोग्यौ अपि चानेकनटनानुरूपौ मदमज्जितानां युवकानां मनोजभावं जनयन्तौ भवतः ।

अपि च

वृत्तानुपूर्वे जङ्घे ते
काहळोपमिते यदि ।
भवतस्ते सदा रम्ये
भावसौन्दर्यमूलके ॥

वृत्तानुपूर्वसुन्दरजङ्घासंदर्शनेन मदनदण्डः तत्क्षणं रसनिष्यन्दनसुन्दरमुखेन नर्तते इति अनुभवज्ञानां मतम् ।

## १५३. सुन्दराङ्गुलिपार्ष्णिसमञ्चितं पल्लवारुणाभं पादसौन्दर्यम् ।

पदारविन्दश्रियं विलोक्य रसिकः बम्भरायमानमानसः भूत्वा चरणपङ्कजे गुञ्जन् पतिष्यतीति सौन्दर्याराधकानां मतम् । पादस्याकृतिविशेषः सुन्दराङ्गुलिपङ्क्तिः सुन्दरपार्ष्णिभागश्च अपि च चलने विलासाः सर्वे मिलित्वा एकमत्यन्ताकर्षणात्मकदृश्यपूर्णवातावरणं परिकल्प्य रसिकान् तुदन्तः विलसन्ति । तद्यथाः—

चीराञ्चलागोपितपादपद्मा
तदातदा व्यक्तपदार्धभागा ।
ययौ चलन्ती हृदयं गृहीत्वा
निखाय मां तत्र पदे पदे सा ॥

कश्चन स्वमित्रं वार्तयति—अरे सखे ह्यः सायं मया एका सुन्दरी दृष्टा आपणे वस्तूनि क्रीणन्ती। सा अत्यन्तसुन्दरीति कथने वर्णने च मदीयशब्द-कोशे शब्दाः न सन्ति। किन्तु कविभावनया अहं विशदीकरिष्यामि तदीयचालन-मुद्दिश्य पादसौन्दर्यमुद्दिश्य च।

तदीयपादौ चीराञ्चलेन पिहितौ पद्मसदृशौ आस्ताम्। तस्याः चलनसमये पादौ तदा तदा अर्धभागौ दृष्टौ क्वचित् क्वचित् पूर्णतया पिहितौ। तस्याः चालनम् अतीवसौकुमार्यभरितम्। चिरमहं तां पश्यन् तस्याः चालनं पश्यन् तत्रैवासम्। सा वस्तूनि क्रीत्वा मदीयं हृदयं च गृहीत्वा सविलासं पादारविन्दौ भुवि निक्षिपन्ती प्रतिनिवृत्ता। अहं तत्रैव तस्याः पदे पदे पतितः अभवम्। सा मां तत्र तदीय-पादतले निखाय जगाम। अहं जीवन्नपि मृतः इति। अत्र तस्याः पादसौन्दर्यं पादनिक्षेपणे सौन्दर्यं चालने च विलासादिकं व्यक्तीकर्तुम् असमर्थो जातः। त्वमेव तव भावनया तस्याः सौन्दर्यं जानीहि। अतःपरं नाहं शक्तः किमपि वक्तुम्।

अपि च यशोधरामहाकाव्यात्

**लाक्षारसेनाञ्चितपादपङ्कजा**
**भूमौ विनिक्षेपणरागरञ्जिता।**
**प्रायेण शङ्कां कुरुते विलोकिनां**
**सा पद्मिनीजातिरिति प्रहर्षिणी॥**

अपि च —

**नखालिसंसक्तपदाङ्गुलीनां**
**प्रभाप्रदीप्तं मृदुपार्ष्णिभागम्।**
**स्थलारविन्दश्रियशोभमानं**
**सौन्दर्यपादं प्रवदन्ति सन्तः॥**

यशोधरापादौ भूमौ निचिक्षिपे। तदा तस्याः पादौ रागरञ्जितौ बभूवतुः तस्मात् अत्रात्यन्तसौकुमार्यं व्यज्यते। अनेन हेतुना सर्वे ताम् आमनन्ति सा पद्मिनी जातिजा इति। पादसौकुमार्यम् अत्यन्तमहत्त्वस्थानं प्राप्नोति सौन्दर्यशास्त्रे। सुन्दरयुवत्यः पादताडनेन अशोकादयः पल्लविताः पुष्पिताश्च भविष्यन्तीति कविसमयः। अतःपरं किं वक्तव्यं पादसौन्दर्यं प्रति।

## १५४. अरुणारुणकान्तिविराजितं नखसौन्दर्यम् ।

अरुणप्रभाभासितनखसौन्दर्येण रसिकहृदयं नखक्षतव्रणाङ्कितमिव भवति। नक्षत्रस्फुरणमिव नखाः कान्तिभिः द्योतन्ते सुन्दरयुवतिपादाङ्गुलीनाम्।

अनन्तहारावलितारकालिः
विराजमाना नभसि प्रकामम्।
आलोक्य तत्पादनखालिशोभां
ह्रिया सिषेवे नखराजिमेत्य॥

यशोधरामहाकाव्यात् समुद्धृतम्।

अपि च

प्रवालकान्त्या संछन्नां
पादपद्माङ्गुलिश्रियम्।
वदन्ति नखसौन्दर्यं
मनोज्ञाकृतिभासुराम्॥

नखशिखापर्यन्तं विद्यमानं प्रवाहरूपे प्रवहन्तं शरीरावयवेषु विशिष्टरूपेण विराजमानं हृदयाह्लादकारकं सुन्दरात्मगर्भितं सौन्दर्यम्।

## १५५. सुखानुभूति–भावप्रचोदकं संधिबन्धसौन्दर्यम् ।

लोके परिदृश्यमानं सौन्दर्यम् असौन्दर्यप्रातिपदिकावच्छिन्नम् भवति। तत्त्वतः शरीरसंधिबन्धाः असौन्दर्यपूर्णाः सन्ति। प्रकोष्ठसन्धिभागः भुजमूलसन्धिभागः जान्वोः सन्धिभागः कटिसन्धिभागः ऊरुमूलसन्धिभागः इत्यादयः सर्वे सन्धिभागाः असौन्दर्यगर्भिताः अपि मांसलाः भूत्वा सुन्दरवल्गुलेपिताः अनिर्वचनीयसौन्दर्यप्रकाशिताः भवन्ति। कासांचन केषांचन अत्यन्तसुन्दराणां शरीरसन्धिबन्धाः सम्यक् मांसलत्वचा पिहिताः कापि अनिर्वचनीयाभिख्यापरिप्लुताः सुन्दरच्छविनिष्यन्दमानाः भान्ति। यदि सन्धिबन्धाः अनेन प्रकारेण स्युः तर्हि सौन्दर्ये आकर्षणात्मकता भविष्यति। तस्मात् सुखानुभूतिभावप्रचोदकं सन्धिबन्धसौन्दर्यं भवति।

सर्वाङ्गसन्धिबन्धास्तु
यदि लावण्यराजिताः ।
तादात्म्यभावसंदाताः
ते हि सौन्दर्यभूषिताः ॥

## १५६. आशुभावनाऽऽनुगुण्यं हेलयाऽवयवचालनमेव सौन्दर्यम् ।

सरसचञ्चलावयवनिर्माणमेव भावप्रकटनानुरूपलोचनान्तत्वमेव सौन्दर्यमिति सामान्यसम्मतिः । तद्यथाः—

हेलाविलासचलनैर्मृदुलाङ्गभाभिः
भावप्रकाशचटुलैः नयनान्तदृग्भिः ।
मुद्राभिराममधुरैः सुशयाङ्गुलीभिः
संचालनावयवभासुरमेव रम्यम् ॥

यस्मिन् शरीरे भावप्रकाशनदक्षाः सुन्दरलोचनान्ताः अपि च मुद्राभिराममधुरशयाङ्गुलिसंराजिताः हेलाविलासचालनरम्याः मृदुलावयवाः संराजन्ते तत्रैव सौन्दर्यं मूर्तीभूतमिति कलाभिज्ञानां मतम् ।

## १५७. सौन्दर्यम् अमृतं भुवि ।

सौन्दर्यं चतुर्दशभुवनेषु अमृतं भवति । तदेव मानवानां दिव्यत्वम् अमृतत्वं जनयति ।

सौन्दर्यममरं भाति । रोगिणः अपि सौन्दर्यदर्शनेन चुम्बनेन आलिङ्गनेन स्पर्शनेन आघ्राणेन ऊहेन लेहनेन नीरोगिणः भवन्ति । सौन्दर्यचुम्बनेन देहरक्तनालानि धमन्यः वाहिन्यः विचलिताः भवन्ति । तस्मात् देहे रक्तप्रवाहः रोगिणं नीरोगिणं करोति । प्राणिनः सौन्दर्यानुभवेन दीर्घायुष्मन्तः भवन्ति, तस्मात् सौन्दर्यं परमौषधमुच्यते, इति सौन्दर्यमीमांसकानां मतम् । सौन्दर्यानुभवेन प्राणिनाम् अवर्णादारभ्य क्षपर्यन्तं विद्यमान-अक्षय-जीवनसत्त्वगुणाः लप्स्यन्ते । जगति सर्वोऽपि यथाकथंचित् सौन्दर्यानुभाक्ता भवत्येव ।

## १५८. असौन्दर्यादेव सौन्दर्योत्पत्तिः ।

यथा सौन्दर्यं वरीवर्ति तथैव असौन्दर्यम् अपि वरीवर्ति। सौन्दर्यम् असौन्दर्यं च कथं भवतः। नोचेत् असौन्दर्यमेव परिणामरूपेण सौन्दर्यवत् प्रतिभाति उत सौन्दर्यमेव असौन्दर्यवत् प्रतिभाति? एतत् अनूह्यं प्रति भाति। किन्तु जगति वर्तते तत् एकमेव। तत् अद्वैतं सूर्यान्तर्गतसन्ध्यातेजः एव। वातावरणपरिणामात् सूर्यप्रकाशस्य प्रभावात् त्रिसन्ध्यामूलकत्वात् जगति भू-परिवर्तनया नोचेत् परिभ्रमणया वा षड्ऋतुमूलकत्वात् सर्वं भौतिकं सौन्दर्यं परिणमति। तद्वत् आहारविहारव्यवहारपरिणामात् सर्वमपि भौतिकसौन्दर्यं परिणमति। भूमौ सारनिस्सारमूलकत्वात् अतिवृष्टि-अनावृष्टिमूलकत्वात् वृक्षलता-व्रततीनां सौन्दर्यं परिणमति। सर्वभौतिकसौन्दर्यस्य मूलकारकः त्रयीतनुरेवेति सूर्योपासकानां मतं, तदेव वैज्ञानिकानां मतं राजते।

आन्तरिकसौन्दर्यं तु वंशे परम्परागत-आचारव्यवहारैः विद्याभ्यासेन पूर्वजन्मकृतसद्वर्तनमाहात्म्येन च सुन्दरभावनाऽऽनुगुण्यवाचकेन शान्तदये-त्यादिगुणगणैः समलङ्कृतं प्रतिभाति। एतादृशगुणमण्डिताः शरीरैः सुन्दरं न दृष्टवन्तोऽपि सर्वलोकं स्वीयभावनया करुणादयादिभिः सर्वप्रपञ्चं समाकर्षन्ति। एतादृशाः आन्तरिकसौन्दर्येण भरिताः भवन्ति। यथा च वृक्षाणां कुसुमेषु केषांचन सौन्दर्यमेव दृश्यते तत् नयनानन्दकरं भवति तद्वत् बाह्यसौन्दर्य-धारिणः। यथा गन्धिलकुसुमानि प्रायेण द्रष्टुं सुन्दराणि न भवन्ति तथापि ते सर्वां सृष्टिं समाकर्षन्ति। तद्वत् आन्तरिकसौन्दर्ययुक्तानां सौन्दर्यं भवति। पूर्वजन्मसंस्कारः गन्धवत् विभाव्यते लोके।

## १५९. आध्यात्मिकसौन्दर्यान्तर्भूतं शरीरसौन्दर्यं सर्वोत्तमसौन्दर्यम्।

बाह्यान्तरङ्गिकसौन्दर्यसंपृक्तं दिव्यपरमात्मस्वरूपभावनासमुपेतं सौन्दर्यं सर्वं भुवनत्रयं समाकर्षतीति।

यथा महापुरुषाणां बाह्यान्तरङ्गिकाध्यात्मिकसौन्दर्यमूर्तीनां प्रभावात् तथैव पुष्पेषु मृगेषु द्विपदेषु वृक्षेषु च बाह्यान्तरिकदिव्यात्मस्वरूपं द्योतते। तस्मादेव श्रेष्ठत्वं सर्वजातिषु अस्मदीयप्राचीनसूरिभिः तरतमभावप्रकारेण

निर्णीतमासीत् । ततः सौन्दर्यस्य परिपूर्णत्वं न कुत्रापि दृश्यते जगति दिनेशमन्तरेण सर्वत्रापि प्रकृत्यां सौन्दर्यासौन्दर्यविच्छिन्नं रमणीयवस्तु संदृश्यते। यथा पुंसि स्त्रीलक्षणानि स्त्रीषु पुरुषलक्षणानि संदृश्यन्ते, तद्वत् सर्वमपि प्रपञ्चं सदसत् सुन्दरासुन्दरं प्रकृतिपुरुषसंमिश्रितमेव । तत् सर्वं न्यूनाधिक्यभावेन सूर्य-प्रकाशमूलकत्वात् कचित् सुन्दरं कचित् असुन्दरं संदृश्यते । किन्तु सर्वमपि एकमेवाद्वितीयम् । इदं सुन्दरं इदमसुन्दरं इत्येतत् वैयक्तिकभावनाविशेषेण कचित् अविदितपूर्वजन्मस्मृतिप्रभावेण च समाकर्षणं भवति ।

## १६०. पुरुषाणां पुंस्त्वमेव सौन्दर्यं, न तु स्त्रीलक्षणसमन्वितत्वम् ।

कवयः सर्वे जगति स्त्रीसौन्दर्यमेव वर्णयन्ति न तु पुरुषाणामिति केषांचनोक्तिः । तत् साधु भणितमेव । तदुत्तरयाम्येवं यत् जगति सर्वेऽपि कवयः एव कवयित्र्यः अतीव विरलाः । ताः प्रादेशिकभाषासु पुरुषम् अत्यन्तसहज-सुन्दरमिव वर्णयामासुः । पुरुषः निर्विकारः निरञ्जनः । प्रकृतिः रमणीया । सर्वमेतत् जगत् पुरुषप्रकृतिविलसितमिति सांख्यानां मतम् । प्रकृतिः जडरूपा । पुरुषः जडरूपप्रकृत्यां चैतन्यं जनयति । पुरुषः सूर्यः स्त्री सर्वंसहासमाना । सूर्यः स्वकरैः सर्वंसहां चैतन्यवतीं करोति । तद्वत् पुरुषः स्त्रियं चैतन्यवतीं करोति । ततः प्रकृतिः सुन्दरं परिवर्तते । प्रकृत्याः सहजसौन्दर्यं नास्ति । प्रकृत्याः सौन्दर्यं सूर्यपुरुषेण संप्राप्तम् । पुरुषः सहजसुन्दरः । पुरुषस्य सौन्दर्यं नास्ति । पुरुषस्य धीरोदात्तता गम्भीरता च सहजे भवतः । यदि पुरुषे एते द्वे स्तः सः अत्यन्तलोभनीयः प्रेक्षणीयः भवति । पुरुषस्य पीनवक्षस्त्वं विशालाक्षित्वं शरीर-मानसिकोन्नतत्वं निर्विकारत्वं पुरुषकारिता पौरुषमित्यादिगुणा आवश्यका भवन्ति, न तु सुन्दरत्वम् ।

यदि सर्वाङ्गसुन्दरी स्त्री, मूर्तीभूतपुरुषकारशोभितः पुरुषः, द्वावपि अस्म-त्समक्षमायातौ, तयोः पुरुषः सुन्दरः लोभनीयः कमनीयः संदृश्यते । पुरुषसौन्दर्यं नैसर्गिकम् । लोके वयं सर्वदा अस्मत्समक्षं पश्यामः यत् पुरुषः सहजसुन्दरः इति । तत् कथमिति उदाह्रियते ।

वृषभः सुन्दरः धेन्वाः । मयूरः सुन्दरः मयूर्याः । कुक्कुट्याः सुन्दरः कुक्कुटः । गजः सुन्दरः करिण्याः । तस्मात् पुरुषसौन्दर्यमुद्दिश्य विपुलीकरणम्

अनौचित्यमेव। पुरुषाणां औन्नत्यं दृढशरीरत्वं पीवरवक्षस्त्वं विशालाक्षित्वम् आजानुबाहुत्वं मूर्तीभूतपुंस्त्वमेव सौन्दर्यम्। पुरुषाणां पुंस्त्वमेव सौन्दर्यं न तु सौकुमार्यत्वम्।

इति श्री गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना महाकविना पण्डित ओगेटि परीक्षित् शर्मणा विरचितायां सौन्दर्यमीमांसायां मानवसौन्दर्यप्रकरणं समाप्तम्।

## ९. वाचिकसौन्दर्य-प्रकरणम्

मानवसौन्दर्ये आङ्गिकसौन्दर्यानन्तरं वाचिकसौन्दर्यं प्रमुखस्थानं भजते। वाचिकं सौन्दर्यं हि मानवजातेः जन्मनः प्रभृति संक्रामितः वरः भवति। अन्यप्राणिनः वाचकसौन्दर्यहीनाः भवन्ति। मानवजातिः वाचिकेनैव सौन्दर्येण जीवति स्नेहभावेन।

### १६१. लोककल्याणकारकं वाचिकसौन्दर्यम्।

वाचिकं हृद्गतं सविस्तरं निःशङ्कं व्यवहारकृते विशदयति। यदि तत् वाचिकं मृदुमधुरं संस्कारयुतं भवति तर्हि सर्वत्र मैत्री केवलं नर्तिष्यति। अन्यथा शत्रुत्वमेव जनयिष्यति। ततः सुन्दरवाचिकं लोककल्याणकारकं भ्राजते।

**वाचिकेनैव लोकेऽस्मिन्**
**व्यवहारो विधीयते।**
**शत्रुत्वं मित्रभावश्च**
**जायेते शाश्वतं ततः॥**

अन्यप्राणिनां दैनंदिनव्यवहारः संज्ञाभिः संकेतैः नानाप्रकारकूजनैः आक्रोशैः कण्ठध्वनिभिः दृग्भिः विविधचेष्टाभिः संभवति। तथैव निर्वाचिक-मानवः केवलाङ्गिकावयवसौन्दर्येण विलासादिभिः चेष्टाभिः प्रकृतिरिव मूको भूत्वा हृदयस्थभावम् अर्धमेव प्रकटयति न तु संपूर्णम्। वाचिकं मनोगतभावं शब्दार्थैः पूर्णस्वरूपेण व्यक्तीकरिष्यति। यदि वाचिके सौन्दर्यं स्यात् तर्हि सर्वलोकं तत् सुन्दरं परिवर्तयिष्यति। यदि एकत्राङ्गिकसौन्दर्यं वाचिक-

सौन्दर्येण मिलितं भवेत् तत्र मरन्दसेचनमेव भविष्यति। अभिनये एते द्वे प्रमुखस्थानं भजतः। जन्मना संक्रान्तकण्ठगतस्वरपेटिकातन्तुनादसंतानस्पन्दनेन पञ्चभूतानां सप्तरङ्गानां च समवायेन देशकालजन्मगुणविशेषेण भावानुगण्योच्चारणया वाचिकसौन्दर्यं संक्रामति। सान्द्रनिस्सान्द्रजलपानखाद्यान्नविशेषैश्च दन्तान्तरगतव्यवधिमहिम्ना सरलसरसरसनाग्रनर्तनेन आनुवांशिकसंबन्धेन च सुन्दरवाचिकं संजायते। ततः

**शङ्खनिस्तुलकण्ठाच्च**
**मञ्जुनादपरिप्लुतम्।**
**साधुशब्दपरिव्याप्तं**
**वाचिकं भवति सुन्दरम्॥**

सहजातसुन्दराङ्गस्यापि किञ्चित् शरीरसंस्कारस्यावश्यकता भवति। जगति सर्वचेतनाचेतनानाम् एकविशिष्टसंस्कारः आवश्यकः भवति। स संस्कारविशेषः सहजो वा प्रयत्नपूर्वको वा भविष्यति। जगति जन्मना सर्वमपि असंस्कृतं भवति। संस्कारो नाम विशिष्टसुन्दरीकरणप्रक्रियया सम्यक् करणम्।

**यथैव रत्नं भुवि राजतेऽत्र**
**संस्कारमापाद्य विघट्टनेन।**
**तथैव सर्वं जनितं धरित्र्यां**
**संस्काररूपेण चकास्ति रम्यम्॥**

रत्नं रत्नमेव प्रकृत्या किन्तु तत् शाणोल्लीढं भवेत् अनिर्वचनीयप्रकाशं तनुते। अयमेव संस्कारो नाम। एकेन विशिष्टसंस्कारेण मानवः विशिष्टसंस्कारवान् भवति। सुन्दरसंस्कारत्वमाप्तुं सुष्ठु प्रयतनीयं भवति। सुन्दरसंस्कारः सर्वैरपि समाद्रियते यतः सः अनिर्वचनीयगुणापन्नः। संस्कारः संस्कृतभाषया अपि च संगीतेन मानवस्य भवति इति मीमांसकानां मतम्।

संस्कारः द्विविधः। एकः पूर्वजन्मसंस्कारः। अपरः भौतिकसंस्कारः इति॥

## १६२. पूर्वजन्मसंस्कारः जन्मना संक्रामति ।

संस्कारः प्राणिनामेति
सर्वलोकसुखावहः ।
यथा सुगन्धः सूनस्य
जायते भुवि जन्मना ॥

यथा प्रसूनस्य गन्धसंस्कारः जन्मना संक्रामति तद्वत् सर्वप्राणिनाम् एकविशिष्टसंस्कारः पूर्वजन्मोपात्तः भवति ।

जन्मना समायातसंस्कारस्यापि भौतिकसंस्कारस्यावश्यकता भवति, यतः तस्य संस्कारस्य भौतिकसंबन्धत्वात् । सः भौतिकसंस्कारः नैमित्तिकः । किन्तु प्रभावः सहजातः भवति ॥

विद्याभ्यासस्य काले तु
सर्वा विद्याः समागताः ।
शङ्करस्य समक्षं ताः
साक्षराः पङ्क्तिरूपकाः ॥

अत्र श्रीमच्छंकरभगवत्पादानां विद्याभ्यासः लौकिकसंस्कारविशेषणनैमित्तिकरूपः बभौ ।

पूर्वजन्मसंस्कारस्तु पङ्क्तिरूपेण समक्षं सर्वविद्यासमागमनविशेषः एव ।

## १६३. सौन्दर्यमहिम्ना संपृक्तः भौतिकसंस्कारः ।

जातकर्मनामकरणान्नप्राशनचौलोपनयनविवाहादिकर्माणि मानवानां पञ्चदश विद्यन्ते । एते सर्वे भौतिकसंस्काराः एतैः संस्कारविशेषैः मानवः प्रभावितः भवति । एवमेव सर्ववस्तूनामपि कतिपयसंस्काराः अङ्गावयवसंस्काराः भवन्ति ।

अङ्गावयवसंस्कारः स्नानेन अभ्यङ्गस्नानेनाङ्गरागादिभिः योग्यव्यायामेन भवति । एवमेव वाचिकस्यापि संस्कारविशेषः आवश्यकः भवति । शरीरसंस्कारेण शरीरं सुन्दरं परिदृश्यमानम् अपि तत् वाक्संस्काराभावेन सुन्दरशरीरमेव भवति किन्तु न सः सुन्दरव्यक्तिविशेषः भवति । जगति साधारणतः

स्त्रीपुरुषाः शरीरसंस्कारार्थमेव प्रयतन्ते सर्वदा न तु वाक्संस्कारार्थम्। "लक्ष्मीर्निहिताऽधिवाचि" इत्युक्तत्वात् वाक्सौन्दर्यमेव मैत्रीं सर्वसौख्यानि सम्पदश्च प्रजनयति। वाचिकस्य कठोरत्वात् असंस्कारत्वात् जगति शत्रुत्वमेव भवति। तस्मात् वाक्संस्कारः अत्यन्तावश्यकः परिपूर्णसौन्दर्यस्य भवति। वाचिकसंस्कारः शैशवात् प्रभृति गृहे पित्रोः शिक्षया सम्यगुच्चारणशिक्षया भविष्यति। विद्याभ्यासकाले शिक्षकानां गुरूणां सम्यगुच्चारणकरणशिक्षया भविष्यति। विद्याभ्यासे वर्णानाम् उत्पत्तिस्थानम् अवगन्तव्यं भवति।

के के वर्णाः कण्ठ्याः तालव्याः मूर्धन्याः दन्त्याः ओष्ठ्याः नासिक्याः कण्ठतालव्याः कण्ठ्योष्ठ्याः दन्त्योष्ठ्याः जिह्वामूलीयाः भवन्तीति विज्ञाय अभ्यासः यदि क्रियते तर्हि सुन्दरसंस्कारः भवति वाचाम्। अनेन संस्कारेण सार्थं कण्ठगतस्वरमाधुर्येणापि भवितव्यम्। कण्ठगतस्वरमाधुर्यं नास्ति चेत् वाचि सर्वजनसमादरणकरणाकर्षणा न भवति। माधुर्यलुप्तवाचिकं शत्रुत्वं जनयति।

**शुष्ककाष्ठदलनोद्गतनादैः**
**कर्णकर्कशकठोरसमैश्च।**
**आर्द्रभावरहितैः कटुशब्दैः**
**वाक् करोति कलहं भुवि नित्यम्॥**

वाक्सौन्दर्यमेवान्धतमसं जगतः अपास्य लोकं तेजोमयं संविदधाति। जगति केचन गुणाः स्वानुभवैः सर्वत्र विलोक्य शिक्षणीयाः भवन्ति। वयं जानीमहे केचन काश्चन असुन्दराः वाक्सौन्दर्येण कण्ठगतमधुरस्वरेण च सर्वं जगत् पादाक्रान्तं कुर्वन्ति। कण्ठस्वरेणोदात्तानुदात्तस्वरितप्रचयारोहणावरोहणप्रकारं विदित्वा यथाभावं कथनमेव संस्कारविशेषः भवति। वस्तुतः एते संस्काराः जन्मना जायन्ते तथापि अभ्यासक्रमेण निरतपरिश्रमेण साध्यन्ते च। केषांचन उत कासांचन वाचि शनिः वसति। ततः ते सम्यक् न भणिष्यन्ति। यदि भाषन्ते तर्हि कलहः एव भवति। ते सर्वजनसमादरणीयाः न भवन्ति। तस्मात् वाक्भूषणमेव भूषणं सौन्दर्यं मानवजगति।

वाचिकं सुप्रभादिव्यं
यदि न स्यात् महीतले ।
अमावास्या भवेन्नित्यं
जीवनं निष्प्रभावितम् ॥

अनेन हेतुना सौन्दर्यमीमांसकैः वाक्सौन्दर्यं चतुर्विधं प्रस्तूयते ।

### १६४. वाक्संस्कारः चतुर्विधसुन्दरः ।

१) संस्कारयुतेन कण्ठगतस्वरमाधुर्येण मन्द्रमध्यमतारस्थायिसमेतमुत्तमोत्तम वाक्सौन्दर्यम् ।

२) संस्कारेण मन्द्रमध्यमतारस्थायिसमुपेतमुत्तमं वाक्सौन्दर्यम् ।

३) संस्कारेण मन्द्रमध्यमसमुपेतं मध्यमं वाक्सौन्दर्यम् ।

४) विचित्रस्थायिगतं असंस्कारयुतमधमं वाक्सौन्दर्यम् ।

एतेषाम् उदाहरणानि यथासंदर्भं सोच्चारणं विदितानि भवन्ति ।

शब्दस्थानं विदित्वा यः
रसभावं यथास्थिति ।
मन्द्रमध्यमतारैश्च
वाचिकं कुरुते प्रियः ॥

यः शब्दस्थानं विदित्वा मृदुमधुरं यथा संदर्भं रसानुगुण्यं मन्द्रमध्यमतारस्वरैः भणति लोकप्रियत्वं सः भजते। शरीरसौन्दर्यहीनानां साधारणतः वाचिकसौन्दर्यं भवति। ते वाचिकसौन्दर्येण लोकप्रियत्वं भजन्ते। यदि वाचिकसौन्दर्यस्य कण्ठगतस्वरसंगमः भवेत् तर्हि हेम्नः परमामोदः इव भवति। वाचिकसौन्दर्यं श्रवणेन्द्रियमेव जानाति। तथापि केषांचन चक्षुरिन्द्रियम् अपि वाचिकसौन्दर्ये विद्यमानकम्पनादिकं निस्वनादिकं संरक्षति। वाक्सौन्दर्यं शब्दानुगुण्यभावप्रदर्शनानुकूलसौन्दर्येण रससौन्दर्यव्यञ्जकं भवति। रसभावनापरिप्लुतशब्दोच्चारणं परमानन्दकारकं सौन्दर्यं जनयिष्यति। सर्वमेतत् संदर्भानुसारं सविस्तरमवगन्तव्यं भवति। स्वरसौन्दर्यं वाक्सौन्दर्यं च शब्दैः वर्णयितुम् अशक्यं भवति। तच्च व्यवहारे स्वानुभवैकवेद्यं भवति, तथापि विज्ञेयमः। वाचिकप्रभावः

शब्दगतभावनारससौख्याय कथं निदानं भवति दर्शयिष्यामः। नायिका नायकं स्वीयमधुरशब्दैः एवं वाचिकरूपेण स्वीयभावं प्रकटयति हावभावलालित्यैः।

प्रिय मे पीडय कुचभारं
चपलं ताडय मे जघनम्।
पिब रे मधुराधररसारं
प्रतारय सुखाकूपारम्॥

नायकः प्रियायाः शब्दसौख्यसौन्दर्यमनुभूय कथयति प्रिये मत्तकाशिनि।

हस्ते गृहीत्वा चतुरं विलासैः
शेफालिकां दर्शय चारुनेत्रि।
कराब्जसंलग्नरसार्द्रशेफो
नान्दी भवत्यात्मजसंगराय॥

सौन्दर्यपूर्णवाचिकसंसारे सर्वः सौख्यमनुभवत्येव। वाचिकसौन्दर्यसुखवत् दर्शनगन्धिलस्पर्शचुम्बनसौन्दर्याणां सुखसौन्दर्यं संक्षिप्तरूपेण निरूपयामि।

## १६५. दर्शनसौन्दर्यम्।

अन्योन्यदर्शनोद्भूतं
बहुरागसमन्वितम्।
दर्शनं सुन्दरं भाति
रतिकुड्मलरूपकम्॥

कलावन्तः रमणकान्ताः पुष्पलाविकासमीपं गत्वा ताः विलोक्य दर्शनमात्रेण एवं भवन्ति। सत्यमेतत् दर्शनसौन्दर्यजनितमेव।

पक्वाम्रसंकाशभुजौ च तासां
स्तनद्वयं पङ्कजकोरकाभम्।
विलोक्य ते प्रेक्षणमालिकाभिः
बबन्धुराद्रांगलभावसूत्रम्॥

अत्र प्रेक्षणीयाः पुष्पलाविकाः विलोक्य संमोहिताः कलावन्तः स्वीयप्रेक्षणमालिकाभिः पुष्पलाविकानां कण्ठेषु सूत्राणि बबन्धुः। ते पत्नीत्वेन ताः पुष्पलाविकाः स्वीचक्रुः इति व्यज्यते। पद्यमेतत् यशोधरामहाकाव्यात् समुद्धृतम्।

## १६६. गन्धिलसौन्दर्यम्।

पुष्पक्रयणार्थं विटाः पुष्पलाविकासमीपं गताः। तदा तत्र तासां शरीरगन्धेन पुष्पाणां च गन्धेन संमोहिताः भूत्वा अनेकविकारैः ते विटाः विघूर्णमानसाः भूत्वा मदिरापानमत्तचित्ता इवाभवन्।

स्वेदप्रसिक्तं मधुरं च योषितां
गन्धानिलं चम्पकसौरभं वपुः।
आघ्राय पुष्पैः सममेव कामुकाः
पुष्पासवापानविघूर्णमानसाः॥

एतादृशी गन्धसौन्दर्यमहिमा। स्वेदमिश्रितगन्धसौन्दर्यं रसिकान् कामोन्मत्तान् करोति।

## १६७. स्पर्शसौख्यसौन्दर्यम्।

अन्योन्यस्पर्शसंजातं
सौख्यं केनापि वर्ण्यते।
नैव शब्दा भवन्त्यत्र
भावाः सर्वे सुखे रताः॥

स्पर्शसुखं रतिशास्त्रे आत्मस्वरूपं भवति। सर्वे प्रेक्षणजनितमनसिजभावाः रत्यां स्पर्शसुखजनितसौन्दर्ये निमीलिताः भवन्ति।

हे कामिनि त्वं खलु जीवितं मे
सत्यं हि जन्मान्तरपुण्यलब्धा।
इति प्रजल्पन् परिरभ्य गाढं
निनाय तां भावजतन्मयत्वम्॥

द्वावपि स्पर्शसुखम् अनुभूय तन्मयत्वं प्रापतुः।

## १६८. चुम्बनसौन्दर्यम् ।

चुम्बनसुखजनितरससौन्दर्यं रत्याः किञ्चित् न्यूनमिति सौन्दर्यमीमांसकानां मतम् ।

प्रियं तदा चुम्बनलग्नचित्तं
स्वयं प्रकामं मनसा निपीय ।
उरोजभारे पुलकान्विता सा
संवाहयामास पिनद्धबाहा ॥

तदा तदा रतिबन्धनं शिथिलितं भवति न किन्तु चुम्बनबन्धनम् ।

प्रति क्षणं नैव जहाति चुम्बनं
नितान्तकामावृतमानसा सा ।
आलिङ्ग्य तं विस्मृतबाह्यलोका
लतेव गाढं कुजरूपभूपम् ॥

चुम्बनसौन्दर्यस्य पराकाष्ठाप्राप्त्यर्थं सर्वाङ्गीणसौन्दर्यमावश्यकं नोचेत् चुम्बनं रसविहीनं भवति। वाचिकसौन्दर्यान्तर्गतानि सर्वाणि अन्यसौन्दर्याणि रसानुगुण्यं भावानुगुण्यं वेद्यानि भवन्ति इति वाक्सौन्दर्यविदां सौन्दर्यमीमांसकानां सुस्पष्टाभिप्रायः ।

इति श्री गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना महाकविना पण्डित ओगेटि परीक्षित् शर्मणा विरचितायां सौन्दर्यमीमांसायां वाचिकसौन्दर्यप्रकरणं समाप्तम् ।

## १०. आहार्यसौन्दर्यप्रकरणम

शरीरसौन्दर्यस्य रससौन्दर्यस्य च प्रद्योतनाय आहार्यमपि प्रमुखस्थानं भजते। त्रिविधासु अवस्थासु आहार्यं योग्यरीत्या सौन्दर्यकारकमेव। किन्तु प्रस्तुतांशमनुसृत्य सौन्दर्यमीमांसकाः आहार्यसौन्दर्यं त्रिधा विभाजयन् ।

१) ऋतुकालानुसारम् आहार्यसौन्दर्यम ।
२) शरीरावस्थाऽऽनुगुण्यम् आहार्यसौन्दर्यम् ।
३) रसानुयोग्यम् आहार्यसौन्दर्यम् ।

## १६९. ऋतुकालानुसाराहार्यं सुखावहं सुन्दरं च भवति ।

यथा प्रकृतिः सहजगत्या ऋतुचक्रधारिणी भूत्वा सरति तद्वत् प्रकृत्यां विद्यमानमानवाः अपि ऋतुकालानुसारम् ऋतुधर्मानुसारं शरीरसंरक्षणार्थं सौन्दर्य-पोषणार्थम् अलङ्करणार्थं चातीव कालानुगुण्यानि आहार्यालङ्करणानि च धृत्वा चरन्ति। अत्र प्रामुखयेन स्त्रीणां सौन्दर्यमुद्दिश्येव प्रपञ्चयितुम् इच्छामः न तु पुरुषाणाम्। सौन्दर्यमित्यस्य शब्दस्य श्रवणमात्रेण सामान्यतः लोके प्रकृति-सौन्दर्यं स्त्रीणां सौन्दर्यमेव समक्षं स्फुरति। सौन्दर्यं केवलं स्त्रीणां सौभाग्यं ऐश्वर्यं च भवते। धीरोदात्तधीरोद्धतधीरललितत्वमेव पुरुषाणां भाग्यं माहात्म्यं च भवति। स्त्री प्रकृतिस्वरूपिणीति कोमलाङ्गीति लावण्यवतीति भावनया तस्याः कोमलाङ्गत्वावच्छिन्नसौन्दर्यस्यानुरूपाहार्यमण्डनम् ऋतुकालयोग्यं सुन्दरं भवेदिति बुद्ध्या वित्रूणनः। पुरुषप्रकृतेविलसितप्रपञ्चे पुरुषप्रकृत्योः नैकत्वं विद्यते। द्वावप्येतौ परस्परं स्त्रीयसहजातगुणान् दर्शयन्तौ एकत्वे विद्यमानौ नैकत्वं गुणसौन्दर्येषु प्रदर्शयन्तौ चलतः। प्रपञ्चे स्त्रीत्वे विद्यमानसौन्दर्यं पुँस्त्वे विद्यमानोदात्तत्वं च प्रदर्शनमेव सौन्दर्यलक्षणम्। विचारशून्याः परिणामा-नभिज्ञाः पुरुषप्रकृत्योः सामान्यकरणाय निर्लज्जा भूत्वा प्रयतन्ते। तत् असङ्गतम्। पुरुषप्रकृत्योः समानीकरणेन एकभावविलोकनेन प्रपञ्चोत्पत्तिः न भवति। स्त्रीषु विद्यते अवश्यं भिन्नत्वम्। वस्तुतः मृत्तिका एका। तथापि अवयव-निर्माणविषये गतिभावनाविषये व्यवहारविषये च जीवनविषयेषु च स्त्रीपुरुषयोः मध्ये विभिन्नता संदृश्यते। तत् विभिन्नत्वं प्रशान्तसुन्दरसुखाय हेतुः भवति। समानकरणत्वं अशान्ततायै दुःखाय च हेतुः भवति। समानत्वं विधाय स्त्रियः पुरुषाः इव व्यवहरन्ति। स्त्रियः पुरुषस्य इव व्यवहरणं, पुरुषस्य स्त्रियः इव व्यवहरणं जुगुप्साकारकं अनौचित्यास्पदं भवति। एतादृशव्यवहारः सौन्दर्यानु-भूतिविषये स्त्रीपुरुषयोः परस्परसमाकर्षणविषये प्रपञ्चोत्पत्तिविषये मानवजातेः सुखविषये अवरोधः भवते। एतादृशजीवने कलायाः सौन्दर्यस्य च स्थानमेव न भवति। पुरुषाः पुँस्त्वे विराजमानाः सुन्दराः समाकर्षकाः भवन्ति। पुरुषाणां प्रांशुत्वं समविभक्ताङ्गत्वं पुरुषलक्षणसमन्वितत्वं सौन्दर्यं भवति। तथापि योग्याहार्यं तेषाम् उदात्तभावनास्फोटकं भविष्यति। ऋतुमती प्रकृतिः सुन्दरी। प्रकृतिस्वरूपिणी ऋतुमती स्त्री सुन्दरी। तस्मात् प्रपञ्चोत्पत्तिकारकभूतानां

प्रकृतिरूपभासिनीनां स्त्रीणामाहार्यमुद्दिश्य तादृशाहार्यधारणजनितसौन्दर्य-मुद्दिश्य योग्याहार्यमुद्दिश्य प्रपञ्चयामः। स्त्रीणाम् आहार्यविषये व्यवहारविषये पुरुषाणामिव समानता मा भूयादिति मे मतिः। अद्यतनकाले स्त्रीणां सहज-सौन्दर्यं विलुप्यते। कृत्रिमसौन्दर्यं परमं स्थानं भजते तत् मा भूयादिति तादृश-कृत्रिमसौन्दर्यं सौन्दर्यं नास्तीति घण्टापथं कथयामः। यदि एतादृशी स्थितिः भवति देशस्य तर्हि शब्दकोशात् सौन्दर्यशब्दस्य अदर्शनमेव भविष्यति। आधुनिक-दिवसेषु सौन्दर्यं विविधभीकरशिरोभिः विवर्धते। तदसाम्प्रतमिति कथयामः। आहार्यव्यवहारौ यदि पुरुषाणाम् इव तासामपि भवेतां ताः पुरुषाः इव न संदृश्यन्ते स्त्रियः इवापि न संलक्ष्यन्ते। किन्तु ताः मन्दवासरसंचारकाः इव नपुंसका इव दृश्यन्ते क्लीबत्वेन मूर्तीभूता इव भ्राजन्ते।

## १७०. वसन्तर्तावाहार्यसौन्दर्यम्।

वसन्ते चित्रवस्त्राङ्गयः
पुष्पमालाविभूषिताः।
नित्यं चन्दनगन्धाढ्य
राजन्तां चारुरूपिणः॥

यथा वसन्ते विविधपुष्पैः अलङ्कृता प्रकृतिः प्रतिभाति सप्तङ्गवल्लीभिः चित्रितघासवस्त्रं परिदधाति अपि च चन्दनगन्धिलमलयानिलेन भूषिता धवल-पुष्पस्तबकचारुहासिनी प्रतिभाति तद्वत् वसन्तर्तौ स्त्रियः चित्रवर्णवस्त्रावृताः पुष्पमालाविभूषिताः चन्दनचर्चिताङ्गाः सान्तत्येन हसन्त्यः राजन्तामिति तदैव स्त्रीसौन्दर्यम् आहार्येण द्विगुणीकृतं भूत्वा परमानन्दसौन्दर्यं प्रदास्यन्तीति भावः।

## १७१. ग्रीष्मर्तावाहार्यसौन्दर्यम्।

ग्रीष्मर्तुः भगवतः सूर्यस्य औष्णिक्यप्रभावेन लोकं संतापयति। तस्मात् यथास्थितिसमार्तवहार्येण लोकेन भवितव्यम्। ऋतुधर्मानुसाराहार्यं स्त्रीणां सुन्दरं परिदृश्यते।

ग्रीष्मर्तौ मधुरं स्त्रैणं
स्तनवल्कलसज्जितम्।
निर्मोकतुल्यवस्त्रैश्च
तनुरागैः विराजतु॥

ग्रीष्मर्तावुष्णाधिक्यात् अनूरुसारथेः खरकरतपनकारणात् सर्वे प्राणिनः संतप्ताः शीतलस्पर्शसुखाय स्वीयभावनाऽऽनुगुण्यं यथासंदर्भं शान्त्यर्थं परिसरविराजमानवृक्षच्छायाः समाश्रयन्ति। मानवाः देवतावस्त्रसदृशैः पारदर्शनिकवस्त्रैः शरीराणि परिवेष्टयन्ति। स्त्रियः उरोजभारान् निर्मोकतुल्यस्तनवल्कलैः संबद्ध्य केवलकार्पासकचीरैः चन्दनलेपिताङ्गैः गन्धिलचूर्णविशेषैः विराजन्तु इति तदेव ऋतुकालानुगुण्यं आहार्यसौन्दर्यं इति रसिकजनानां मतम्।

## १७२. वर्षर्तावाहार्यं सौन्दर्यम्।

प्रपञ्चोत्पत्तिस्थानमूलकोऽयम् ऋतुराजः। अयं सर्वदाऽऽर्द्रस्वान्तः। धरण्याः प्रियतमः। अस्मिन् प्रावृट्काले यौवतं सुखमन्दोष्णदायिभिः चीरैः मृगनाभिमदसौरभैः च सर्वशः भ्राजतु। अत्रार्तवसंबंधीभिः पानाशनकर्मभिः अपि च कुरवकरञ्जितमञ्जुहस्तैः केतकीरजोमीलितसुगन्धवदनैः कदुष्णजननमूलभूताहार्यैः राजतेतरामित्यभिप्रायः। यथा वर्षर्तुः सुखं जनयति विविधप्रकारैः समार्तवैः स्वच्छातिस्वच्छप्रकृतिसंपद्भिः तथैव यौवतं स्वीयसंपद्भिः समार्तवालङ्कारैः प्रयच्छतु सौन्दर्यसुखमिति तदेव वर्षर्तावाहार्यसौन्दर्यमिति मन्यामहे।

तद्यथा –

वर्षर्तौ यौवतं नित्यं
सुखमन्दोष्णदायिभिः।
मृगनाभिसुगन्धैश्च
चीरैः भ्राजतु सर्वशः।

भारतीयस्त्रीणां सौन्दर्यं सुन्दरचीरावेष्टनेन एकं पवित्रोदात्तस्थानं भजते। चीरावेष्टनेन स्त्रियः सुन्दरमूर्तयः इवाभान्ति। सर्वदा चीरावेष्टनमेव भवितव्यमिति तत्रैव भारतीयसंस्कृतिः मूर्तीभूता इति। अपि च सुन्दरकबरीभारेण स्त्रीत्वं सौन्दर्येण प्रविराजतेति मन्यामहे।

स्त्रीणां भवति सौन्दर्यं
कबरीभारेण सर्वदा।
सुन्दरावयवाकृष्टैः
चीरावेष्टनवल्गुभिः॥

## १७३. शरदृतावाहार्यसौन्दर्यम्।

शरदृतुः सुन्दरः। अयं शुभ्रः ऋतुराजः अस्मिन् ऋतौ मधुरकविताः समुद्भूताः। शरच्चन्द्रिका सुखावहा भवति।

सर्वदा शुभ्रवस्त्रैश्च
शरत्कादम्बिनीसमम्।
शारदाब्जसमं स्त्रैणं
शारदेव विराजतु॥

शारदा शुक्लवर्णा प्रसन्नाम्बरालंकृता। ततः शरदृतौ सर्वदा स्त्रैणं श्वेताम्बरावृतं शारदामूर्तिरिवाभातु।

अपि च

प्रसन्नगुणमाधुर्यं
हारतारालिभूषितम्।
कर्पूरचन्द्रिकालिप्तं
राजतां यौवतं प्रियम्॥

स्त्रैणं प्रसन्नगुणमाधुर्ययुतं शरदि तारकालिसमं हारावलिविभूषितं, चन्द्रिकासमानकर्पूरपरागलिप्तं प्रियं लसतु।

## १७४. हेमन्तर्तावाहार्यसौन्दर्यम्।

अयम् ऋतुः श्रीरामचन्द्रस्य इष्टः इति मधुमयभणितीनां मार्गदर्शी महर्षिः वल्मीकजन्मा मुनिः स्वीयकाव्ये वर्णयामास।

ऊर्णवस्त्रैश्च हेमन्ते
स्त्रियः तैलाभिलेपिताः।
अंशुकैः दृढसंबद्धैः
भ्राजन्तु स्तनमण्डलैः॥

हेमन्तः हिमसंहत्या सुव्याप्तः राजते। सर्वत्र प्रकृतिः जडस्वरूपा भवति। हव्यवाहनः सुभगः भवति। हेमन्ते ऊर्णवस्त्रावगुण्ठनकण्ठमण्डिताः स्त्रियः दिदृक्षूणां नेत्रपर्व प्रजनयन्ति।

हेमन्ते ऊर्णवस्त्रालंकरणमेव सौन्दर्यम्। यथाकालं आहार्यं योग्यरूपेण परिवर्तनीयं भवति तत् यथा सुन्दरं भवति तथा।

## १७५. शिशिरर्त्वाहार्यसौन्दर्यम्।

मधुमासे च हेमन्ते
यथा स्त्रैणं विराजते।
तथैव मञ्जुलाहार्यैः
शिशिरे भातु सुन्दरम्॥

अयम् ऋतुराजः अन्तिमः। अयं सर्वलक्षणसमन्वितः। अस्मिन् ऋतौ स्त्रियः हेमन्तऋतुवस्त्रवेषवत् नोचेत् वसंतऋतुवेषवत् ऋतुधर्माहार्याणि स्वीकुर्वन्ति। तस्मात् सौन्दर्यकाङ्क्षिणः यथाऋतु समलंकृताः भूयासुः इति कलाभिज्ञानां मतम्। ऋतुधर्मं नानुसृत्य यदि क्रियते तत्र सौन्दर्यम् औचित्यं च न भवतः एव। यदि यः कश्चन उत या काचन ग्रीष्मर्तौ ऊर्णवस्त्रं धरिष्यति तर्हि सा व्यक्तिः सौन्दर्यानभिज्ञा इति लोकः कथयति। अस्मात् हेतोः यथाकालं यथासमयं आहार्यसौन्दर्यमपि सौन्दर्यमेव भवति। ततः अनुष्ठितकार्यमवलम्ब्य शरीरालंकरणम् औचित्यपूर्णं भवति तद्विपरीतं सौन्दर्याभास एव।

## १७६. शरीरावस्थाऽनुसारमाहार्यं सुन्दरम्।

अत्रास्मिन् संदर्भे बाल्यावस्थायामाहार्यं अपि च नग्नाहार्यं, यौवनावस्थायामाहार्यं, तथैव नग्नाहार्यं, स्नानावस्थायामाहार्यं, वार्धक्यावस्थायाम् आहार्यं च संक्षिप्तरूपेण उल्लिखामः।

## १७७. बाल्यावस्थायामाहार्यम्।

बाल्ये विविधाहार्यधारणमपि सौन्दर्यमेव। धूलिधूसरपरिन्यस्तालकालङ्कृतमुखं सूच्यासंयोजितनानाविधचित्रविचित्रवस्त्रधारणम् अतीवमधुरं भूत्वा चुम्बनपरिष्वङ्ग-आचरणप्रेरणां परिकल्पयते। तद्यथाः–

पुत्रः प्रियः धूलिविलिप्तदेहः
काञ्चीगुणाभासितमध्यभागः ।
प्रतिक्षणं फेनिलरम्यहासैः
विराजते केवलकञ्चुकेन ॥

अपि च केषांचन नग्नत्वमेव सुन्दरं भवति । बाल्ये नग्नाहार्यसौन्दर्यं परमरमणीयं स्पृहणीयं च भवति ।

## १७८. नग्नाहार्यसौन्दर्यम् ।

बालः गृहसमीपे तिष्ठन् यातायातं पश्यन् अधोनिर्दिष्टप्रकारेणाहार्येण भासते ।

तद्यथा –

वामेतरस्य हस्तस्य
क्षिप्त्वाऽङ्गुष्ठं मुखे सुखम् ।
वामहस्तेन शिश्नं तु
धृत्वा तिष्ठति बालकः ॥

इदं बाल्ये सहजातम् अनिर्वचनीयाहार्यं भवति । क्वचित् सहजसौन्दर्यवतीनां सहजसुन्दराणां बालानां चाहार्यावश्यकता न भवति ।

## १७९. यौवनावस्थाऽऽहार्यसौन्दर्यम् ।

यत् बाल्ये शोभते तदेव यौवने न शोभतेति न । किन्तु सम्प्रदायानुसारं परम्परानुसारं देशनियमानुसारं कानिचन कृत्यानि प्रत्यक्षं परिहार्याणि भवन्ति । यदा शरीरं निम्नोन्नतं मृदुमांसलस्नायुसमेतं भवति तदाहार्यम् अन्यत् भवति । यौवने आहार्यं नाम लावण्यमेव । तथापि चित्रविचित्रचीराणि विविधकेशबन्धनानि वेषभूषालङ्करणानि भवन्ति । अस्यां दशायाम् अलङ्करणचुम्बनालिङ्गनं यथाभावं प्रचोदयति । यौवनावस्थाऽऽहार्यं भस्मावशेषं मदनं पुनरुज्जीवयति ।

अलङ्कृता सा कमलायताक्षी
नलोत्पलैः कुड्मल कुन्दवर्गैः ।
अशोकपुष्पैर्नवचूतगुच्छैः
कन्दर्पबाणांश्च तिरश्चकार ॥

## १८०. नग्नाहार्यसौन्दर्यम् ।

भुक्ता सा सहजाहार्ये
मणिते नग्नसुन्दरी ।
कामजैर्भावशीत्कारैः
तनोर्लावण्यदीप्तिभिः ॥

अत्र एकान्ते शयनमन्दिरे, उद्याने पल्लवस्तबकेषु सुन्दरी नग्नसौन्दर्याहार्य-भूषिता सहजं भ्राजमानतनोर्लावण्यदीप्तिभिः सर्वं दर्शयन्ती रतिसौख्यम् अनुभवन्ती कमपि रसस्वरूपं प्रतिक्षणं दर्शयन्ती रतिसौख्यमनुभवति । इदं नग्नाहार्यसौन्दर्यलक्षणम् ।

छान्दसानां मतं यत् नग्नसुरतं महापापं जुगुप्साकारकमिति । नग्नसुरतं रसिकानां मूर्तीभूतसर्वरससौन्दर्यानुभावस्थानम् । यथा क्रियायां शरीरलावण्यमेवाहार्यं भवति ।

## १८१. स्नानावस्थाऽऽहार्यसौन्दर्यम् ।

स्नानं कुर्वन्ती लावण्यपरिसर्पितसर्वाङ्गसुन्दरी तरुणी शारदाभ्रवत् सूर्यकिरणवत् चन्द्रिकावत् आदर्श इव निर्मलं स्वच्छं संदृश्यते ।

सुन्दरी स्नानवेलायां
जलकन्येव भासते ।
अपास्तसर्वमालिन्या
कलहंसीव मानसे ॥

सौन्दर्यवत्यः स्त्रियः स्नानवेलायाम् अत्यन्तसौन्दर्यवत्यः जलकन्याः इव संदृश्यन्ते । शरीरम् अमलिनादर्शवत् सुतप्तकार्तस्वरवत् शरच्चन्द्रिकेव अनूहां

रससौन्दर्यप्रपञ्चं नयति। स्नानसमये स्त्रीणामङ्गोपरि दीप्यमानसिक्तवस्त्रात् सिक्तवस्त्रतरङ्गसंकुलात् स्त्रीणां शरीरलावण्यं शरत्कालाम्बरतलात् निसृत-चन्द्रिकासमं हृद्यं प्रद्योतते सर्वेषां स्नानावस्थाऽऽहार्यं सुन्दरं प्रतिभाति।

## १८२. वार्धक्यावस्थासौन्दर्यम्।

वार्धक्ये शरीरलावण्यापगमात् स्नायु-रक्त-मांसादीनां प्रक्षीणत्वात् शरीर-सौष्ठवस्य शीर्णत्वात् केवलास्थिपञ्जरस्य भासमानत्वात् नो चेत् शरीरस्यातिपीवर-त्वात् शरीरं किमप्यलङ्कृतमपि न शोभते। ततः तस्मिन् वार्धक्ये शरीरावस्थायाः योग्यवस्त्रधारणेन केवलं शरीरसंरक्षणपद्धतिरनुसर्तव्या न तु अलङ्करणादिकम्। केचन वार्धक्येऽपि आस्ये सुगन्धद्रव्यरागं विलिप्य कृत्रिमशिरोजान् परिकल्प्य सर्वत्रापि कृत्रिमं विधाय युवत्यः इव नटन्ति ते भूतप्रेतपिशाचादीनां प्रतिबिम्बाः भूत्वा चरन्ति। तत्राहार्येण सौन्दर्यं न वर्तते। यदि ते केवलं सामान्यवस्त्र-परि-वेष्टिताः सुन्दराः अपि च सुन्दरवयस्यः भविष्यन्त्येव। एतावति कथने तात्पर्यं सौन्दर्यं न केवलं एकवस्तुनिष्ठं परंतु अन्योन्याश्रितं भवति। तस्मात् सौन्दर्यं दशानुसारम् अलङ्करणेन, अवस्थाऽनुसारम अलङ्करणेन भवति, न तु केवलम् अलङ्करणेन।

यथा शिशिरर्तौ सर्वे वृक्षलताः पल्लवपुष्परहिताः अतिविरलपाण्डुपत्राच्छा-दनेन सुन्दराः दृश्यन्ते, तद्वत् वार्धक्ये स्त्रीपुरुषाः शिशिरर्तुवत् प्रेक्षणीयाः भवन्ति सामान्यजीर्णवस्त्रावेष्टिताः। ऋतुः अनूक्त्वा सूचयति प्रजाभ्यः ऋतु-धर्माहार्यम्।

**अशीतिवर्षीयममुं प्रवृद्धं**
**विजीर्णवस्त्रावृतयष्टिकायम्।**
**पादत्रयेण स्खलितं प्रयान्तं**
**ददर्श भूपः तनुरल्लकान्तम्॥**

अत्र जीर्णवस्त्राच्छादनेन वृद्धः सहजसुन्दरः आभाति। तस्य रूपं चिन्ता-जडव्यापृतम्। तनुः विगतकान्तिविशेषं जराजर्जरितं विभाति। तस्मिन् वयसि तादृशाहार्यं सुन्दरमेव भवति यथा शिशिरर्तौ तरूणां सौन्दर्यं प्रतिभाति।

## १८३. रसानुगुण्यम् आहार्यसौन्दर्यम् ।

रसाः यथासन्दर्भं सरसहृदयेन रसरूपेण प्रवहन्त्यः संदृश्यन्ते । किन्तु वस्तुतः ते रसमूर्तयः । ते क्वचित् घनीभूताः क्वचित् विभावानुभावादिभिः रसपरिप्लुताः कृताः इव संदृश्यन्ते चानुभूयन्ते च । सौन्दर्यं रसानुगुण्यं विद्योतते अन्ततः आनन्दे परिणमते । आहार्यसौन्दर्यं रसानुगुण्यं भावनाभिः विविधरङ्गैः भ्राजते । विना चाहार्यं रसस्फूर्तिः व्यक्तार्था भवति । ततः आहार्यसौन्दर्यम् उत्कटरसोत्पादके परमनिदानं भवति । सौन्दर्यम् अनेकभावान् अदर्शनेन प्रजनयति । ततः सर्वाः रसस्रोतस्विन्यः सौन्दर्यादेव जायन्ते ।

रसानुगुण्यं सौन्दर्यं
जायते लोकमानसे
यथा रसानुदानेन
तरुः पत्र-सुमान्वितः ॥

भरतमुनिः सर्वरसानां वर्णान् सूचयित्वा वीररसस्य पीतरक्तवर्णयोः मिश्रणं गौरवर्ण-स्वरूपेण दर्शयामास । रसानुगुण्यम् आहार्यं यदि स्यात् रसपुष्टिः भवति । वर्णभावयोः मिश्रणेन रसस्यापि वर्णः संक्रमिष्यति स एव वर्णः सुन्दरस्वरूपः भवति । भरतस्य मते अष्टौ रसाः भवन्ति ।

## १८४. शृङ्गाराहार्यसौन्दर्यम् ।

श्यामा ललितहरिताहार्या शृङ्गाररसं परिपोषयन्ती नर्तते तदा रसानुभूतिः प्रेक्षकैः अनुभूयते । सः रसः सर्वदा तेषां मनोमुकुरे सौन्दर्यरूपेण विलसन् निवसिष्यति । तस्मात् आहार्यसौन्दर्यमपि सौन्दर्यमेव । केचन रसस्वरूपस्य अनभिज्ञाः यत् किमपि आहार्यं धृत्वा नाट्यं नाटकं च कुर्वन्ति । तथाकरणम् असहजम् असंबद्धम् अनौचित्यं च भवति । रसस्य सौन्दर्यस्य च पराकाष्ठा अनाहार्य-अवस्थायां ज्ञातुम् अशक्या भवति ।

श्यामा भवति सान्तत्यं
शृङ्गार-रसदीपिका ।
श्यामाङ्गी हरिताहार्ये
सत्यं सौन्दर्यशालिनी ॥

पल्लवित-हरिताहार्यं शृङ्गारे रसोत्पादकहेतुः भवति। रसानुगुण्यं रङ्गमञ्चालङ्करणं यवनिकाश्च परिवर्तनीयाः । तथा यदि न भवति रसे निर्मलत्वं स्वच्छता च न भवतः ।

## १८५. हास्यरसे आहार्यसौन्दर्यम् ।

हास्यरसप्रधाननाट्ये नाटके वा श्वेतवर्णाहार्येण भवितव्यम्। हासस्य वर्णः श्वेतः इति सौन्दर्यज्ञाना मतम् । अयं कविसमयः अपि च दन्तपङ्क्तीनां रुचः हसिते मिलित्वा धवलरूपं धरन्ति। ततः हास्यरसः शुक्लवर्गः भवति। तस्मात् तस्मिन् रसे शुक्लाम्बराहार्यप्रयोगः औचित्यपूर्णः भवति । हास्यरसः आरोग्यप्रजननहेतुः ।

हसन्ती यदि तन्वङ्गी
शुक्लाहार्ये विराजते ।
नाट्ये रसो वहेत् पूर्णं
आङ्गिकैः वाचिकैः ध्रुवम् ॥

लोकेशस्य सृष्ट्यां मानवः केवलं हसिष्यति हास्यरससौन्दर्यं चानुभविष्यति । सहजागतः हासः सुन्दरः भवति ।

## १८६. करुणरसे आहार्यसौन्दर्यम् ।

करुणरसे नर्तकी, नो चेत् नर्तकः अभिनयति तदा करुणरसानुगुण्यम् आहार्यं पारावतवर्गवत् भवेत् यदि साधुरसस्यन्दनं भवतीति रसवर्ण-सौन्दर्य-विचक्षणानां मतम् । करुणरसः सुन्दराहार्येण सुन्दरं कथं भवतीति केषांचन प्रश्नः । करुणरसपोषकः यदि सुन्दरवपुषा सुन्दरभावप्रकटनानुरूप-वदनमण्डल-युतः भवेत् सुन्दराहार्यमूलकः सः करुणरसः अन्ततः करुणरसाविष्कृतमूर्तीभूत-व्यक्तित्वेन आनन्दमेव ददातीति सः करुणरसः सुन्दरः भवतीति ज्ञेयम् । सर्वे रसाः वर्णरञ्जिताः सुन्दरमूर्तयः भान्ति । ते रसानुभूतिसमये किञ्चित् चित्तनोदकाः भवन्त्यपि परिणामे आनन्दसौन्दर्ये परिणमन्ति ।

नेत्रोत्पलात् कज्जलमिश्रिताश्रु
स्रवच्च भेजे मृदुनालभावम् ।
कपोलभागे चिकुरः समन्तात्
शैवालभावेन परं ततान ॥

नेत्रे उत्पलसदृशे । तन्नेत्रद्वन्द्वात् कज्जलमिश्रिताश्रु वहन्ती नालभावं पेदे । कपोलभागयोः चिकुराः समन्तात् शैवालरूपं प्राप्य तस्याः शरीरलावण्यसरसि मुखं पद्ममिव शोभते । अत्र अस्मिन् करुणरस-संदर्भे सौन्दर्याधिक्यता प्रतिभाति । यशोधरा रुदन्ती चलति, तस्याः करुणापूरित–मुखदर्शनेन सर्वेषां प्रेक्षकानां पाठकानां सहृदयानां रोदनं भविष्यत्येव । पारावतवर्णाहार्य–सौन्दर्येण तस्याः वदनसौन्दर्येण भावसौन्दर्येण करुणरसः सुन्दरं प्रतिभाति इति गीर्वाणगेयकविमण्डलचक्रवर्तिनः मतम् ।

## १८७. रौद्ररसे आहार्यसौन्दर्यम् ।

रौद्ररसे आहार्यं रक्तवर्णसमञ्चितं योग्यसुन्दरं भवति । सुन्दरस्वरूपं सर्वरसेषु सुन्दरमेव संदृश्यते । यथासंदर्भं सौन्दर्यमेव भावनया रसायते । सौन्दर्यमेव सन्निवेशानुसारं विभिन्नरसान् भजते । पद्यमिदं मत्कृत-श्रीमत्प्रतापराणायनात् समुद्धृतम् । रुद्राकृतिमापन्नं रौद्ररसे विहरन्तं राणाप्रतापाधिपं विलोक्य शत्रूणां मनसि भीतिः संजाता । तादृशं तं राणां विलोक्य ते कान्दिशीकाः बभूवुः ।

ग्रीष्मादित्यसमानभूपमचलप्रोत्तुङ्गसंराजिनं
चासीनं वरचेतकोपरि लसद्रागात्तशाटीवृतम् ।
एकान्ते शिवमेकलिङ्गमहिमासंक्रान्तरुद्राकृतिं
शस्त्रास्त्रायुधदीप्तिमन्तमतुलं राणाप्रतापाधिपम् ॥

रागरञ्जित-शाटीवृतः शस्त्रास्त्रावृतः राणाप्रतापः शत्रूणां ग्रीष्मादित्य इव एकलिङ्गाकृतिरिव मूर्तीभूतरौद्ररसः इव संग्रामे बभौ । संग्रामे तस्य रुद्राकृतिविशेषः रक्तशाटीविराजितः शत्रूणां परं भयावहः संजातः ।

## १८८. वीररसे आहार्यसौन्दर्यम् ।

वीररसे सम्प्रदायानुसारं गौरवर्णभासितं सुन्दरम् आहार्यं भवति । गौरवर्णः पीतरक्तवर्णयोः मिश्रणेन भवति ।

शार्दूलद्वययुध्यमाननरवीरागण्यजन्यं भटाः
प्रत्यक्षं बहुभण्डनक्रमिकचक्रव्यूहसंडीनकम् ।
वीक्ष्याजस्रसहस्रलोचनभरं हाहारवैः निस्तुलं
जल्पन्त्येव कथासु युद्धममरं शार्दूलविक्रीडितम् ॥

अत्र प्रतापराणामानसिंहयोः द्वन्द्वयुद्धं वीररसं व्याकिरदिव भासते। द्वावपि वीरौ गौरवर्णवस्त्रधारिणौ शार्दूलसमौ प्रडीनोड्डीनसंडीनैः हाहारवं कुर्वन्तौ रटन्तौ युयुध्यन्तौ आस्ताम्। अत्र शार्दूलद्वयसाम्येन द्वावपि वीरौ शार्दूलाविव भासेते। तयोः वेषादिकमपि शार्दूलचर्मवत् भासते इत्यनुमेयम्। इदं पद्यं मद्रचितश्रीमत्प्रतापराणायनमहाकाव्यात् उदाहृतम्। वीररसे गौरवर्णभासितम् आहार्यम् सुन्दरं भूत्वा रसपोषकं भवति।

## १८९. भयानकरसे आहार्यसौन्दर्यम्।

भयानकरसे कृष्णवर्णाहार्यं सुन्दरं भवति। कृष्णवर्णाहार्यधारणेन भयानकरसः परिपुष्टिं प्राप्स्यति।

दृष्ट्वा तं बहुभीति-कम्पिततनुः तूर्णं निवृत्ताननः
शैलेन्द्राक्रातिपञ्चमङ्गलगजेन्द्राधिष्ठितः सत्वरम् ।
कृष्णाहार्यविराजमाननृपतिः श्यालेन सालीमुना
चाशुद्रावितदन्तिराजलसितः सो मानसिंहो ययौ ॥

अस्मिन् महासंगराये पञ्चमङ्गलगजेन्द्राधिष्ठितः मानसिंहः श्यालेन सालीमुना सार्धम् उच्चैःश्रवस्तुल्यम् इन्द्रायुधसमं भ्राजमानचेतकोपरि भास्वन्तं राणाप्रतापाधिपं विलोक्य भीत्या कम्पितः निर्ययौ।

अत्र भयानकरसे कृष्णाहार्यसज्जितः मानसिंहः भीत्या कम्पमानः किंकर्तव्यतामूढः पलायितुं प्रचक्रमे। अत्रास्मिन् पलायने कृष्णाहार्ये च भयानकरसः अनुभूयते। इदं पद्यं प्रतापराणायनमहाकाव्यात् गृहीतम्।

## १९०. बीभत्सरसे आहार्यसौन्दर्यम्।

बीभत्सरसे नीलिमवर्णः योग्यः भवति। सर्वत्र नीलप्रभाभासितत्वं रसोल्बणहेतुः भवति।

प्राश्नत् दोर्बलखड्गपातनरयोराधिक्यभारात् ध्रुवं
गाढं खण्डित-कण्ठ-भासिततनुः नीलाम्बरावेष्टितः ।
बीभत्से समरे च सैन्यनिवहे सोदन्ति संचालकः
पञ्चत्वं सहसा जगाम विरटद्रक्तोदधौ तत्क्षणम् ॥

श्रीराणाप्रतापस्य खड्गाघातात् मानसिंहं तस्य हस्ती ररक्ष । दुर्दैववशात् तत्क्षणं तदीयखड्गाघातेन नीलवस्त्रधारी हस्तिपकः मारितः तत्र रक्तोदधौ पपात पञ्चत्वं च पेदे । अस्मिन् बीभत्सरसे नीलवस्त्रधारिणः हस्तिपकस्य मरणं बीभत्सरसपोषकं भवति रसस्यापि सुन्दरत्वं परिकल्पयति ।

## १९१. अद्भुतरसे आहार्यसौन्दर्यम् ।

अद्भुतरसे पीतवर्णत्वं सहजसुन्दरं भवति ।

किं शौर्यं किमु धैर्यमत्र नितरां नीतिः सुधर्मायुता
लोके भाति महाद्भुताश्रितरसः पूर्णं प्रभावान्वितः ।
इत्येवं जगदुश्च पीतवसनाः सेनाः स्वहाहारवैः
कष्टे सत्यपि नीतिबद्धचरिता राणा महाभारते ॥

विद्यमानेऽप्यवकाशे पलायितं मानसिंहं हन्तुं नानुसरन्तं राणां विलोक्य उभयपक्षयोः राणासमाराधकाः पीतवसनसमलङ्कृताः सैनिकाः राणासमो नीतिमान् धर्मात्मा सत्ववान् राजा न कोऽप्यस्ति भारते इति जेगीयमानहाहारवैः अद्भुतरसाश्लिष्टस्वान्ताः तुष्टुवुः । अत्र सामाजिकैः सत्त्वभावाश्रितैः अद्भुतरसः बोभुज्यते ।

## १९२. शान्तरसे आहार्यसौन्दर्यम् ।

शान्तरसे भौतिकशालसताभावत्वं निर्लिप्तता च प्रचुरं नर्वर्तते । मनः रागविहीनं शान्तं भवति निस्तरङ्गसागरवत् । विशालं मनः गभीरेण प्रशान्तं भवति । तत्राहार्यं शरीरकान्तिः उदात्तता च भवतः । काषायाम्बरधारणं योग्यं शान्तरसस्फोटकं च भवति । तद्यथाः—

सुतप्तकार्तस्वरवर्णदेहः
तपोमहिम्ना च पवित्रमूर्तिः ।
समागतः पावितरम्यदेशः
प्राच्यां समुत्पन्नमिवार्कबिम्बम् ॥

शान्तरसे आहार्यं काषायाम्बरधारणं भवति ।

अत्र बुद्धदेवः सुवर्णकान्तिशरीरेण तपोमहिम्ना भूप्रदेशान् पावयन् अरुणगभस्तिबिम्बवत् समागतः । अत्राहार्यं अरुणगभस्तिबिम्बवत् इति उपमानेन काषायाम्बरधारणं संसूचितम् ।

## १९३. देशकालसम्प्रदायानुसारम् आहार्यम् ।

यदि संदर्भानुसारं सम्प्रदायमनुसृत्य तत्तत्स्थानेषु आहार्यं तत्रकृतकर्मणः सौन्दर्यं जनयति । यदि अग्निमक्षं धौतपरिधानं धृत्वा भस्मत्रिपुण्ड्रैः समलङ्कृतः उपविश्य सोमयाजो होमं करोति सः समग्रः सौन्दर्यातिशयेन विराजयिष्यति । यदि यः कश्चन देवालये पादरक्षायुतः गळबद्धलंबकेन सहितः पूजां कर्तुम् उपविशति तत् असौन्दर्याहार्यमेव । एवमेवान्यसंदर्भेषु विचारणीयं भवति । सम्प्रदायः सौन्दर्यपूरितः भवति यतः सः देशकालारोग्यमनुसृत्य कृतः । यदि एकत्र नवरसभावप्रदर्शनं भवति नाट्ये वा नाटके वा तत्रानुपदमेवाहार्यमपि उपरिनिर्दिष्टरसानुगुणं प्रदर्शनीयं भवति । यदि प्रदर्शनं एकेनैवाहार्येण भवति अखण्डितं सान्तत्येन तत् अनौचित्यम् असुन्दरं भवति इति आहार्यसौन्दर्यतज्ज्ञानां मतम् ।

इति श्री गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना महाकविना पण्डित ओगेटि परीक्षित् शर्मणा विरचितायां सौन्दर्यमीमांसायां आहार्यसौन्दर्यप्रकरणं समाप्तम् ।

# ११. सात्त्विकसौन्दर्य-प्रकरणम्

रत्यादिनवस्थायीभावानां निर्वेदादित्रयस्त्रिंशत्व्यभिचारिभावानां अष्टाणां स्तम्भादिसात्त्विकभावानां संहत्य पञ्चाशत्भावानां सामान्यगुणयोगेन रसाः निष्पद्यन्ते । घनीभूतरसमूर्तयः स्थायीभावाः हृदि तिष्ठन्ति । ते विभावानुभावैः स्वादुत्वमानीयमानाः रसे स्यन्दमानाः स्रवन्ति । व्यभिचारिभावाः स्थायीभावान्

स्वादुरसरूपेण द्रावयन्ति । तथैव सात्त्विकभावाः अपि स्थायीभावान् मथ्नन्ति तेभ्यः रसोत्पत्तिं दर्शयन्ति ।

## १९४. सात्त्विकसौन्दर्यं श्रेष्ठतमम् ।

सत्त्वं नाम परेषां सुखभावनाभिः भावितान्तःकरणत्वं सत्त्वम् । ततः समुत्पन्नाः भावाः सात्त्विकभावाः । यदा एते भावाः परेषां सुखादिभावनाभावितान्तःकरणात् संजनिताः भवन्ति तदा ते सौन्दर्यं वितन्वन्ति सुन्दराङ्गे । तस्मिन् समये समुत्पन्नस्य रसस्य सुन्दररूपत्वं सिद्ध्यति । असौन्दर्ये रसस्य सौन्दर्यं न भवति ।

## १९५. स्तम्भो नाम सात्त्विकभावसौन्दर्यम् ।

प्रिया स्वपाणिग्रहणं निशम्य
तुष्टा स्वयं चन्द्रमुखी बभूव ।
तदैव श्रुत्वा मरणं वरस्य
स्तम्भाकृतिं सा मधुरं प्रपेदे ॥

अत्र स्तम्भो नाम सात्त्विकभावः भाति । अयं भावः दुःखदः अपि तस्याः सौन्दर्येण सः भावः सुन्दररूपं भेजे । तस्मात् स्तम्भो नाम सात्त्विकभावः पूर्णसौन्दर्ये प्रतिभाति । सौन्दर्यं विना भावानामपि सौन्दर्यं न भवति । सौन्दर्यमेव सर्वरसानां मूलं भवति । सर्वरसानाम् आयतनम् अनन्तसौन्दर्यम् ।

## १९६. प्रलयो नाम सात्त्विकसौन्दर्यम् ।

कुटुम्बे सर्वबन्धूनां
निशम्यासौख्यजीवनम् ।
प्रपेदे वनिता नूनं
प्रलयं भावमण्डिता ॥

एका सुन्दरी कुटुम्बे विद्यमानानां सर्वेषाम् असौख्यजीवनं श्रुत्वा संसारे प्रलयप्रभञ्जनः वातीवानुभाव्य सौन्दर्यपूर्णप्रलयभावेन मण्डिता सुन्दरं रेजे ।

## १९७. रोमाञ्चो नाम सात्त्विकभावसौन्दर्यम् ।

हाहारावं रणे श्रुत्वा
कुमारस्य तनुः परम् ।
रोमाञ्चचितितं रेजे
सुन्दरं भयदं तदा ॥

उत्तरकुमारः रणे परसैनिकजनैः क्रियमाणशङ्खरावं हाहारावं श्रुत्वा अतीव-भयकम्पितः आसीत् । तदा तस्य शरीरे रोमहर्षः संजातः । तेन रोमहर्षेण तस्य बालस्य सौन्दर्येण रोमाञ्चसात्त्विकभावः अत्यन्तसुन्दरं बभौ ।

अपि च ।

मेघगर्जनभीता सा
रोमाञ्चकवचायिता ।
बभौ रामा च रामस्य
मधुरं बाहुबन्धने ॥

## १९८. स्वेदो नाम सात्त्विकभावसौन्दर्यम् ।

सैन्यं विलोक्य तत्रैव
स्वेदाङ्गः सुन्दरं परम् ।
उत्तरः सहसा जल्पत्
नाहं योत्स्यामि साम्प्रतम् ॥

सैन्यविलोकनेन उत्तरकुमारस्य तनुः स्वेदप्रसिक्तम आसीत् ।

तस्मिन् समये सः बृहन्नलं कथयति अरे बृहन्नल ! नाहमधुना योत्स्यामि मम गात्रं स्वेदस्नातं भवति इति । तस्मिन् समये तस्य देहः स्वेदप्रसिक्तः सुन्दरं चकासे । अत्र स्वेदसात्त्विकभावः सुन्दरं चकासे ।

## १९९. वैवर्ण्यो नाम सात्त्विकभावसौन्दर्यम् ।

गतायुषं पतिं श्रुत्वा
वैवर्ण्यलसितानना ।
चीराञ्चलावृता रेजे
हिमानीवृतपङ्कजा ॥

स्वपतिं मृतं श्रुत्वा तरुणी वैवर्ण्यभावेन लसिताननना तदीयदुःखमदर्शयितुं चीराञ्चलेन मुखं गोपयामास । तदा गोपनेन तस्याः मुखं हिमानीवृतपङ्कजमिव सुन्दरं बभौ ।

## २००. वेपथुः नाम सात्त्विकभावसौन्दर्यम् ।

शङ्करेण गृहीता सा
लज्जाभीतिपरीवृता ।
वेपथूभूषिता गौरी
रेजे त्रैलोक्यसुन्दरी ॥

अत्र शङ्करेण पाणिगृहीता पार्वती लज्जाभीतिपरिवेष्टिता वेपथुमती बभूव । तत्र वेपथुः तस्याः त्रैलोक्यसौन्दर्येण अनिर्वचनीयसात्त्विकभावसौन्दर्येण परं विरेजे ।

## २०१. अश्रु नाम सात्त्विकभावसौन्दर्यम् ।

सत्यवन्तं मृतं ज्ञात्वा
सावित्री दुःखिता बभौ ।
लोचने रेजतुः नीरैः
नभभाद्रपदाविव ॥

पातिव्रत्येन त्रिलोकसुन्दरी सावित्री सत्यवन्तं मृतं ज्ञात्वा अत्यन्तदुःखिता रेजे । तदा तस्याः लोचने श्रावणभाद्रपदौ भूत्वा नीरैः सुन्दरं ललसतुः । अत्र दुःखापेक्षया सौन्दर्यम् उत्कटायते । कालिमवर्णदुःखस्यापि सौन्दर्यं बभूव । यदि सौन्दर्यं स्यात् रसाः भावाश्च सौन्दर्यग्रसिताः परं राजन्ते । सौन्दर्यमेवावस्थाऽनुसारं रसान्तरं भजते । सौन्दर्येण रसस्यापि सुन्दरत्वं समायाति । रसो वै सः, स एव सौन्दर्यम्, सः एव आनन्दः ।

## २०२. वैस्वरो नाम सात्त्विकभावसौन्दर्यम् ।

भस्मावशेषं मदनं विलोक्य
निःशब्दगत्या गलबद्धदुःखैः ।
विक्षिप्तकेशा स्थिरभावनेत्रा
कन्दर्पपत्नी मधुरं विरेजे ॥

भस्मावशेषं स्वपतिं मदनं विलोक्य रतिः किमपि वक्तुम् अशक्ता गलबद्धदुःखा विक्षिप्तकेशा मूर्तीभूतसौन्दर्यपूर्णशोकः इव नितरां चकासे।

सौन्दर्यहीनानां मुखेषु सर्वे एते भावाः सर्वैरपि विलोक्यन्ते नाद्ये चानुभूयन्ते। किन्तु सौन्दर्यमूर्तीनां मुखेषु सर्वेऽप्येते भावाः भावावृतां व्यथामपि मधुरव्यथामिव सुन्दरदर्शनयुतामिव कुर्वन्ति। तस्मात् सौन्दर्ये सर्वमपि सुन्दरं प्रतिभात्येव। सुन्दराङ्गी कृशाङ्गी भूत्वाऽपि सुन्दरं भात्येव। तस्मात् सौन्दर्यमेव मूलतत्त्वं सर्वभावानां सर्वक्रियाणां चेति मादृशानां मतम्। एषु संदर्भेषु सामाजिकानां सहृदयानां सात्त्विकभावाः संजायन्ते। अधुनाऽस्मिन् संदर्भे सात्त्विकभावसौन्दर्यवत् अपि च बाह्यसौन्दर्यवत् चित्ताहंकारबुद्धिभावात्मसौन्दर्यात्मक-आन्तरिकसौन्दर्यादीनां सौन्दर्यं प्रति उल्लिखामि।

## २०३. चित्ताहंकारबुद्धिभावात्मभिः यत् प्रतीयते अनुमीयते च तत् आन्तरिकसौन्दर्यमिति कथ्यते।

अन्यसौन्दर्यानन्दवत् आन्तरिकसौन्दर्याणां सौन्दर्यं परमानन्ददायकं भवति। तेषां स्वरूपं सौन्दर्यं च प्रत्येकशः विवरयामि।

## २०४. चित्तसौन्दर्यं सर्वजनानन्ददायकम्।

**चित्तं सर्वरसापूर्णं**
**सर्वं पश्यति भूतले।**
**अदृश्यं दृश्यमानं च**
**क्षणे मौनेन सर्वथा॥**

जगति चित्तं सर्वभावनाभिः सर्वं स्वायत्तीकृत्य शान्तं तिष्ठति किंतु तत् तूर्णं न प्रकाशयति। चित्तस्य प्रकाशनशक्तिः न विद्यते किन्तु ग्रहणशक्तिः विद्यते। क्वचित् चित्तसौन्दर्यं वाक्सौन्दर्यद्वारा बहिरागत्य सर्वजनानन्ददायकं भवति। तस्मात् केचन बाह्यसौन्दर्यविहीनाः चित्तसौन्दर्येण मधुराः संदृश्यन्ते। चित्तं चेतनाचेतनेषु च संदृश्यते। तत्र सौन्दर्यम् अन्तर्लीनं भासते। तादृशावस्थां चित्तस्य सौन्दर्यंचित्तमेव जानाति। आन्तरिकसौन्दर्येण जनः चेतनाचेतनानां मध्ये स्थास्यति तैः साकं भाषिष्यति। चित्तसौन्दर्यभाषा मौनभाषा भवति चित्त-

सौन्दर्यभाषां ज्ञातुं सामाजिकानां चित्तसौन्दर्यमावश्यकम्। प्रकटनद्वारा चित्त-सौन्दर्यं परमसुन्दरं भवति।

**वनवासाय गच्छामि**
**राजा भवतु मेऽनुजः।**
**न भेदो विद्यतेऽस्मासु**
**कैकेयि प्रियदर्शिनि॥**

अत्र कैकेयीं प्रति रामस्य वचने तस्य मनसः सौन्दर्यं संदृश्यते। जननि, अस्मासु भ्रातृषु न किमपि भेदः विद्यते। राजा यः कोऽपि भवतु अस्मासु भ्रातृषु, धर्मः एव भारते नर्तिष्यति। नात्र विचारः कर्तव्यः। अहं वनवासाय प्रस्थितः। जगति सर्वम् एकमेवाद्वितीयं वर्तते। अस्मिन् संदर्भे चित्तसौन्दर्यं वचसा प्रकटीकृतमिति ज्ञातव्यम्।

साधारणतः जगति सौन्दर्यहीनाः चित्तसौन्दर्येण सुन्दरं वस्तु भावयिष्यन्ति। चित्तभावयोः अविनाभावसम्बन्धः वर्तते। चित्तं विना भावः नास्ति भावनया विना चित्तं न भवति। किन्तु सुन्दरचित्तेन सुन्दरभावः यदि ऊह्यते तदेव सौन्दर्यम्। एतदेव चित्तसौन्दर्यस्य लक्षणम्।

## २०५. अहंकारसौन्दर्यं रसिकजनानन्दकारकम्।

अहमिति भावना सर्वनारीषु सौन्दर्ययुक्ता इति कथयन्ती सत्यभामा श्रीकृष्णेन सार्धं सगर्वं व्यवहरन्ती स्वीयाहंकारसौन्दर्यं व्यक्तीकरोति।

**पादाघातेन ते शीर्षात्**
**मुकुटं गलितं खलु।**
**तथापि त्वं न रुष्टोऽसि**
**यतोऽहं सुन्दरी भुवि॥**

हे कृष्ण अहं रुष्टा मम वामपादेन तव शिरः अताडयम्। ते मुकुटं मस्तकात् गलितम्। तथापि त्वं न रुष्टः। अपि च अहमस्मि सर्वनारीसुन्दरीति मां सर्वदा भवान् कामयते। अत्राहंकारसौन्दर्यं व्यज्यते।

## २०६. बुद्धिसौन्दर्यं सर्वकालवरिष्ठं भवति ।

आनीतं सुफलं सर्वे
भुञ्जतु प्रियमीप्सितम् ।
इति कुन्ती जगादाशु
फल्गुणं बुद्धिसुन्दरी ॥

मत्स्ययन्त्रं भित्वा द्रौपदीसहितः विजयी प्रथमतः अन्तः प्रविश्य मातरं कुन्तीं प्रोवाच, मातः मया एकं फलं समानीतं इति । तत् श्रुत्वा कुन्ती भवन्तः सर्वे समभावेन तत्फलं भुञ्जन्तु इति सपदं बुद्धिसौन्दर्येण प्रत्युत्तरं ददौ अत्र बुध्याः सौन्दर्यं प्रतीयते समयानुकूलं संदर्भानुसारं च ।

## २०७. कविलोकप्रियं भावसौन्दर्यम् ।

यदि भावे सौन्दर्यं भवति तत् भावसौन्दर्यमिति रसिकाः सहृदयाश्च कथयन्ति । केषांचन भावसौन्दर्यं परिणते वयसि अनुभवेन च जायते । अन्येषां पठनेन सान्तत्यश्रवणेन संजायते । किंतु शैशवे न कोऽप्यनुभवः भवति । ते न किमपि श्रुण्वन्ति न किमपि पठन्ति । तथापि बालिकानां बालानां मुखेभ्यः तदा तदा सुन्दरभावाः व्यक्ताव्यक्तरूपेण वदनमण्डलात् निर्गताः भवन्ति तदेव निसर्गभावसौन्दर्यम् । तद्यथा :—

भुक्त्वाऽन्नं तिमिराकारं
हेमन्ते शीतबाधया ।
मेघाम्बरेण संछन्नः
निद्राति गगने शशी ॥

बाल्यक्रीडासु व्यग्रा अष्टवर्षीया बालिका स्वमातामहीम् आहूय कथयति अये पश्य विधुमण्डलं अस्यां निशीथिन्यां चन्द्रः तिमिररूपान्नं भक्षयित्वा अस्मिन् हेमन्ते शीतबाधया पीडितः मेघवस्त्राच्छादनरूपेण गगनतले स्वपतीति । एतां भावनां श्रुत्वा मातामही अपि बाले त्वं भावित्रकवयेत्री भविष्यसीति तां बालिकां वारं वारं विचुम्बति ।

## २०८. तत्त्वज्ञानां सुन्दरं भवति आत्मसौन्दर्यम् ।

आत्मा सर्वव्यापकः यथाऽनुरूपं पूर्वजन्मपापपुण्यानुसारम् आत्मा रूपान्तरं भजते । यदा वयं वृक्षाणां समीपं पुष्पापचयार्थं गच्छेम तदा ते वृक्षाः अस्माभिः साकं भाषयन्तः इव प्रकाशन्ते । तद्वत् यदा वयं पशुसमीपं गच्छेम तदा सः पशुः अस्मान् स्वीयात्मना पश्यतीव तत्र तेषां आत्मसंदर्शनम् अस्मदीयात्मसु प्रतिबिम्बितमिव पश्यामः । अपि च यथा स्वीयप्रियया, नो चेत् स्वीयप्रियेण प्रियजनाः भाषन्ते तदा तेषां आत्मानः परस्परं स्थानान्तरं प्राप्य, नो चेत् अन्योन्यं प्रतिबिम्बितौ इव अहमेव त्वं त्वमेवाहं आवां एकात्मस्वरूपकौ इति तत्र अनिर्वचनीयानन्दविशेषः भवतीति अनुभवैकवेदिनां सिद्धान्तः । यदि स्वीयात्मा एव सर्वत्र नरीनर्तीति मानवः चिन्तयति तर्हि अरिषड्वर्गादीन् छित्वा सः सत्यं स्वीयात्मना परमात्मनि लीनः भविष्यति । इयं भावना सर्वेषां आचरणकठिना भवति । यदि एतादृशी भावना भवेत् सा व्यक्तिः आत्मसौन्दर्यज्ञात्री भविष्यतीति अस्मादृशानां मतम् ।

सर्वत्र पश्याम्यात्मानं
सुन्दरं भुवि वस्तुषु ।
स एवात्मा च मय्यस्ति
एकः सर्वत्र दृश्यते ॥

अपि च :—

सर्वत्र जलकुम्भेषु
यथा सूर्योऽस्ति बिम्बितः ।
तथैवात्माऽत्रलोकेषु
दृश्यते बिम्बरूपकः ॥

एतादृशभावना यदि सर्वत्र सर्वेषां भवति तर्हि तत्र आत्मसौन्दर्यं विद्यतेति सिध्दान्तनिष्कर्षः । कश्चन सौन्दर्यमुद्दिश्य बोध्यमानोऽपि सुन्दरवस्तुनः सौन्दर्यं भोक्तुं अशक्तो भवति । इदं विचित्रं भवति लोके । तस्मात् अतिविरलाः सन्ति सौन्दर्यतत्त्वाराधकाः जनाः जगति । तस्मात् जगति सर्वं सर्वेषां न भवति । अदृष्टरम्यत्वं केषांचन केवलं अनुमेयं भवति तदेवात्म सौन्दर्यम् । अत्राधुना

सौन्दर्यस्य वैविध्यं परिपूर्णत्वं च विवृणमः । सौन्दर्यं षोडशप्रकारं विद्यते । यदि षोडशप्रकारसौन्दर्यम् एकत्र संदृश्यते तत् परिपूर्णसौन्दर्यमिति कथ्यते । तद्यथा :-

१) शरीरसौन्दर्यलुप्त-सौन्दर्यम्
२) आङ्गिकसौन्दर्यलुप्त-सौन्दर्यम्
३) वाचिकसौन्दर्यलुप्त-सौन्दर्यम्
४) आहार्यसौन्दर्यलुप्त-सौन्दर्यम्
५) सात्त्विकभावसौन्दर्यलुप्त-सौन्दर्यम्
६) चित्तसौन्दर्यलुप्त-सौन्दर्यम्
७) अहमिति सौन्दर्यलुप्त-सौन्दर्यम्
८) बुद्धिसौन्दर्यलुप्त-सौन्दर्यम्
९) भावसौन्दर्यलुप्त-सौन्दर्यम्
१०) आत्मसौन्दर्यलुप्त-सौन्दर्यम्
११) आकर्षणात्मकसौन्दर्यलुप्त- सौन्दर्यम्
१२) विलाससौन्दर्यलुप्त-सौन्दर्यम्
१३) संस्कारसौन्दर्यलुप्त-सौन्दर्यम्
१४) साहित्यसौन्दर्यलुप्त-सौन्दर्यम्
१५) संगीतसौन्दर्यलुप्त-सौन्दर्यम्
१६) भक्तिसौन्दर्यलुप्त-सौन्दर्यम्

**२०९. शारीराङ्गिकवाचिकाहार्यसात्त्विकचित्ताहंकारबुद्धिभावात्मा-कर्षणविलाससंस्कारसाहित्यसंगीतभक्तिसौन्दर्याणां समवाय एव परिपूर्णसौन्दर्यम् ।**

यद्येषु एकेन लुप्यते तर्हि तत् लुप्तसौन्दर्यम् इति ज्ञेयम् ।

...१०...

## २१०. सौन्दर्यममृतं भुवनेषु ।

सौन्दर्यं चतुर्दशभुवनेषु अमृतं भवति। तदेव सर्वजन्तूनां दिव्यत्वम् अमृतत्वम् जनयति। सौन्दर्यममरं भाति। रोगिणः अपि सौन्दर्यदर्शनेन चुम्बनेन आलिङ्गनेन स्पर्शनेन घ्राणेन ऊहेन लेहनेन नीरोगिणः भवन्ति। सौन्दर्यचुम्बनेन देहरक्तनाळानि धमन्यः वाहिन्यः विचलिताः भवन्ति। ततः देहे रक्तप्रवाहः रोगिणं नीरोगिणं करोति। प्राणिनः दीर्घायुष्मन्तः भवन्ति। तस्मात् सौन्दर्यं परमौषधमुच्यते।

सौन्दर्यानुभवेन प्राणिनः अवर्णादारभ्य क्षवर्णपर्यन्तं विद्यमानान् जीवनसत्त्वगुणान् लप्स्यन्ते। जगति सर्वोऽपि यथाकथंचित् सौन्दर्यानुभोक्ता भवत्येव।

## २११. असौन्दर्यात् सौन्दर्योत्पत्तिः ।

भुवनेषु यथा सौन्दर्यं दृश्यते तथैवासौन्दर्यमपि नरीनर्ति। सौन्दर्यम् असौन्दर्यं च कथं भवतः? असौन्दर्यमेव परिणामरूपेण सौन्दर्यवत् प्रतिभाति नो चेत् सौन्दर्यमेवासौन्दर्यवत् प्रतिभाति इति सन्देहः। किन्तु विचार्यमाणे वातावरणपरिणामात् सूर्यप्रकाशस्य प्रभावात् त्रिसन्ध्यामूलकत्वात् भूमेः परिवर्तनत्वात् षड्र्तुमूलकत्वात् सर्वं भौतिकं परिणमति। भूम्यां सारनिःसारमूलकत्वात् अतिवृष्टि-अनावृष्टि-मूलकत्वात् वृक्षलताव्रततीनां सौन्दर्यं परिणमति। सर्वभौतिकसौन्दर्यस्य मूलकारकः त्रयीतनुरेवेति सूर्योपासकानां मतम् एतदेव वैज्ञानिकानां मतं च भवति।

## २१२. बाह्यसौन्दर्यात् आन्तरिकसौन्दर्यं महिमाऽन्वितम् ।

आन्तरिकसौन्दर्यं तु वंशपरम्परागताचारव्यवहारैः विद्याऽभ्यासेन संगीतज्ञानेन पूर्वजन्मकृतसद्वर्तनमाहात्म्येन च सुन्दरभावनाऽऽनुगुण्यवाचकेन शान्तदयेत्यादिगुणगणैः समलङ्कृतं प्रतिभाति। बाह्यसौन्दर्येण हीनाः अतः असुन्दराः, अर्थात् बाह्यसौन्दर्यहीनाः सर्वं लोकम् आन्तरिकसौन्दर्येण समाकर्षन्ति।

यथा च वृक्षाणां कुसुमेषु सुन्दरकुसुमानि नयनानन्दकराणि भवन्ति तद्वत् बाह्यसौन्दर्यधारिणः नयनानन्दकराः भवन्ति। यथा च गन्धिलकुसुमानि

कानिचन द्रष्टुं सुन्दराणि न भवन्ति तथापि तानि सर्वां सृष्टिं समाकर्षन्ति स्वीयपरिमलैः, तद्वत् आन्तरिकसौन्दर्ययुतानां सौन्दर्यं भवति। यदि बाह्यसौन्दर्यम् आन्तरिकसौन्दर्यं च एकत्र स्यातां तर्हि तत्र दिव्यत्वमेव भवति गुलाबिचम्पामल्लिकादिवत्।

## २१३. आध्यात्मिकसौन्दर्यं सर्वोत्तमसौन्दर्यं भवति।

बाह्यान्तरिकसौन्दर्यसंपृक्तं दिव्यपरमात्मस्वरूपभावनासमुपेतं सौन्दर्यं सर्वं भुवनत्रयं समाकर्षति। यथा महापुरुषाणां श्रीरामकृष्णादीनां शङ्करविवेकानन्दबुद्धादीनां बाह्यान्तरिकाध्यात्मिकसौन्दर्यमूर्तीनां प्रभाववत्।

तथैव पुष्पेषु मृगेषु द्विपदेषु वृक्षेषु च बाह्यान्तरिकदिव्यात्मस्वरूपं द्योतते। तस्मादेव श्रेष्ठत्वं सर्वजातिषु अस्मदीयप्राचीनैः तरतमभावप्रकारेण निर्णीतम् आसीत्। ततः सौन्दर्यस्य परिपूर्णत्वं न कुत्रापि दृश्यते लोकेशमन्तरेण। सर्वत्रापि प्रकृत्यां सौन्दर्यासौन्दर्याविच्छिन्नं रमणीयं वस्तु संदृश्यते। यथा पुंसि स्त्रीलक्षणानि स्त्रीषु पुरुषलक्षणानि संदृश्यन्ते तद्वत् सर्वमपि प्रपञ्चं सदसत्-सुन्दरासुन्दरं प्रकृतिपुरुषसंमिश्रितमेव। तत् सर्वं न्यूनाधिक्यभावेन सूर्यप्रकाशमूलकत्वात् क्वचित् सुन्दरम् अन्यत्र असुन्दरं संदृश्यते किन्तु सर्वमपि एकमेव सुखद्वयान्वितम्।

## २१४. कर्मण्यताप्रदायकं सौन्दर्यमाहात्म्यम्।

सुन्दरवस्तुरूपकान्तिदर्शनेन सौन्दर्यशब्दोच्चारणेन सौन्दर्यानुभवेन जगति जन्तुः चिरकालं जिजीविषति। तदा तदा सौन्दर्यानुभूत्यपेक्षया जगति न किमपि विद्यते सुखास्पदं सुखजनकम् इति सर्वेषां भावना संजायते। ततः लोके सौन्दर्यपिपासवः सौन्दर्यप्राप्त्यै सुन्दरवस्तुप्राप्त्यर्थं च सर्वथा प्रयतन्ते। सर्वः इह सुखाय सौन्दर्यं पूजयति। सुन्दरस्थानानि गत्वा तत्र सौन्दर्यप्राप्त्यर्थं सर्वथा प्रयतते। तस्य कृते प्राणान् त्यजति। स्वीयसंसारम् असारं निःसारं भावयति। सर्वत्र विविधरूपैः विराजमानं सौन्दर्यम् एकत्रभावनया समानीय, नो चेत् चोरयित्वा पातुं विचेष्टमानमानसः भवति। सः जगति सौन्दर्यादृते नान्यदस्तीति कथयति। सर्वदा सौन्दर्योपनिषदं पठति। अयं लोकः सत्यः इति भावनया भौतिकसुखाय जीवति। अत्रैव सर्वं विद्यतेति स्वप्नान् पश्यति। तस्मात् हेतोः भौतिकसुखलोलुपत्वं प्रजनयति केषांचन जनानां सौन्दर्यम्।

## २१५. सौन्दर्यं जातिवर्णविहीनम् ।

साधारणतः जगति सर्वेषां सौन्दर्यं तरतमभेदैः जातिनिष्ठमिति एकस्यां जात्यां सौन्दर्यम् उत्तमं भवतीति अन्यस्यां जात्याम् अधमं वर्ततेति भावः अस्ति। स्थूलदृष्ट्या विचार्यमाणे तत् सत्यमेव सर्वजातिषु स्थावरजङ्गमात्मकेषु सौन्दर्यं विभिन्नकान्तिभिः विभिन्नदर्शनैः द्योतते। किन्तु सूक्ष्मदृष्ट्या विचार्यमाणे यत् सौन्दर्यं सर्वत्र दृश्यते तत् एकमेव भवति। तेषां पात्रताऽनुसारं तेषां सहजात-शरीरनिर्माणानुसारं सौन्दर्यं तरतमभावैः भ्राजते। अद्वैतभावेन विचार्यमाणे सौन्दर्यस्य जातिः न विद्यते, भिन्नता विद्यते। इदं सौन्दर्यं जातिवर्णविहीनं तेजोमयमेव। सौन्दर्यम् एकमेव किन्तु परिसरप्रभावेन, खाद्यान्नप्रभावेन विद्यमान-स्थलप्रभावेन संस्कारेण तरतमभेदेषु संदृश्यते। यथा विद्युत्प्रवाहे विद्युद्दीपकर्णिकाः तेषाम् उपाधिभिः शरीरनिर्माणैः यावच्छक्त्यात्मकं विद्युतं नेतुं शक्तिवत्यः तावतीं विद्युतं गृह्णन्ति नत्वधिकाम्। अर्थात् तेषां संख्याऽनुसारं शरीरनिर्मित्यनुसारं तेषु कान्तिः भवति। ते विभिन्नाः विविधतरतमभेदकान्तिभिः विद्योतमानाः सन्ति। किन्तु विद्युत्प्रवाहः एकः एव। तस्मात् सौन्दर्यं यत्र कुत्रापि विद्यमानं सौन्दर्यमेव। सौन्दर्यस्य जातिः न विद्यते। सौन्दर्यप्रभावेन तरतमभेदेन जाति-विभागः वर्णविभागः यदि क्रियते तर्हि आक्षेपो न कर्तव्यः। तत् केवलं लोक-व्यवहारार्थं तरतमभेदज्ञानार्थमेव भवति।

## २१६. सौन्दर्यमन्ततः जुगुप्साजननकारकम् ।

जगति सर्वत्र सौन्दर्यम् असौन्दर्यं प्रकाशः अप्रकाशः ईप्सा जुगुप्सा च भवन्त्येव। सौन्दर्ये असौन्दर्यं, सुगन्धे दुर्गन्धः, शान्ततायां क्रूरता, सुन्दरसमी-चीनवस्तुषु असुन्दर-असमीचीनरूपरेखाः संदृश्यन्ते। विचार्यमाणे जगत्सर्वं द्वैधीभावेन पूर्णत्वं प्राप्य एकरूपेण संदृश्यते। एतत् सर्वं सूर्यसन्ध्यामूलकमिति सौन्दर्यमीमांसकानां मतम्। जगति सौन्दर्यम् अनुभूय अन्ततः मानवः जराजर्जरिततनुः बाह्यसौन्दर्यं निन्दन् असह्यभावं प्रकटयन् बाह्यसौन्दर्यलालसता सत्य-सौन्दर्यज्ञानाय हेतुः भवतीति कथयति। स्वीययौवने कृतबाह्यसौन्दर्यानुभूतिस्मरणेन श्रवणेन जुगुप्साभावं प्राप्नोति। ततः अन्ततः बाह्यसौन्दर्यं सर्वेषां जुगुप्साभावं जनयत्येव।

## २१७. सौन्दर्यं सर्वप्राणिवस्तुनिष्ठम् ।

सौन्दर्यं विश्वव्याप्तं सर्वत्र स्थावरजङ्गमान्तर्लीनम् । क्वचित् प्रस्फुटं क्वचित् अस्फुटं क्वचिदन्तर्हितं क्वचित् बाह्यं क्वचित् सत्यरूपेण क्वचित् शब्दरूपेण क्वचित् सुसंबद्धपरमाणुसमूहसंमिश्रणेन क्वचित् विविधवर्णरूपेण ध्वनिरूपेण परिव्याप्तं द्योतते । तत् सर्वं ज्ञातुं कलात्मकदृष्टिः अत्यन्तावश्यकी भवति । संस्कारभावनाविशेषः प्राधान्येन भवति । संस्कारजन्यभावनाविशेषः सर्वेषां न भवति । परिशीलने परिशोधने च एकैकस्य एकैकविषये एकैकस्मिन् वस्तुनि सौन्दर्यं संदृश्यते । तत् सौन्दर्यं नैवान्येषां सुन्दरं भवति । सर्ववस्तुषु किमपि सौन्दर्यदर्शनमेव सहृदयलक्षणं भवति । यदि च कश्चन सहृदयः संध्यां विलोक्य अन्यं प्रति अरे संध्यां पश्य, सा अत्यन्तसुन्दरी दिव्या भाति, तां दृष्ट्वा मे मनः नृत्यति । तस्याः दर्शनेनाहं सर्वं विसृजामि, तल्लीनो भूत्वा नान्यं चिन्तयामि इति । सः श्रोता कथयति । अहं सर्वदा सन्ध्यां मे जन्मनः प्रभृति पश्यामि । सा सन्ध्या न किमपि भावं जनयति । न मे मनः नृत्यति । किं तत्र विद्यते ? । तत्र केवलं रक्तिमवर्गः भाति । किमत्राश्चर्यस्यानन्दस्य चावकाशः इति । सौन्दर्यानुभूतिः वैयक्तिकसंस्कारभावनाऽनुसारं भवति । सौन्दर्येण विना तत् यदि बाह्यसौन्दर्यं वा आन्तरिकसौन्दर्यं वा शब्दसौन्दर्यं वा दृक्सौन्दर्यं वा किंवा यद् वा, तद् वा भवतु भावोत्पत्तिः न भवति । यदि भावोत्पत्तिः न भवति रसोत्पत्तिरेव शङ्कास्पदं भवति ।

## २१८. सुन्दरभावाः रससौन्दर्यनिष्पादकाः ।

भवतीति भावः । सः भावः सर्वदा वर्तते । जगति सर्वमपि परस्परसह-कारेण परस्पराकर्षणेन च प्रचलति । यथा ग्रहाणां परस्पराकर्षणेन खगोळं सुन्दरं समुज्ज्वलं भासते तद्वत् भावः अपि सुन्दरसन्निवेशैः चैतन्यात्मकः रससौन्दर्यरूपेण भ्राजते । अयस्कान्तः यथा अयः समाकर्षति तद्वत् सन्निवेशाः भावं प्राबल्येन समाकर्षन्ति तदा अनुभूतिमन्थनेन विचारेण च अमृतरूपः रसः समुद्भवति । भावः घनीभूतः हिमखण्डवत् । सः विविधसन्निवेशैः विविधरसान् प्रजनयति द्रावितः । पृथ्वी षडर्तुभिः समाकृष्टा स्वीयगन्धगुणैः सुसंदर्भं प्रभवानुसारं विविध गन्धान् विकिरन्ती जगत् नूतनं गन्धिलं करोति ।

सर्वं जगत् आधाराधेयचेतनाचेतनपरस्पराकर्षणादिभिः प्रचलति। यदा मानवाः स्थावरजङ्गमाश्च तादृशलक्षणसमन्वितायां प्रकृत्यां सन्ति सहजतया प्रकृतिलक्षणोपेताः सर्वपरिवर्तनादिकं पृथ्वीवत् अनुभवन्ति। तस्मात् भावः पञ्चभूतेषु पृथ्वीरूपं भजते।

जगति स्थायिभावः केषांचन पूर्वजन्मसंस्कारविशेषेणैव संजायते नत्वन्यथा। स्थायिभावः सर्वेषां हृदि न भवति। तत्कथमित्युक्तौ ये स्थायिभावरहिताः वर्तन्ते तेषां ललितकलानां माहात्म्यं तज्जनितरससौन्दर्यं न भवति। यत्र स्थायिभावानामभावः तत्र रसोत्पत्तिः न भवत्येव। ततः जगति सर्वे विषयाः सर्वेषां नैव भवन्ति। जगति रसानन्दः तेषां मनोधर्मगुणानुसारं भवत्येव। मणौ सूर्यप्रकाशपातेन यथामणिः विविधरोचींषि विकिरति तनोति च तद्वत् स्थायित्वेन विद्यमानभावः, नो चेत् तुषारखण्डवत् विद्यमानभावः, विविधसन्निवेशैः विभावादिभिः विद्रुत्य विविधपात्रेषु नवविधरससुन्दरस्वरूपैः सहृदयानां तुषारदुग्धमधुशर्कराघृतदधिमिश्रितपानकमिव परमानन्दम् अनिर्वचनीयभावतादात्म्यं संजनयति।

## २१९. सुन्दराविष्कारः एव सौन्दर्यम्।

शरीरावयवेषु क्वचित् किञ्चित् असौन्दर्यं विद्यमानमपि यत् संहृत्य आविष्कारे सुन्दरं दृश्यते तदेव सौन्दर्यमिति केषांचन मतम्। एतादृशसौन्दर्यं तल्लुप्तसौन्दर्यमेवेति अस्मादृशानां मतम्। यदि सौन्दर्ये किञ्चिल्लोपः नो चेत् दोषः पिहितः प्रच्छन्नः वा भवति तर्हि सः कालक्रमेण दृष्टिसमक्षमेत्य असमाधानकारको भूत्वा मनः तुदति। अपि च यत्र रससौन्दर्यास्वादने भङ्गो भवति तत्र तत् असौन्दर्यमेवेति ज्ञेयम्। सर्वावयवानां सौन्दर्यम् एकत्र राशीभूतं चेत् तत् समष्ट्यां संमोहनकारकसौन्दर्यस्याविष्काररूपकं भवेत् चेत् तदेवोत्तमसौन्दर्यम्।

विना च दोषो यत्रास्ते<br>
सौन्दर्यं पृथिवीतले।<br>
तदेव पूर्णसौन्दर्यम्<br>
इत्येवं भाव्यते चणैः॥

सुन्दररङ्गाविष्कारवस्तूनां द्रष्टॄणां नेत्रकिरणरङ्गाणाम् आविष्कारमध्ये संजातभावमन्थनेन तत्र विद्यमाननानाऽवयवनिर्माणेषु प्रद्योतमानसौन्दर्येण च

सौन्दर्याविष्कारः भवति। यदि सहृदयता रसिकता भावाश्च न स्युः सौन्दर्योत्पत्तिरेव न भवति। तस्मात् सुन्दरभावानां रङ्गाणाम् अवयवनिर्माणेषु प्रस्फुटकान्तिच्छटानां मिश्रणेन संजनितरङ्गाविष्कार एव सौन्दर्यम्।

द्रष्टृणां लोकवस्तूनां
भावरङ्गेषु विस्फुटम्।
द्योतते मनने भव्यं
तद्धि सौन्दर्यमुच्यते॥

सुन्दराविष्कारः मानवेषु शिल्पेषु वृक्षेषु मृगेषु वा अपि च भावेषु वा भवतु संगीते च वा भवतु मानवनिर्मितवस्तुषु वा भवतु तत् सौन्दर्यमेव भवति। तस्मिन् सौन्दर्याविष्कारे चैतन्यं जीवनं च दृश्येते। अयोनिर्मितवाहनानि अपि आविष्कारेण सुन्दराणि भवन्ति। तदा तदा ते अपि मानवसंग्राहकप्राणिनः इव प्रतिभान्ति। तस्मात् चैतन्ययुक्तसौन्दर्यमेव आविष्कारसौन्दर्यम्।

## २२०. चैतन्यमेव सौन्दर्यमूलकम्।

चैतन्यम् अन्तर्लीनं भूत्वा सर्वं जगत् चालयति। मानवाः चैतन्ययुताः अपि केचन चैतन्यविहीनाः संदृश्यन्ते। आकर्षणात्मकचैतन्यमेव सौन्दर्यम्। केचन निस्तेजाः रङ्गाचित्रितपुत्तलिका इव निर्जीवाः दृश्यन्ते। केवलशरीररङ्गमात्रेण सुन्दराः इति कथनम् अज्ञानमेव भवति।

## २२१. ऊहसौन्दर्यम् अचुम्बितम् अमरं च।

ऊहसौन्दर्यं केवलं कवीनां शिल्पकाराणां चित्रकाराणां संगीतज्ञानामेव भवति न त्वन्येषाम्। एते उपर्युक्तप्रतिभावन्तः सहृदयाः नित्यसन्तोषिणः आनन्दे मज्जनोन्मज्जनं विधास्यन्तः अचुम्बितभावावेष्टिनाः भवन्ति। ऊहसौन्दर्यम् ऊहहीनानाम् अनूह्यं भवति। ऊहसौन्दर्यम् आरोग्यकारकं सर्वशक्तिसंदायकं च भवति। भौतिकसुखे लुठतां सौख्याभावात् ते एतान् ऊहसौन्दर्यमग्नान् विलोक्य एते निर्धनाः भौतिकसुखरहिताः कथम् आरोग्येण संतोषेण च सन्ति इति विचारयन्ति। ऊहसौन्दर्यमुद्दिश्य ते उक्तवन्तः अपि ज्ञातुम् अशक्ताः भवन्ति यतः स ऊहः तेषाम् अनूह्यः भवति। ऊहसौन्दर्यं नित्यनूतनं दिव्यं भव्यम् अमरं भवति।

## २२२. प्रतिभासौन्दर्यं मकुटायमानम् ।

प्रतिभासौन्दर्यं जन्मना जायते । प्रतिभाविहीनः कविः न भविष्यति । प्रतिभा कवित्वे केवलं संदृश्यते अपि चान्यत्र भङ्ग्यन्तरेण दृश्यते । प्रतिभावान् कविः अदृश्यमपि विलोक्य स्वीयकाव्ये सर्वेषां दर्शयति महाद्भुतम् । कवि-प्रतिभा काव्ये सर्वसुन्दरं परिदृश्यते । सर्वमिदं जगद् भगवतः प्रतिभया केवलं सृष्टमिति प्रतिभाशालिनां मतम् । कविः दृश्यमानं प्रपञ्चं विस्मृत्य नव्यप्रपञ्चं सृजति स्वीयकाव्ये, ततः तं प्रजापतिसमं कथयन्ति रसज्ञाः आलङ्कारिकाः । सर्वमकुटायमानं प्रतिभासौन्दर्यम् ईडामहे ।

इति श्री गीर्वाणान्ध्रभाषाप्रवीणेन महाकविना गीर्वाणगेयकविमण्डल-चक्रवर्तिना पण्डित ओगेटि परीक्षित् शर्मणा विरचितसौन्दर्यमीमांसायां सात्त्विक-सौन्दर्यप्रकरणं समाप्तम् ॥

## १२. चित्रशिल्पसौन्दर्यप्रकरणम् ।

मानवनिर्मितचतुःषष्टिकलासु काश्चन कलाः अर्थात् चित्रशिल्पसंगीतनाट्य-कविताः इत्येताः पञ्चकलाः आह्लादकारकाः भवन्ति । एताः पञ्चकलाः सौकुमार्य-भावोपेताः ललितस्वरूपाः प्रतिदिनप्रवर्धमानसौन्दर्यसंशोभिताः पूर्वजन्मसञ्चित-पुण्यपरिपाकेन रसहृदयेन केवलं समास्वाद्यन्ते अनुभूयन्ते च सहृदयैः । कलास्वेतासु पञ्चसु उत्तरोत्तरकला बलीयसी भवति सर्वसुन्दरवस्तुभावरस-सौन्दर्यैः । चित्रशिल्पयोः मध्ये रेखामात्रसाम्येन आविष्कारभावसाम्येन च साम्यं सन्निहितत्वं च विद्यते । ततः चित्रशिल्पसौन्दर्यप्रकरणमिति नाम विधाय यथायोग्यं तेषां महत्त्वं विवृणमः ।

रेखास्वरूपमात्रेण<br>
भावाविष्करणेऽनिशम् ।<br>
एतद् द्वयं समानत्वं<br>
भजते सुन्दरैः गुणैः ॥

## २२३. ललितकलासु चित्रसौन्दर्यमेव प्रथमस्फोरकम् ।

सर्वकलासु प्रथमतः मानसिकचित्रमेव रूपं धरति समक्षम् । सामान्यतः कलाकारः चित्रकारः शिल्पकारः संगीतकारः नाट्यकारः कविताकारः वा भवतु एते सर्वे प्रथमतः चित्ते ऊहचित्रं निर्मान्ति । एते कलाकाराः प्रथमतः अत्यन्त-सुन्दरभावेन मानसिकचित्रं निर्माय तदनुसारं चित्रं शिल्पं संगीतं नाट्यं कवितां वा कुर्वन्ति । मानसिकसौन्दर्ये चित्रं यादृशं सुन्दरं भाति तद्वत् निर्माणे न भाति । प्लेटो इत्यादयः ग्रीसदेशीयाः, मानसिकचित्राणां सौन्दर्यं परमपवित्रं भवति मानसिकचित्रं बहिः प्रयत्नपूर्वकं कृतं द्विवारं त्रिवारं मानसिकचित्रात् उत्पाटितम् असुन्दरं भाति, इति कथयन्ति तत् सत्यम् । कविः मनसि यच्चित्रं करोति तत् शब्दैः भावैः चित्रयितुं प्रयतते । किन्तु तस्य प्रकाशः चित्ररूपेण शिल्परूपेण च भवति । तथापि काव्ये भावनाऽनुरूपपरिपूर्णसौन्दर्येण न भवति । एतावता कथने तात्पर्यं किमित्युक्तौ चित्रमेव प्रथमतः सर्वैरपि चित्र्यते तेषाम् ऊहप्रकारेण । प्रकृत्यां प्रत्यक्षचित्रवस्तुप्रेक्षणापेक्षया मानसिकचित्रवस्तुनः कल्पनाप्रेक्षणमेवानन्दहेतुः भवति ।

मानसिकचित्रनिर्माणे रङ्गरेखादीनां सृष्टिः अतीव पवित्रा दोषरहिता प्रतिभाति । चित्रलेखने तत् किञ्चित् न्यूनं भवति । चित्राणां सौन्दर्यं रेखासु यथायोग्यरङ्गेषु संदृश्यते । सुन्दररेखानिर्माणेन भावनया कुञ्चिकया तूलिकया वा केवलं रूपस्याविष्कारः भवति । स चाविष्कारः सुन्दरभावनाऽनुकूलरङ्ग-विलेपनेन उदात्तसुन्दरदृश्यरूपेण नेत्रनिर्वाणं संजनयति । एतादृशरङ्गरूपनिर्माणेषु भारतवर्षे सिद्धहस्ताः राजारविवर्मादयः प्रातः स्मरणीयाः भवन्ति । एतादृश-महानुभावानां रूपरङ्गसमञ्चितानि चित्राणि सहृदयहृदयफलकेषु शाश्वतमुद्रा-रूपेषु अनभिहितानि असंमार्जितानि विलसन्ति । अजन्ताकुड्यचित्राणि नानाविध-रङ्गाञ्चितानि सर्वमपि धरातलं स्वसमीपमिव समाकर्षन्ति । तानि चित्राणि तिष्ठन्ति आचन्द्रतारार्कम् ।

बाह्यप्रपञ्चे निर्मितानि सुन्दराणि चित्राणि जगत् सर्वं समाकर्षन्ति तथापि तानि चित्तनिर्मितचित्रेभ्यः न्यूनानि भवन्ति सौन्दर्यप्रजनने इति ज्ञेयम् ।

रूपरङ्गसुरेखाभिः
भावमालाविभूषितम् ।
फलके रेखितं चित्रं
चित्तचित्रान्न चाधिकम् ॥

अपि च चित्तचित्रं पवित्रम् अन्यैः अचुम्बितम् च भवति ।

चित्तचित्रं सदा रम्यं
सर्वकालविनूतनम् ।
अदोषदृष्टिसंयुक्तं
स्पर्शहीनं विराजते ॥

कवयः ऊहचित्रे सर्वं रेखारूपेण वर्णरूपेण जीववन्तं भावयित्वा कवयन्ति । कवयः अक्षरैः वागर्थैः रङ्गरञ्जितवाक्यैः भावरञ्जितरसप्रवाहे ओतप्रोतं कवितावस्तु गूढचित्रशिल्पेषु निर्मान्ति । चित्रकाराः रेखाभिः रङ्गैश्च भावान् चित्रे प्रकटयन्ति आविष्कुर्वन्ति । ततः सर्वकलासु प्रथमतः चित्रीकरणमेव प्रथमं भवति । चित्रलेखनं रेखामात्रेण जातमपि तत् पूर्णभावं जनयिष्यति । कश्चन चित्रकारः अश्वस्य पुच्छं वा शुनकस्य पुच्छं वा यदि लिखिष्यति रेखासु, सर्वमपि चित्रम् अस्मत्समक्षमेऽयेव । केवलरेखामात्रेण चित्राविष्कारः मनसि जायते ।

रेखामात्रेण चित्रस्य
मञ्जुलं भावसुन्दरम् ।
चित्रकारो ददात्येव
पूर्णरूपं तु शाश्वतम् ॥

चित्रलेखनतज्ज्ञाः स्वल्परेखाभिः चित्रसौन्दर्याविष्कारनिपुणाः भवन्ति । तस्मादेवमुच्यते रेखामात्रलाघवेन पुत्रोत्सवं मन्यन्ते चित्रकाराः । मनसि रेखाचित्रस्य रङ्गलेपनं सर्वोऽपि सहृदयः स्वीयकलाज्ञानेन करिष्यति । किन्तु तत् अन्येषाम् अदृश्यं भवति । चित्रफलके रेखाचित्रनिर्माणं तस्य रङ्गलेपनं मानसिकचित्ररङ्गापेक्षया कष्टतरं भवति । ऊहे सर्वमपि सुलभनिर्मितं भवति । तदेव प्रत्यक्षीकरणे आविष्करणे तदा तदा असम्भवमेव जायते । फलके निर्मितचित्रम् उत पत्रे रेखितचित्रम् एकदिशाभागसौन्दर्यमेव दर्शयति न तु सर्वाङ्गसौन्दर्यम् । ऊहचित्रं सर्वदा अतुलितसौन्दर्यसमञ्चितं राजते । तस्मादेवमुच्यते ।

सुन्दरी भावना चित्ते
यदि स्यात् करणे ध्रुवम् ।
सुन्दरी सा भवत्येव
ऊहरेखा समञ्चिता ॥

## हम्पीवैभवगीतम्

अस्मिन् गीते गतहम्पीवैभवं समक्षं चित्ररूपेण प्रदर्शयन्ती इयं गीतिका मद्रचितजानपदनृत्यगीतमञ्जर्याः समुद्धृता। रसज्ञानां कलावतां च मनसि पठनानन्तरम् एकविशिष्टचित्ररूपसंदर्शनमेव भविष्यति । कवितायां चित्रसंदर्शनं यथा ।

प्राचीनान्ध्रावनिसंस्कारिणी
भारतजनताहृदयस्पन्दिनी ।
पम्पातीरे शिल्पितहम्पी
एकाऽक्षतस्वप्नकथेवाभाति ॥ प्राचीना

विरूपाक्षार्थिकसंभारेण
विद्यारण्याशीर्वादबलेन ।
हरिहरबुक्कोर्वीपतियत्नेन
रचिता पूर्वं सा विज्ञानेन ॥ प्राचीना

प्रस्थरतक्षितजीवनरेखाः
स्मेराङ्कुरविलसितशिल्पाकाराः ।
चतुराननमानसाशिल्पितभावाः
इमे हम्पीयौवनलास्याकाराः ॥ प्राचीना

सरिगमपधनिसु सप्तस्वरशालिनी
श्रीकृष्णरायप्रतिभागायिनी ।
दिग्गजकविमण्डलकविताजीविनी
भारतसंस्कृतिचरमदशारूपिणी ॥ प्राचीना

वीणानिक्वणप्रचुरितसंगीता
कवितावनिताविराचितहेवाका ।
नूपुरपदचालनध्वानितसकलाशा
पूर्वं रेजे मञ्जुलहम्पी नाट्याकारा ॥ प्राचीना

अगणितवैभवतन्मयहम्पीहृदयम्
अधुना शिथिलितभीकरशकलाकारम् ।
शिल्पं सर्वं जीर्णं भद्रानधाम्
कपिकुलसंकेतस्थानं दैवायतनम् ॥ प्राचीना

आसुरशक्त्या चूर्णिताशिल्पाकाराः
भारतजनहृदि मुद्रितभीमाकाराः
कथयति हम्पीप्रकृतिरहस्यं विगलितरूपा
पम्पा भद्रा रक्षितप्राकृतप्राकाराकारा ॥ प्राचीना

कविरपि प्रथमतः चित्रं मनसि विनिर्माय तत् चित्रं शब्दार्थभावेषु संयोजयति । तेन चित्रेण तत्कवितापठनेन पाठकाः रसार्द्रपूर्णमानसाः भवन्ति । तस्मात् कवितासु चित्रम् अनिवार्यं भवति । महाकवीनां कवितासु चित्रशिल्पमूर्तयः संदृश्यन्ते । कालिदासमहाकविरचितमेघदूतश्लोकेषु प्रतिश्लोकं चित्रं शिल्पं च संदृश्येते । चित्रशिल्पसंगीतनाट्यं महाकवीनां कवितासु रसमयं भूत्वा संदृश्यते । यत्र शिल्पसंगीतनाट्यं न दृश्यते तत्र तत् काव्यं न भवति ।

## २२४. शिल्पसौन्दर्यमपरूपम् ।

शिल्पे परिपूर्णसौन्दर्यं जीवन्तं सर्वदृक्कोणेभ्यः वयं द्रष्टुं शक्नुमः । शिल्पनिर्माणेऽपि प्रथमतः रेखाचित्रस्यावश्यकता भवति । शिल्पसौन्दर्याविष्कारनिर्माणे धातवः मृत्तिकाश्च उपयुज्यन्ते । निर्मित-ऊहचित्रप्रतिकृतिषु धातूनाम् औष्णिक्यद्रावकपूरणेन धातुशिल्पानि भवन्ति । तानि सम्यक् समुल्लीढानि कान्तिमन्ति विधाय सौन्दर्यप्राणितानि कुर्वन्ति शिल्पकाराः । तेषु प्रसिद्धानि सर्वधातुमिश्रितशिल्पानि, कांस्यशिल्पानि, रजतशिल्पानि, सुवर्णशिल्पानि भवन्ति । मृत्तिकाशिल्पेषु पारिसस्य प्लास्टरशिल्पानि रबरशिल्पानि प्लास्टिकशिल्पानि प्रसिद्धानि सन्ति । तक्षितशिल्पेषु प्रस्तरशिल्पानि शाश्वतानि सन्ति । धातुसौन्दर्यं काष्ठसौन्दर्यं

शिलासौन्दर्यं शिल्पकारस्य जीवनदायित्वं च मिलित्वा यथासंदर्भं निर्दिष्टविविध-भङ्गिमाविष्कारैः सौन्दर्यं प्रजनयन्ति। तस्मादेव एलोराहम्पीकजुराहोशिल्पानि विविधभङ्गिमाविष्कारैः सहृदयहृदयाह्लादकानि भवन्ति। सर्वमपि शिल्पसंपद् समविभक्ताङ्गत्वेन सुन्दरभावस्य प्रद्योतमानत्वेन च चित्ताह्लादकं प्रतिभाति। अजन्ताकुड्यचित्राणि शाश्वतानि नित्यनूतनानि भान्ति।

भ्राजन्ते कुड्यचित्राणि
धरण्यां सुस्थिराणि च।
शिल्पानि सर्वभावांश्च
दर्शयन्तः पदे पदे॥

चित्रं भावान् आविष्करोति चित्रकारेण निर्दिष्टप्रकारम्। शिल्पं तु परिपूर्ण-स्वरूपेण व्यक्तित्वमापाद्य चित्रापेक्षया उत्कटभावपरम्पराः प्रजनयति। चित्र-सौन्दर्येण मानवः मुग्धमनस्कः चित्रं चुम्बति, नो चेत् चित्रेण हृदयं कयाऽपि भावनया स्पृशति। शिल्पं विलोक्य मानवः मुग्धः तत् चुम्बति आलिङ्गति च। कयाऽपि कामनया सकलावयवान् स्पृष्ट्वा विचुम्ब्य तन्मयत्वं प्राप्नोति। चित्रात् शिल्पं सौन्दर्ये अधिकायते। एकस्य वस्तुनः सौन्दर्यं प्रतिक्षणं शाश्वतानन्दं प्रद-दाति। एकदा दृष्टम् अविस्मरणीयं भवति।

अचेतनस्य चैतन्यं
सौन्दर्यं वस्तुनो महत्।
प्रददाति महानन्दं
सुहृदे रसिकाय च॥

चित्रेषु शिल्पेषु च सहृदयाः काव्यं पठिष्यन्ति। काव्येषु सहृदयाः चित्रं शिल्पं च द्रक्ष्यन्ति। एते सर्वे पञ्चललितकलाः अन्योन्याश्रयभावमाप्ताः सर्वत्र मालाकृतिमापाद्य रसिकसहृदयानां समक्षमायान्ति। एकस्य संदर्शनेन सर्वे सपदि अहमहमिकया समक्षं प्रधावन्ति। तस्मात् एवमुच्यते।

काव्येषु चित्रशिल्पानि
दृश्यन्ते लोचनप्रियम्।
चित्रशिल्पेषु काव्यानि
पठ्यन्ते रसिकैः सदा॥

## २२५. समाजजीवनायैव कलासौन्दर्यम्।

जगति सर्वं कलारूपेण संदृश्यमानमपि आदिमानवः कलाकलापान् उपयोक्तुम् अशक्तोऽभवत्। बहवः वृक्षाः चित्रविचित्रपल्लवपुष्पस्तबकसंशोभिताः विकसिताः गन्धं विकिरन्तः नामरूपविरहिताः धरण्यां मिलिताः। प्रपञ्चे सौन्दर्यपूर्णवस्तूनि सर्वाणि न कोऽप्यपश्यत्। दृष्टान्यपि नान्वभुञ्जन्। सृष्ट्यां कलाः कलार्थमेव उद्भूय नाशं प्राप्ताः। आदिमानवः चन्द्रस्य चन्द्रिकां भावनया नानुभुक्तवान् पुष्पाणां गन्धं प्रयत्नपूर्वकं नानुभुक्तवान्। सुन्दरप्रकृतिसौन्दर्यमपि नानुभुक्तवान्। तस्मात् कलाः कलार्थमेवेति केषांचन मतं प्रथमतः अभूत्। कालक्रमेण मानवः सौन्दर्यलोलुपः संजातः। तदा सर्वमपि सौन्दर्यपूर्णवस्तुजातं स्वात्मसुखाय उपयुक्तवान्। जगति संदृश्यमानकलां मानवसमूहैः क्रियमाणकलां विलोक्य समाजजीवनाय उपयुक्तवान्। ततः काश्चन कलाः कलार्थमेवेति परे समाजोपयोगार्थमिति वादविवादान् संजनयामासुः। अन्ततः कला मानवसमाजोपयोगिनीति निश्चिता अभूत्। तदनुसारं सर्वकलासृष्टिं मानवोपयोगितायै चक्रुः जनाः।

सृष्टं जगत् सर्वमिदं
दिनेशेन कलामयम्।
जनानामुपयोगार्थं
शाश्वतानन्ददायकम्॥

मानवः जगतः सौन्दर्यं विलोक्य प्रतिकृतयः निर्ममौ। सृष्टकलाप्रपञ्चं मानवः स्वीयानन्दाय उपयोक्तुं प्रायतत। प्रथमतः कला कलार्थमेवाभूत्। अनन्तरं कला समाजोपयुक्ता बभूव। मानवः कलां स्वीयोपजीविकायै आनन्दाय चोपयुक्तवान्।

कलाः कलार्थमित्यन्ये
समाजाय कदापि न।
समाजजीवनायैव
कथयन्ति कलाः परे॥

## २२६. पञ्चललितकलाः सर्वोपकारकाः न भवन्ति ।

चित्रशिल्पसंगीतनाट्यकवितादयः कलाः सर्वसमाजोपकारकाः न भवन्ति। ताः कलाः केषांचन समाजव्यवहारार्थं साधु असाधु ज्ञानार्थं अनुपयुक्ताः भवन्ति। केषांचन ताः कलाः अनर्थदायकाः भवन्ति। ततः जगति कलाः समाजे केषांचन आनन्दसौन्दर्यप्रदायकाः भवन्ति न तु सर्वेषाम्। केचन कलासौन्दर्यं छात्रान् बोधयितुं प्रशिक्षणसंस्था उद्घाटयन्! तथाकरणं तेषां मूर्खतादर्शनमेव बभूव। कलासौन्दर्यज्ञानं जन्मनः संक्रामति न तु अभ्यासेनेति अस्मादृशानां मतम्।

ततः सर्वाः कलाः समाजे सर्वेषाम् उपकारकाः न भवन्ति।

> **समाजकल्याणसुखाय भान्ति ताः**
> **कलामनोज्ञा बहुभावसुन्दराः।**
> **दयार्द्रभावान् पटुधर्मसंचयं**
> **प्रदाय लोकाय निरन्तरं कलाः॥**

## २२७. वास्तुशिल्पसम्पदनन्तभावसौन्दर्यप्रदीपकम्।

> **भारतीयकलाः सर्वाः**
> **मूलसौन्दर्यज्ञानदाः।**
> **मनुष्यजन्मनां शान्ति-**
> **सौन्दर्यस्य प्रदायकाः॥**
>
> **कलामाध्यमरूपैश्च**
> **देवसंदर्शनं सुखम्।**
> **जायतेति मनीषीभिः**
> **सृष्टाः सर्वकला भुवि॥**

कलासौन्दर्यं कलाहृदयैकवेद्यं भवति नत्वन्यथा नान्येन। भारतराष्ट्रं वास्तुशिल्पानां मूलस्थानमिति कथने विद्यते नातिशयोक्तिः। दुर्दैववशात् भारतराष्ट्रस्योत्तरप्रदेशे दक्षिणप्रदेशे महाराष्ट्रदेशे सर्ववास्तुशिल्पसंशोभित-देवायतनादयः परकीयधाटीभिः प्रभ्रष्टाः विचूर्णिताः शकलायिताः सन्ति।

किन्तु सुदैववशात् दक्षिणदेशे कर्णाटकान्ध्रतमिलप्रदेशेषु प्राचीनवास्तुशिल्प-सौन्दर्यं दिदृक्षूणां अनेकसौन्दर्यप्रवाहान् संजनयति। हळबीडुश्रावण बेळगोळा-मधुरा-तंजावूर-कञ्चिप्रदेशेषु विद्यमानदेवायतनानि अधुनाऽपि वास्तु-शिल्पसुशोभितानि सुन्दराणि दृश्यन्ते। एषु देवालयेषु भारतराष्ट्रे इतिहासानां रामायण-महाभारत-भागवत-जानपद-द्विपद-चतुष्पदादीनि चित्राणि सुशोभितानि दृश्यन्ते। वास्तुपुरुषस्य संप्रीत्यर्थम् आगन्तुकानाम् अभ्यागतानां देवायतन-दिदृक्षूणां संतोषानन्दसौन्दर्यभावनाप्राप्त्यर्थं राष्ट्रीयैकतासिध्यर्थं शृङ्गारपूर्ण-रसपूर्ण-भक्तिभावपूर्णशिल्पानां शिल्पीकरणं संदृश्यते।

**भारतीयकलाः सर्वाः**
**दिव्यसौन्दर्यज्ञानदाः।**
**मनुष्यजन्मनां शान्ति-**
**सौन्दर्यस्य प्रदायकाः॥**

वास्तुपुरुषनिर्दिष्ट वास्तुशास्त्रप्रमाणानुसारं निर्मित बृहन्निर्माणेषु शिल्प-निर्मितिः प्रकृतिप्रतीका भवति। सा निर्मितिः पवित्रभावपरिपुष्टा शास्त्रपद्धत्या सुनिर्मिता भाति। एषानिर्मितिः पवित्रा दिदृक्षूणां पवित्रभावं जनयति। उत्तर-दायित्वभाजकानामपि वास्तुनिर्मितिः महान्तम् आशयम् उदात्तास्तिक्यभावनां परिकल्प्य दिव्यसौन्दर्यानन्दभावं जनयति।

अस्मिन् स्वप्नसङ्गमगीते सर्वत्र चित्रसौन्दर्यं शिल्पसौन्दर्यं च संदृश्येते। कवितायां चित्रशिल्पसंदर्शनं भवति। तत् केचन पुण्यवन्तः ज्ञास्यन्ति। केषांचन दृष्ट्यां इयं कविता न भवति। अपरेषां मनसि इयं कविता अनेकरङ्गरागैः चित्रितेवाभाति। परेषां हृदि इयं कविता साक्षात् सुरसुन्दरीरूपेव साक्षात् शिल्परूपेव संस्फुरति। अस्मिन् कविताशिल्पे सर्वमपि मण्डनादिकं रूपरेखा-दिकं नैकभावाभिनयादिकं च कविना सहृदयाय प्रदत्तम्। यदि कलादृष्टिः न स्यात् कवितासौन्दर्यदर्शनदृष्टिः पठितुः सः कवेः दोषः न भवति। एतादृशगीतं न केनापि लिखितं संस्कृतकविताप्रपञ्चे इति केषांचन मतम्। कविः स्वप्ने दृष्ट-सुन्दरीं मधुरकल्पनया वर्णयामास। कवितामेनाम् अवगन्तुं विशिष्टलयबद्ध-सौन्दर्यदृक्-किरणानां रागत्वं सरसभावुकता चापेक्ष्येते। स्वप्ने दृष्टां वनितां कविः स्वमित्रम् एवं कथयति। स्वप्ने दृष्टा कान्ता का वा न जानाम्यहम्। सा मम जीवन-

दशायाः स्नेहपात्रिका। एषा विरहपिपासाघ्नी दिव्यप्रपा। सा मया सार्धं किंवा किंवा चकार। अन्ततः सा मया अनुभुक्ता। अस्मिन् गेये सर्वमपि चित्रं नोचेत् शिल्पं अत्यन्तसुन्दरभावनया शब्दार्थभावैः रेखितं शिल्पितं च पश्यतु भवान्।

कान्ता का सा का सा का सा
कान्ता का साऽऽऽऽ

जविनानिर्वाणदशा स्नेहसमा
विरहानलतृष्णा शमनसुधा।
अस्थिरजीवननौका दीपशिखा
विरहपिपासाघ्नी दिव्यप्रपा॥ कान्ता

कर्णे कथयति रञ्जितप्रणयकथाम्
निन्दति देहं संगमहीनं सा साबाधम्।
यौवनं जीवनकोरकितां मारप्रथाम्
हेवाविभ्रमलसितां गाथां सागाथाम्॥ कान्ता

व्रीडाललितमनोहरभाषणभूषा
व्यथयति मामीक्षणपाशाऽनिमेषा।
संस्कृतवाणीपदचयभूषणभाषा
मोहितयुवजनजीवनपीयूषा॥ कान्ता

नाहं जाने सा किं रम्भा उत स्मरवनिता
सदसत्संशयगोचरकम्रसुमध्या।
हेलालीलादरदरहासाञ्चितहेवाका
कोऽहं काऽसौ कथमिह विश्वसनीया॥ कान्ता

सुमानिभपदचयकविताशय्याऽऽलोके
कविकुलगुरुप्रियतमस्वेच्छाचारणमेघालोके।
सुन्दरसुस्मितराजिततारापतिचन्द्रालोके
मधुरं सुखमयक्षणसुखस्वप्नालोके॥ कान्ता

गायति नृत्यति चपला मेघान्तरिता
विलसति हरितमनोहरविटपान्तरिता ।
कलयति रागारुणसन्ध्यान्तरिता
पीडयतीहावृतहृदयान्तरिता ॥ कान्ता

निर्झरवीचीमण्डनसज्जितगात्री
केकीनर्तनरूपितनटनागात्री ।
नीरदवर्णाम्बरसज्जितवैद्युतगात्री
ऐरावतक्षीरोदधिहिमनगगात्री ॥ कान्ता

किलकिलाकुलमधुमयशुकवाणी
रसभरवर्णावलिमण्डितगीर्वाणी ।
पञ्चमनादाञ्चितमधुपिकवाणी
स्पृशति च देहं स्वप्ने किसलयपाणी ॥ कान्ता

सुस्मितवदनाञ्चलभासितप्रावरणा
गन्धिलनूतनकुसुमितमल्लीवर्णा ।
प्रथमसमागमगोपितपिप्पलपर्णा
मलयजचर्चितश्यामलचूचुकपूर्णा ॥ कान्ता

घर्मकणाविलगन्धायिततनुचम्पककान्ता
स्मरसंगरविविधकलाबन्धनमृदिता ।
कण्ठान्तरनिनदन्मणितप्रकटितकुट्टमिता
गाढालिङ्गनविवशा निर्दयमेषा सम्यक् रमिता ॥ कान्ता

अत्र प्रतिपद्ये पादे शब्दे च रङ्गानां सौन्दर्यं वाचिकसौन्दर्यं चित्रसौन्दर्यं शिल्पसौन्दर्यं समिष्ट्यां भावनासौन्दर्यं च मूर्तीभूतमिव संदृश्यन्ते । रन्ध्रान्वेषण-तत्पराणाम् अरसिकानां विदुषां सौन्दर्यं दृष्टिपथं न याति । कविता भावनया रागं दास्यति क्वचित् सविलासं नर्तिष्यति शिल्पं दर्शयिष्यति चित्रं चित्रीकरिष्यति तस्मात् पञ्चललितकलासु कविता उत्कटहावभावविलासहासलालित्यैः सर्वाभ्यः कलाभ्यः अधिकतमायते । कवितायां सर्वकलाः अन्तर्लीनाः लसन्ति । सर्वकलासु

कविता न भवति । तस्मात् कविताभिन्नं सर्वं मूकवत् पश्यति कानपि नादान् संजनयिष्यति न तु भावपूर्णं वाचिकम् । ततः सर्वत्र विशेषतः कवितायां चित्र-शिल्पयोः आविष्कारो भवति ।

कलासु कविता भाति
परमोच्चतमा ध्रुवम् ।
यतः सर्वाः कलाः तस्यां
भान्ति सौन्दर्यपूरिताः ॥

अपि च

यत्र चित्राणि शिल्पानि
दृश्यन्ते नैव सा कला ।
भवितुं नार्हतीत्येवं
कथयामि कलात्मना ॥

## आनन्दो ब्रह्म

गीतमिदं मद्रचितजानपदनृत्यगीतमञ्जर्याः समुद्धृतमस्ति । अस्मिन् गीते प्रतिपादे चित्रशिल्पयोः आकृतयः सहृदयपाठकानां प्रत्यक्षं भवन्त्येव यदि न भवन्ति तेषां कलानभिज्ञानमेव भवति । अस्मिन् गीते सर्वत्रानन्द एव नरीनर्ति तेनानन्देन परमानन्दो भवति । सः आनन्दः कवितारूपेण चित्ररूपेण शिल्परूपेण संगीतरूपेण नाट्यरूपेण जायते । अत्रास्मिन् गीते पञ्चललितकलाः मूर्तीभूताः पठितॄणां निश्चलानन्दसौन्दर्यमेव प्रयच्छन्ति ।

श्रावणनीरदपटपटजललवनिष्यन्दे
गन्धिलमारुतवीचीमालाऽघ्राणे ।
कोष्णेमधुराधरदंशनसुखशीत्कारे
सुरतालिङ्गनसुखमयभुजयुगमध्ये ॥ आनन्दो

वारिदगर्जनशम्पासुन्दरप्रावृट्काले
भावजरञ्जितविरहितरसमयचित्ते ।
अन्योन्यालोकनमाद्यत्-भावावेशे
मदनानलदीपनकल्पितमधुसम्पर्के ॥ आनन्दो

सन्ध्यासमये सैकतसागरतीरे
जलमुजवा:कणशीकरतारकिते ।
प्रियतममञ्जुलमोहनवदनसरोजे
परिमलश्वासानिलमधुपानायित-आमोदे ॥ आनन्दो

हसितप्रदीपितचित्तजप्रेरितपाणिग्रहणे
मन्दानिलविदलितवक्रितकालिमकुन्तलवर्गे ।
सख्युः करतलचित्रणाद्विगुणीकृतकामावेशे
प्रेक्षणमनसिजलज्जावल्लीबन्धनसंसर्गे ॥ आनन्दो

सुन्दरसृष्टिपरीवृतमञ्जुलक्षितिजावलये
अधिरोहितपर्वतशिखरश्रेणीदर्शनसौख्ये ।
निर्जनदेशे स्वेच्छाजल्पितपदरसविश्वे
सुतरां निर्भयवेलापरिहितदर्पकसाम्राज्ये ॥ आनन्दो

गङ्गाजललिपिडोलायितनौकायाने
करपुटगङ्गाऽमृतविकिरणमीलितनयने ।
विभ्रमकङ्कणकरधूनन–अभिनयशिल्पे
स्मेराननप्रकटित-अगणितमधुमयरतिकाव्ये ॥ आनन्दो

कलममनोहरवीचीसुन्दरनयनोत्सवकेदारे
चिक्कणरूपितश्यामलशाद्वलमृदुमयभूतल्पे ।
जीवनसख्या कर्णेजल्पितरसभरपदपीयूषे
कण्ठाश्लेषे चुम्बनतनुपरवश-अविदितरससमये ॥ आनन्दो

इति श्री गीर्वाणान्ध्रभाषाप्रवीणेन महाकविना गीर्वाणगेयकविमण्डल-चक्रवर्तिना पण्डित ओगेटि परीक्षित् शर्मणा विरचितसौन्दर्यमीमांसायां चित्रशिल्प-सौन्दर्यप्रकरणं समाप्तम् ॥

## १३. संगीतसौन्दर्यप्रकरणम् ।

सम्यक् गीयते इति संगीतम् । गीतवाद्यनर्तनत्रयाणां समूहः संगीतमुच्यते । सृष्टेः सर्वस्यापि एका विशिष्टक्रमपद्धतिः वर्तते । क्रमपद्धत्या निर्माणं वृद्धिः

सौन्दर्यं च जायन्ते। यदि विशिष्टक्रमपद्धतिः न भवेत् निर्माणम् असुन्दरम् अनाह्लादकम् अशास्त्रीयं च भवति। ततः सर्वनिर्माणविषये सम्यक् योजकता सुन्दरभावनाः कल्पनाश्च परिगणनीयाः भवन्ति। संगीतम् एकविशिष्टक्रमपद्धत्या क्रमशिक्षणया सम्पादितमधुरस्वराणां जन्मनः संक्रामितकण्ठगतमधुरस्वराणां मधुरभावानां कल्पनानाम् आनन्दतरङ्गाणां विविधरागरञ्जितरसानां समवायेन भवति। संगीतेन केवलं चराचरं नर्तिष्यति, पुलकाञ्चितं भविष्यति, संतोषेण निरामयं वर्धिष्यति।

संगीतं सकलानन्दं
विदधाति विनाऽऽमयम्।
प्रकृत्या सृष्टमेतद्धि
दिव्यस्वास्थ्यरसायनम्॥

अस्मदीयपूर्वजाः वैदिकयुगे उदात्तानुदात्तस्वरितप्रचयादीनां समवायेन एकविशिष्टदीर्घनादोच्चारणेन ह्रस्वदीर्घप्लुतैश्च सामवेदगायनं प्रवर्धयामासुः। तमेव सामवेदम् आधारभूतं गृहीत्वा सप्तस्वरान् अधोवक्ष्यमाणप्रमाणेन अगृह्णन्। मयूरकेकायाः स गोभाषणात् रि अजस्वरात् ग क्रौञ्चक्वणनात् म पिककूजनात् प वाजिनः हेषायाः ध गजबृंहणात् नि स्वरान् इत्येतान् प्राप्य तेषां समवायेन क्रमपद्धत्या व्यत्ययरूपेण च तेषाम् उपस्वरैः षोडशश्रुतीः परिकल्प्य संगीतं महन्तं स्वरार्णवं चक्रुः।

सामवेदात् समुद्भूतं
संगीतं वेदसन्निभम्।
सामसंगीतगानेन
मुक्तिमाप्नोति मानवः॥

## २२८ एकमेव द्विधा गीतम्।

अर्धनारीश्वरत्वेन
संगीतं लोकमोहकम्।
द्विधाभावविभक्तं तत्
एकरूपेण दृश्यते॥

प्रकृत्यां स्वरैः संगीतमेकमेव भवति। तत् वातावरणमहिम्ना प्रादेशिकोच्चारणवैविध्यात् कण्ठगतस्वरस्य विभिन्नत्वात् एकमेव द्विधाऽभवत्। तदेकशब्देन कथ्यते भारतीयसंगीतमिति। तत् गायनपद्धत्या द्विधा विभक्तम्। एकम् औत्तराहि संगीतम् अन्यं दाक्षिणात्यसंगीतमिति। औत्तराहिसंगीतं हैन्दवेतर-संगीतेन किञ्चित् राजदर्बारवातावरणानुकूलेन कामविकारं प्राप्य विविध-भावनाभिः मिलितं भूत्वा नैकविधच्छटाभिः निस्वनस्वनतरङ्गैः महासागररूपं भेजे। दाक्षिणात्यसंगीतं पवित्रं सरसम् अविकारं क्वणन्ती भक्तिरसेन देवालयेषु परम्परागतपद्धत्या सुन्दरमनोहरनामभिः सरससाहित्येन प्रचलन्ती विविधगमकैः स्वरार्णवरूपं प्राप। संगीतोत्पत्तिः बहुभिः बहुधा उल्लिख्यते। किन्तु संगीतस्य सुन्दरसाम्प्रदायः अस्ति।

उपासितं नटेशेन
भृङ्गिवायुजतुम्बुरैः।
मतङ्गनारदाद्यैश्च
संगीतं पूर्वजैः प्रियम्॥

अधुना प्रवर्तमान–औत्तराहिसंगीतस्य एकसाम्प्रदायप्रदाता पितामहः तानसेनमहोदयः। दाक्षिणात्यसंगीतस्य पितामहः पुरंदरदासमहोदयः। ततः दाक्षिणात्यसंगीतस्य महासुन्दरशिल्पकारः विराट्स्वरूपसंदाता शास्त्रीय-साम्प्रदायप्रदाता त्यागराजस्वामी। अयं महानुभावः द्विसप्ततिमेळकर्तरागान् विधाय एकविशिष्टक्रमपद्धत्या दाक्षिणात्यसंगीतं ससृजे। तस्मिन्नेव काले तमनुसृत्य श्यामाशास्त्री मुत्तुस्वामिदीक्षितश्च (गुरुगुहनामाङ्कितः) दाक्षिणात्य-संगीते श्रीवृद्धिमकुरुताम्। अनेन मूर्तित्रयेण दाक्षिणात्यसंगीतं परम्परागतसंस्कारेण संगीतसाहित्यसमताभावेन विस्तृतिरूपं भेजे। अस्य दाक्षिणात्यसंगीतस्य नामान्तरं विद्यते कर्णाटकसंगीतमिति। अस्य कर्णाटसंगीतस्य कर्णाटकानां संगीतमिति अर्थो न हि किन्तु दाक्षिणात्यानामित्येव अर्थः। तर्हि अस्य संगीतस्य कर्णाटकनाम कथं संभूतम्। अस्मदीयाभिप्रायम् अधोक्तप्रमाणेन प्रकटयामः।

कर्णेऽटतीति माधुर्यं
नादानां क्वणतां चिरम्।
तस्मात् कर्णाटसंगीतं
कथितं न तु दैशिकम्॥

दाक्षिणात्यसंगीतं शतेऽशीतिपर्यन्तं तेलुगुभाषायामेव लिखितं सर्वैरपि अतेलुगुदाक्षिणात्यैः। संगीतसाहित्ये मधुनिस्वनानां नादानां शब्दानां वाक्यानां कलस्वनमाधुर्यं एकमात्रश्रवणेन्द्रियप्रपातेन जीवितान्तं कर्णे अटतीति ध्वनिरूपेण भ्रमतीति सत्येन तस्य दाक्षिणात्यसंगीतस्य कर्णाटसंगीतमिति नाम ददुः। कर्णाटशब्दः दैशिकपरः न हि। तेलुगुकाव्यसाहित्यवृद्धिकारकः विजय-नगरसाम्राज्यसम्राट् सकलयुद्धजेता कलातज्ञः संगीतज्ञः महाकविः श्रीकृष्ण-देवरायः तुलुमातृभाषिकः संस्कृतभाषायां प्रकाण्डविद्वान् नाटकप्रणेता च। किन्तु सः देशभाषासु तेलुगुभाषा सुन्दरा मधुरा अत्युत्तमा इति घण्टापथेनोक्त्वा ततःप्रभृति अन्यभाषासु काव्यानि अविलिख्य केवलं तेलुगुभाषायाम् आमुक्तमाल्यदा इति महाप्रबन्धं लिलेख। अनेनोदाहरणेन द्योतते सुस्पष्टं ज्ञायते तेलुगुभाषामाधुर्यादिकम्। तमिलकविः सुब्रह्मण्यभारती तेलुगुगीतानां माधुर्यमुद्दिश्य स्वीयकवितायां सविस्तरं लिलेख। एषा भाषा स्वरमाधुर्येण "इटालियन् ऑफ् दि ईस्ट" इति पाश्चात्यैः प्रस्तुता। श्री ताल्लपाक-अन्नमाचार्याः श्यामाशास्त्री क्षेत्रज्ञः इत्यादयः तेषां सर्वसाहित्यसंगीतसृष्टिम् आन्ध्रभाषायामेव चक्रुः।

**कर्णाटगुणभावेन**<br>
**संगीतं वर्धितं प्रियम्।**<br>
**त्यागराजादिभक्ताग्र्यैः**<br>
**नैकवाग्गेयकारकैः॥**

अधुनापि दाक्षिणात्यसंगीतसम्प्रदायः अस्खलितः असंकरः अखण्डितः प्रवहति। औत्तराहिसंगीते घराना इति नामरूपैः हैन्दवेतरसंगीतमिश्रणेन सहस्रधारात्वं समागतम्। तथापि संगीतम् एकमेव मानवजाति-एकात्मतां साधकसाधनमेव भवति। संगीतं द्विधा विभक्तमपि एकमेव।

**बालाश्च फणिनो वृक्षाः**<br>
**गावः सौन्दर्यमेव हि।**<br>
**जानन्ति नादमाधुर्यं**<br>
**रागाणां न तु पामराः॥**

जगति केचन संगीतसौन्दर्यज्ञानानभिज्ञश्रवणेन्द्रियविराजमानाः सन्ति। यथार्थतः ते अरसिकाः सकलप्राण्यपेक्ष्या ते अत्यन्ताधस्थाः। चराचरस्यापि सुन्दरं भाति संगीतम्। संगीतं चराचरस्य परमौषधं भवति। संगीतेन शिलाः द्रवन्ति। संगीतेन रोगनिर्मूलनं भवति। संगीतेन मनसः स्वास्थ्यं भवति अमृतप्रक्षालितमिव। संगीतश्रवणेन मेघाः हृष्टाः वर्षन्ति। हंसाः मयूराश्च नर्तन्ते। संगीतश्रवणेन सस्यफलादिकं अधिकं भवति।

संगीतसौन्दर्यमहो धरण्यां
केनापि वक्तुं न हि शक्यतेऽत्र।
मनोहरं स्वानुभवैकवेद्यं
प्रतिक्षणं कर्णरसायनं च॥

अपिच—

संगीतं सर्ववर्णाक्तं
रञ्जितं स्वरमण्डलैः।
चैतन्यं विदधात्यत्र
सर्वशक्तिसमञ्चितम्॥

रुदन्तः शिशवः मातुश्रीगानेन सिञ्चिताः तृप्ताः दोलायां स्वपन्ति गानमाधुर्य-श्रवणबलात्। फणिनः नादस्वरधमनेन नादबद्धक्रमपद्धत्या फणां कृत्वा नादानुसारं फणान्दोलनं कुर्वन्ति नादमाधुर्यं चानुभवन्ति सान्तत्यम्। वृक्षाः संगीतश्रवणेन परं पुष्पितवन्तः फलन्तः सुखजीवनं कुर्वन्तीति आनन्देन तृप्ताः भवन्तीति शास्त्रज्ञानां मतम्। पशवः संगीतश्रवणेन विशिष्टवेणुवादननिर्गत-स्वरमाधुर्यश्रवणेन स्वीयसंचारात् शष्पभक्षणात् विरम्य विश्रान्तिसुखेन रोमन्थमभ्यसन्तः संगीतश्रवणानन्दम् अनुभवन्तीति प्रत्यक्षोऽयं विषयः। कथमेतादृशी अनुभूतिः केषांचन मानवानां विषये न भवतीति विचार्यमाणे तस्योत्तरं न भवति। तस्मात् एवमुच्यते सर्वाणि सर्वेषां न भवन्तीति। सर्वमानवसौभ्रातृत्वं संगीतमेकमेव करिष्यति। एतत् न केवलं मानवसौभ्रातृत्वं जनयति किन्तु प्राणिसहचरभावं प्रकल्पयिष्यति। संगीतस्य साहित्यमेलनेन वाचिकत्वं संभविष्यति। नोचेत् संगीतं मूकत्वेन नादानां स्वराणां क्रमपद्धति-

प्रकारेण लयतालज्ञानं दास्यति। तादृशसंगीतस्वरमाधुर्यं अर्धानन्दमेव जनयिष्यति। तत् संगीतं साहित्ययुत्या मोक्षपदं नेष्यति। तस्मात् साहित्यबद्धं संगीतमेव दिव्यसंगीतम्।

## २२९. सुन्दरसंगीतं श्रावककर्णरसायनम्।

यः नीरदनिस्वनमधुरगभीरकण्ठस्वरेण भावरागलयादिभिः तन्मयत्वमापाद्य मन्द्रमध्यमतारस्थायिभिः यथारसं प्रगाय चेतनाचेतनं स्वीयगायनानन्दामृतवर्षेण पुलकितं पल्लवितं च करिष्यति अपि च स्व-भावनया प्रतिभया चादृष्टमपि दृष्टपूर्वमिव मत्वा अत्यन्तसुन्दरकल्पनां विधाय व्यभिचारिभावैः सुन्दरं शिल्पिष्यति स एव गाता। गायकेषु चत्वारप्रकारगायकाः सन्ति।

१) मधुरगभीरकण्ठस्वरसाहित्यभावकल्पनायुतसुस्वरताललयानुसारी गायकः उत्तमोत्तमः।

२) मधुरसुस्वरभावताललयानुसारी गायकः उत्तमः।

३) स्वररागताललयानुसारी गायकः मध्यमः।

४) रागानुसारं कटुस्वरैः प्रेक्षकवधाकारः गायकः अधमः।

गायकानां संगीतसाहित्ययोः परिश्रमः आवश्यकः। परिश्रमाभावेन गायने संस्कारो न भवति। केचन परिश्रमहीनाः पञ्चषाणि गीतानि व्यायाम-रूपेण साधयित्वा एकदा व्यासपीठे उपविश्य गायन्ति। तदसाम्प्रतमेव।

संगीतं वरसाहित्यं
भारत्याः कुचमण्डलम्।
द्वयोरस्तित्वरूपेण
भारती भाति सुन्दरा॥

एकेन हीनम् असुन्दरं भवति। यदि द्वयोरस्तित्वं सुन्दरं जनैः प्रथमप्रेक्षणीयं भवति। एतद्द्वयेन भारती सर्वसुन्दरा लोकं स्वीयपक्षं समाकर्षति।

परिश्रमेण संप्राप्तं
प्रतिभावल्गुराजितम्।
संगीतं शाश्वतं भाति
जनकर्णरसायनम्॥

सुन्दराङ्गी वा भवतु सुन्दराङ्गो वा भवतु एतौ द्वौ मधुरगभीरकण्ठस्वरेण भावरागताललयादिभिः तन्मयत्वमापाद्य गायनं विना चलनं केवलहावभावादिभिः कुर्याताम् अवश्यं श्रावकाः प्रेक्षकाः आनन्दसौन्दर्यमनुभविष्यन्त्येव। केचन काश्चन अमधुरकण्ठयुताः गायनसमये अतिकष्टेन व्यायामं कुर्वन्तः कामपि बाधामनुभवन्तः हस्तचालनैः असह्यमौखिकभावैः वक्रवदनविकारजात-संकोचव्याकोचमुखेन गर्दभस्वरोपमितस्वरावरोहणावरोहणैः किमपि बृहत्तमं प्रस्तरं नोचेत् कामपि शिलां वा गृहीत्वा प्रेक्षकवर्गे प्रक्षेप्तुं उद्यमाना इव प्रेक्षकान् श्रावकान् असहनयुतान् भयभीतचित्तान् कुर्वन्ति। एतादृशलक्षणलक्षितं गायनं कस्य आनन्दहेतुः भवति ? तस्मात् गायकलक्षणानभिज्ञाः गायकाः भवन्ति। साहित्यसंस्कारविहीनाः गायकाः भवन्ति। तथा यदि गायनं संगीतं मरणदशां प्राप्स्यत्येव। उदात्तभावसज्जिताः गायकाः विरलाः भवन्ति।

**विकारमुखभावैश्च**
**नितरां करधूननैः।**
**प्रेक्षकान् निहतान् कृत्वा**
**विगायन्ति चिरं परे॥**

गीतं विना चाङ्गचालनं यथेच्छं करचालनादिकं केवलभावेन गातव्यं भवति।

साहित्यसंगीतज्ञाः केचन यथासंदर्भं प्रकृतिमनुसृत्य रागादिकं कुर्वन्ति स्वीयप्रतिभया। तद्यथा यशोधरामहाकाव्यात् समुद्धृतं पठन्तु। संदर्भानुसारं रागगायनमेव सौन्दर्यम्।

**सारङ्गयूथान् प्रविलोक्य रामाः**
**सारङ्गझंकारसुवल्गनैश्च।**
**सानन्दसंफुल्लसदन्तरङ्गाः**
**सारङ्गरागं प्रजगुः तदानीम्॥**

**पलाशपुष्पं शुकचञ्चुरागं**
**विलोक्य सा भीमपलासरागम्।**
**जगौ प्रिया काचन चारुकेशी**
**प्रभूतकामा वरचारुकेशीम्॥**

ललाप सा कोमलकामवर्धिनीम्
प्रभूतसंतोषपरीतमानसा ।
विलोक्य सर्वां प्रकृतिं विलासिनी
समस्तकान्तागणकामवर्धिनीम् ॥
वरालिपङ्क्तिः व्रजते सुमालिं
मरन्दपानाय विगुञ्जमाना ।
दृष्ट्वा भिया तच्चलनादिकं सा
जगौ वरालिं मधुपानलोला ॥

## २३०. वाद्यसंगीतमपि आनन्दसुन्दरम् ।

१) ततम् २) आनद्धम् ३) सुषिरम् ४) घनम् इति वाद्य विशेषभेदाः चतुर्विधरूपाः सन्ति ।

(१) ततम् इत्यस्य तन्तुवाद्यविशेषाः इत्यर्थः । एषु वीणा सितारा (सप्ततारा) संतूरवाद्यविशेषः, दिल्रुबा सारंगी वायलेन इत्यादयः ।

(२) आनद्धम् इत्यस्य मृदङ्गं पटहः ढक्का भेरी दुन्दुभिः आनकः डमरुः मड्डु डिण्डिम झर्झरः मर्दलः इत्यादयः ।

(३) सुषिरम् इत्यस्य वेणुः नादस्वरः षहनाई इत्यादयः ।

(४) घनम् इत्यस्य कांस्यनिर्मिततालादिकम् इत्यर्थः ।

अधुनातन अन्यवाद्यानि यानि सन्ति तानि सर्वाणि एषु चतुर्विधवाद्य-विशेषेषु अन्तर्लीनानि भवन्ति यथासंदर्भं यथास्वरं यथानिर्माणम् ।

तन्तुवाद्येषु वीणायाः स्वरो मधुरो भवति । वीणा अत्यन्तप्राचीनवाद्य-भावेन शोभिनी अस्ति । देवतानां वीणास्वरः परमरोचकः अस्ति । तदर्थमेव देवताः वीणापाणयः सन्ति । सरस्वत्याः वीणायाः नाम कच्छपी । नारदस्य वीणायाः नाम महती । तुम्बुरस्य वीणायाः नाम कलावती । उदयनस्य वीणायाः नाम घोषवती । एभिः नामभिः केवलं ज्ञायते एतेषां नादविशेषः विभिन्नः वर्ततेति ।

नारदस्य महतीवीणा विभिन्नश्रुतिमण्डलैः स्वरैः महान्तं नादं करोतीति महती इति प्रसिद्धा। कच्छपीवीणायाः स्वरः मधुरः। कोमलस्वरनादैः सम्यक् सुन्दरं नदतीति तस्याः नाम कच्छपीति जातम्। अपि च तस्याः आकृतिविशेषः कच्छप इवास्तीति सा कच्छपी जाता। कलावती कलासमन्विता विविधनादैः सुन्दराः कलाः तनोतीति कलावती जाता। उदयनस्य वीणा घोषं करोतीव क्वणतीति उदयनः स्ववीणायाः नाम घोषवतीति चकार। एतासां सर्वासां वीणानां नादसौन्दर्यं मधुरं श्रवणकुहरेषु शाश्वतं भवतीति रसिकानां मतमिति सौन्दर्य-मीमांसकानाम् अभिप्रायः।

आनद्धवाद्यविशेषाः क्रमपद्धत्या आहताः सुन्दरनादं प्रजनयन्ति।

सुषिरवाद्यविशेषेषु वेणुः महत्स्थानं भजते। एतस्य वायुपूरितनादस्य स्वरविशेषेण गावः संगीतसुखमनुभवन्त्यः चरन्तीति भागवतपुराणसाक्ष्यं वर्तते।

घनादिकं कांस्यकृततालैः वाद्यैः क्रमपद्धत्या नादितं लयमिश्रितश्रवण-सुखसौन्दर्यं प्रददाति। एते सर्ववाद्यविशेषाः साहित्यविहीनाः अर्धानन्दमेव प्रजन-यन्ति। एते वाद्यविशेषाः गायने सहायकाः गायनस्य सौन्दर्यं प्रकल्पयन्ति।

**वाद्यानां नादसौन्दर्यं**
**विविधैः मञ्जुलैः स्वरैः।**
**सर्वं जगन्नादपूर्णं**
**ध्वनितं कुरुते परम्॥**

अमूषां वाद्यानां वादनेषु लयबद्धगतिः हृदयस्पन्दनं विधाय नादब्रह्म-सौन्दर्यं प्रति प्रेक्षकान् नयति तदैवानन्दो ब्रह्मेति स्मरणमायाति।

वसन्तविहारे यशोधरासख्यः विभिन्नवाद्यैः संगीतपर्वदिवसं चक्रुः। तद्यथा पश्यन्तु।

**पपार वेणुं वदनोद्गतानिलैः**
**स्वरैश्च तस्मिन् बहुमूर्च्छनादिकम्।**
**निशम्य तत् रागमयं सुशब्दितं**
**बभौ प्रफुल्लं सकलं जगत् तदा॥**

विभावहेवाकवती विपञ्चिकां
अनादयत् कङ्कणतालवादिनी ।
ततान तानं प्रणितैः च निक्कणैः
विडम्बयन् बम्भरमञ्जुगुञ्जनम् ॥

मद्रचितयशोधरामहाकाव्यात् एतत् श्लोकद्वयं समुद्धृतम्। एतेषां वाद्यानां वादनसमये प्रेक्षकानां श्रावकानां श्रवणेन्द्रियकुहरेषु रङ्गभावनाभिः मिश्रितः वाद्यानां रङ्गनादविशेषः जनयति परमानन्दरङ्गसौन्दर्यं समक्षम् ।

## २३१. सप्तरङ्गस्वराणां मिश्रणेन समुद्भूतं रागसौन्दर्यम् ।

परिदृश्यमानं सर्वं जगत् रङ्गनिर्भरं भ्राजते। रङ्गनिर्भरजगति मानव-निर्मितमपि रङ्गपरीतं भासते । अंशुमाली जगत्सर्वं रङ्गकिरणतन्तुभिः ओतप्रोतं वयति । एकविशिष्टरङ्गमिश्रणेन विविधरङ्गाः जायन्ते । स्वराः सप्त रङ्गकिरणाः सप्त । एते सप्तरङ्गकिरणाः स्वंपरितः सूर्यभ्रमणेन सहस्रकिरणत्वं प्राप्य जगति चित्रविचित्ररङ्गान् विकिरन्ति । ततः जगत् सर्वं रङ्गभरितम्। सप्तस्वराः सप्तरङ्गप्रतीकाः । अक्षराणां नामान्तरं विद्यते वर्णाः इति । वर्णशब्देन ज्ञायते एते रङ्गाश्रिताः इति । तस्मात् कर्णाटसंगीतप्रारम्भे प्रथमं सप्तस्वरोच्चारणं अनंतरं स्वरद्वयोच्चारणं ततः स्वरत्रयोच्चारणं एवं सप्तस्वरपर्यंतं गत्वा अनंतरं क्रमपध्दत्या मिश्रणेन व्यत्ययेन स्वरस्थानेषु अकारोच्चारणं कारयन्ति । एवं स्वराणां व्यत्ययग-त्यनंतरं कर्णाटसंगीते अलंकारान् छात्रान् शिक्षयन्ति । एवं स्वराणां व्यत्ययरूपेण संस्थिताः अलंकाराः रङ्गेन समलंकृताः भवन्ति । प्रथमतः अलंकारान् शिक्षयन्ति अनंतरं वर्णान् शिक्षयन्ति। एते व्यत्ययाक्षरालंकारैः रञ्जिताः विविधवर्णैः संरा-जन्ते। तेषां वर्णनानुसारं साहित्यं दैवप्रार्थनापूर्वकं विरचितान् नोचेत् श्रृङ्गाररस-पूर्वकान् वर्णान् गुरवः शिष्यान् बोधयन्ति वर्णेभ्यः । प्रागेव गीतानि प्रारभन्ते तेषु गीतेषु रङ्गाः विभिन्नाः प्रतिस्वरेषु सुस्पष्टं संदृश्यन्ते । वर्णाः वर्णेषु स्पष्टं न दृश्यन्ते किन्तु वर्णरङ्गछायाः वैविध्यरूपेण मिलिताः इव संदृश्यन्ते । वर्णा-नामनन्तरं कृतयः पाठयन्ते । एषु कृतिषु स्वरङ्गाः एकविशिष्टरागरञ्जितमूर्तय इव आरोहणावरोहणेषु रङ्गेषु नर्तन्ते । एवं ऊहकरणे रसिकः रागश्रवणेन नादानां रङ्गप्रभावेन रागरञ्जितः स्वयं परमानन्दसौन्दर्यं द्रक्ष्यति अनुभविष्यति ।

केषांचन ऊहो न भवति किन्तु तादृशप्रेक्षकानां शरीरेषु दृक्षु विविधरङ्गाः प्रसरन्ति। यदि तेषां मानसिकभावनारङ्गप्रमाणेन रागानां रङ्गाः मिलिताः भवेयुः तत्र रागरञ्जितत्वं भूत्वा प्रेक्षकानां अनूह्यं आनन्दसौन्दर्यं तत् दर्शयिष्यति। तस्मात् चतुरो गायकः स्वीयमधुरकण्ठगतमधुररङ्गस्वरैः प्रतिभया स्वसंचारं विधाय आरोहणावरोहण विभ्रमेषु रागं सौन्दर्यपूर्णरागिणीं परिकल्प्य स्वीयसमक्षं प्रेक्षकाणां समक्षं नाटयतीव दर्शयिष्यति। संगीतसौन्दर्यम् अनूह्यं अतिमधुरम् अमृतोपमम्। संगीतसौन्दर्यं प्रति कथनं विधातुः अपि अशक्यं भवति। अस्मादृशानां विषये अतःपरं किं वक्तव्यम्।

सप्तस्वरा रङ्गपरीतरूपाः
समस्तसंगीतनिदानभूताः।
कुर्वन्ति रागान् बहुरङ्गलिप्तान्
समस्तभावान् सुमनोज्ञरूपान्॥

अल्पाक्षरैः सप्तस्वरवर्णैः षोडश-उपश्रुतिभिः संगीतं सर्वं विश्वं रञ्जयति मोहयति च। एतादृशं शास्त्रं जगति नान्यत् विद्यते। संगीतस्य सीमा नास्ति। शास्त्रमिदं निस्सीमितं अस्य शास्त्रस्य अवरोधः नास्ति।

## २३२. रसादेव रागोत्पत्तिः।

रञ्जयतीति रागः। रागः मनः रञ्जयति। ततः शरीरं सर्वेन्द्रियाणि च रञ्जितानि भवन्ति। श्रृङ्गाररसः यथा भावनादृष्टिं समाश्रयति समाकर्षति तदाऽनुपदमेव चैतन्ययुक्तः शरीरी किमपि भणन् कामपि भावनां व्यक्तीकुर्वन् कानिचन पदानि भणति। यदि सः रसः उत्कटतरो भवति तर्हि शरीरी स्वीयभणनं एकस्याम् अनिर्वचनीयविशिष्टशैल्यां ललितललितशब्दैः भावपूर्णं विधाय सौकुमार्येण गास्यति। तदा तस्मिन् गुनगुनगायने एका विशिष्टतालगतिः भवति। तदेव पौनःपुन्येन विशिष्टपद्धत्या भणनेन गायनं भवति। तदा तस्य गायनस्य नाम रागो भवति। तस्मिन् गायने मनोरञ्जककारणरागो भवति। तस्मात् विविधावस्थासु रसेषु च विभिन्नरागाणां नामानि भवन्ति। कश्चन मृतो भवति तदापि बन्धूनां दुःखेन शरीरं तप्तं भूत्वा तेषां मुखेभ्यः रोदनम् आक्रन्दनं च भवतः। तस्मिन् रोदने आक्रन्दने यदि तालबद्धता न भवति तत् दुःखं भवति। तत्र

क्रमपद्धतिः भवति सः रागः करुणरसप्रधानभूतो भवति । एवमेव सर्वरसावस्थासु अनेकरागाः नैककण्ठगतस्वरेभ्यः संजाताः ते रागनाम प्राप्नुवन्ति । सर्वे रसाः सुन्दरमूर्तयः विविधरङ्गेषु । तस्मात् तेभ्यः सुन्दरमूर्तिभ्यः सुन्दररागाः समुद्भूताः जनमानसानि प्रविश्य शरीरधारिषु रञ्जकत्वं वितरन्ति तथा समुत्पन्नेषु रागेषु रागाः इति पुरुषरागाः रागिण्य इति स्त्रीवाचकरागाः समुत्पन्नाः सन्ति । ये रागाः कोमलस्वरपदावलिसमञ्चिताः ते रागिण्यः संजाताः । ये कोमलस्वरपदावलिवर्जिताः ते रागाः पुरुषरागाः संजाताः । ततः रागरागिण्यः ससंदर्भरसानुगुण्यं समुपयोक्तव्याः इति अस्मादृशानां निष्कर्षः । अयमपि परम्पराऽऽगतसाम्प्रदाय इति कश्चित् वदति ।

**रसोत्कटसमुद्भूतम्**
**गायनं रागरञ्जितम् ।**
**सुन्दरक्रमपद्धत्या**
**कथ्यते रागनामकम् ॥**

**शब्दाः स्वयं समुत्पन्नाः**
**हृदयावेदनानुगाः ।**
**रासिक्यहृदये स्नाताः**
**रागरूपेषु भान्ति ते ॥**

**रागेषु रागरागिण्यः**
**स्वरमण्डलभूषिताः ।**
**ससंदर्भे विभान्त्येव**
**मञ्जुनादोपबृंहिताः ॥**

तस्मात् रसात् समुत्पन्नाः रागाः रसमेव वर्षिष्यन्ति नत्वन्यत् ।

## २३३. रागाः सार्थकाः भवन्ति न तु निरर्थकाः ।

सृष्ट्यां केचन पदार्थाः सार्थकाः केचन निरर्थकाश्च भवन्ति । साधारणतः विज्ञानिनः मानवाः यानि यानि सृजन्ति तेभ्यः योग्यानि सार्थकानि नामानि ददति । नामनिर्देशनं सार्थकं व्यवहारार्थं च भवति । औषधस्य नाम व्यवहारार्थं सन्निपातभैरवीति । एतन्नाम व्यवहारार्थं भवति अपि च तन्नाम सार्थकमपि भवत्येव ।

सन्निपातरोगस्य औषधमेतत् भैरवस्वरूपे भासतेति हेतोः तन्नाम तदौषधस्य चक्रुः। शीताङ्कुशः नाम व्यवहारार्थमेव। किन्तु तदौषधं शीतज्वरस्याङ्कुशवत् कर्म करोतीति हेतोः तन्नाम तदौषधस्य अकुर्वन्। सर्वाणि नामानि सार्थकानि व्यवहाराण्यपि तद्वत् रागादीनामपि अनेकानि नामानि सन्ति तानि सर्वाणि सार्थकानीति अस्मादृशानां सिद्धान्तः। किन्तु केचन रागाणां नामानि निरर्थकानीति तानि व्यवहारार्थं संज्ञितानीति भ्रमावेष्टाः भणन्ति। सीता इति नाम यतः सा लाङ्गलपद्धत्यां दृष्टा इति हेतोः कृत्वा तस्यै सीता इति नाम चक्रुः। इदं नाम सार्थकमेव। लोके केचन स्वकुमार्याः नाम सीता इति कुर्वन्ति यतः स्वीयकुमारी सीतेव पवित्रा भूयादिति। यदि सा कुमारी सीतेव पवित्रा न भवति सः पित्रोः नामकरणदोषः न भवति। सः अन्यथा कुमार्याः दोषो भवति। ततः रागाणां नामानि सार्थकान्येव।

यदि गायकः रागाविष्करणे अशक्तः अरसिकः अशिक्षितो भवति नैपुण्यवान् न भवति सः तस्य दोष एव न तु रागस्य।

कल्याणीरागो वर्तते। तस्य रागस्य सम्यक् गायनेन भावपूर्णमनसा तत्रावश्यं कल्याणं भविष्यतीति तस्य रागस्यार्थः इति पूर्वसूरिणः तथा नाम चक्रुः। सः रागः कल्याणं न करोतीति कथनेन रागाः सर्वे निरर्थकाः इति कथनेन गायकस्य रसज्ञस्य दोष एव भवति सः न तु रागस्य रागाणां च।

अस्मदीयपूर्वजाः क्रान्तदर्शिनः अन्धश्रद्धाळवो न भवन्ति। ते शास्त्रीयदृष्ट्या सर्वं सुविचार्य योग्यनाम ददुः तेभ्यः रागेभ्यः। चित्रानक्षत्रे जातः मासः चैत्रमास इति विशाखे जातः वैशाखमासः इति नक्षत्राणां रूपरेखादिकं विलोक्य नाम ददुः। तथैव सप्तवासराः सप्तविंशति नक्षत्रनामानि च प्रददुः। एते सर्वे सार्थकाः शास्त्रपद्धत्या सुनिर्दिष्टाः नामाङ्किताः। एषु विषयेषु निरर्थकता नास्त्येव। एवमेव शास्त्रपद्धत्या विरचितानां रागाणां विषयेष्वपि निरर्थकता नास्तीति कथने सौन्दर्यं विद्यते। ततः सर्वे रागाः सुन्दराः सार्थकाश्च भवन्ति। कल्याणी-हिन्दोळ-वसंत-शंकरा-चारुकेशी-कलहंस-वराली–दीपक–मेघ-रागादयः सार्थकाः एव न तु व्यवहारार्थं निक्षिप्तसंज्ञकाः।

मेघरागगायनेन पर्जन्यवृष्टिर्भवतीति दीपकरागगायनेन प्रणतयः प्रज्वलिताः भविष्यन्तीति सर्वमेतत् भूतपूर्वं सत्यमिति जनश्रुतिः वर्तते। आप्तवाक्यप्रमाण-

नुसारं सर्वमिदं सत्यमेव अधुना तथा गातारः न सन्ति। तम् अनुभवं कल्पयितुम् अपि आधुनिकानुभावैः वयम् असमर्थाः भवामः।

**लोकनामानि सर्वाणि**
**व्यवहाराय केवलम्।**
**भान्ति लोके सदा तानि**
**घृतकोशातकीव च॥**

घृतकोशातककाये घृतं कियद् वर्तते इति कृतशोधनायां अन्ततः घृतस्य अभाव एव संदृश्यते। नाम केवलं घृतकोशातकी। घृतकोशातकीवत् लोकजनानां नामानि निरर्थकानि न तु रागाणाम् इति सौन्दर्यमीमांसकानाम् आशयः।

**सार्थकानि च नामानि**
**सर्वाणि जगतीतले।**
**निरर्थकानि नामानि**
**जनानां केवलं बत॥**

मानवानां नामानि अन्तरेण सर्वाणि नामानि जगतीतले सार्थकानि इति ज्ञेयं पण्डितं मन्यमानैः। स्वभावमनुसृत्य नामनिर्देशनम् अकुर्वन् पूर्वजाः मानवनामानि केवलं भक्त्या व्यवहारार्थं कृतानि।

शास्त्रज्ञाः करुणरसप्रधानरागाः शृङ्गाररसप्रधानरागाः वीररसप्रधान-रागाश्च सन्तीति ते रसानुसारं गायकैः वादकैश्च गातव्याः वादयितव्याः यथाक्रमम् इति संसूचयामासुः। तेषां सूचना सर्वजनसंमता भाति। किन्तु केचन पाषण्ड-वादतत्पराः यथाकथंचित् व्यक्तित्वप्रदर्शनानुरक्ताः एनमभिप्रायं तिरस्कृत्य तथा रसानुसारं विभक्ताः रागाः न सन्ति इति वादं प्रचालयन्ति। तेषाम् अभिप्रायः एवं वर्तते यच्चतुरो गायकः यं कमपि रागं गृहीत्वा सर्वेषु रसेषु गातुं शक्तः भविष्यति रसवातावरणं स्रक्ष्यति तत् सर्वं गायकाधीनं वाद्यवादकाधीनं वर्तते न तु रागाणां महत्त्वं न च रागकृतानां माहात्म्यम् इति। अत्र रागाणां माहात्म्यं

गायकस्य वादकस्य च माहात्म्यं विद्यतेति कथने सत्यं वर्तते न केवलं गायकस्येति कथने ।

रसानुगुण्यं रागास्ते
विभक्ताः पूर्वजैः भृशम् ।
चतुरो गायकः सर्वान्
रसभावैश्च गास्यति ॥

अयं भावः सर्वजनविदितः यत् रसानुसारं रागविभजनादिकं कृतं प्राचीनैः तदनुसृत्य गायनं वादनमेव भवति तदेव योग्यमिति च ।

## २३४. रसानुसारं पद्यस्य रागानुसंधानं सौन्दर्यम् ।

कवयः रसानुसारं कवयन्ति लिखन्ति पद्यानि गीतानि पदानि च । किन्तु गातारः पद्यार्थानभिज्ञाः तस्य पद्यस्य यत् किमपि रागं तालबद्धं स्वरबद्धं विधाय गायन्ति । तथाकरणम् अयोग्यम् असौन्दर्यास्पदं भवति । तस्य पद्यस्य संदर्भानुसारं रसानुसारं रागं स्वरबद्धकरणं सुयोग्यम् औचित्यपूर्णं च रसोत्पादनकारणं च भवति । तदा सुन्दरवातावरणं भविष्यति ।

कविः वसन्तर्तु वसंततिलकावृत्ते लिलेख रसानुसारं ससंदर्भनायिकानायकसंयोगे । तदनभिज्ञाय संगीतकारः तस्य पद्यस्य जोगियारागं वा शिवरंजनीरागं वा स्वरबद्धं विधाय गायति । तथाकरणम् असंगतम् असंबद्धं संदर्भानभिज्ञं च भवति । कवेः संगीतज्ञानावश्यकता संगीतज्ञस्य साहित्यज्ञानावश्यकता चापरिहार्ये भवतः ।

रसानुसारमेवास्ति
कविता वाङ्मये सदा ।
तथैव गायनं चैव
राजते रसनिस्तुलम् ॥

ज्ञानं संगीतिशास्त्रस्य
शतधाऽऽवश्यकं कवेः ।
तथैव गायकस्यापि
ज्ञानं काव्यस्य सर्वशः ॥

अनभिज्ञाश्च संगीतं
काव्यज्ञानविहीनकाः ।
सौन्दर्यपूर्णसंसारे
राजन्ते गर्दभा इव ॥

रसानुसारं पद्यस्य रागानुसंधानं साहित्यसंगीतज्ञानेन केवलं साध्यते । ततः अत्र अन्योन्याश्रयत्वं विराजते साहित्यसंगीतयोः ।

## २३५. रागाः प्राचीना एव न त्वर्वाचीनाः ।

संगीतं बृहत् शास्त्रम् । संगीतं तुम्बुरनारदादिभिः संसेवितम् । संगीत-साहित्ययोः देवता सरस्वती । प्राचीनाः कवयः अन्ये शास्त्रकाराश्च संगीतशास्त्रे विद्यमानशास्त्रीयशब्दजालं तान्त्रिकज्ञानादिकं यथा सप्तस्वराणां सृष्टिः आरोहणा-वरोहणादिकं तानादिकं तालल्यादिकं स्वराणां वैविध्यं ग्रामविशेषमूर्च्छनादिकं सर्वमपि ददुः लोकाय । किन्तु स्वीयरचितकाव्येषु ग्रन्थेषु च रागाणां नामोल्लेखनं रागाणां स्वरूपादिकं नोल्लेखयामासुः । तस्मात् कारणात् केचन पुरा रागाणां नामानि न सन्ति रागाः न सन्तीति कथयन्ति । अन्ये रागानामुल्लेखनं रागादीनां स्वरूपाणि च संगीतरत्नाकरे केवलं उल्लेखितानि सन्ति शार्ङ्गदेवेन नान्यैः इति कथयन्ति । परे शार्ङ्गदेवात् पूर्वं रागाः न विद्यन्ते इति यदि स्युः ते पदनामभिः प्रसिद्धाः इति न तु रागरूपैः इति तर्जनभर्जनादिभिः राद्धान्तं कुर्वन्ति ।

शार्ङ्गदेवाच्च पूर्वं हि
रागा नैव विभान्ति च ।
प्रचुरं व्यापृता लोके
पदनामाभिसंज्ञिताः ॥

किन्तु मदीयसिद्धान्तस्तु बहवः रागाः सन्ति अनादिकालादारभ्य राष्ट्रे । किन्तु ते कालप्रवाहे खण्डिताः अस्तव्यस्ताः जाताः इति । सरस्वतीं संगीतप्रियां कच्छपिवीणावादनतत्परां नारदं वीणावादनतत्परं तुम्बुरं कलवातीवीणावादकं

विधाय बृहत्संगीतशास्त्रं विनिर्मितवतां रागज्ञानं न विद्यतेति तदा रागोत्पत्तिः न जाता इति कथनम् अदूरदृष्टिभाव एवेति ममाभिप्रायः। भारतवर्षे हिन्दुराष्ट्रेऽनवरतानन्तपरधाटीप्रभावात् संगीतज्ञानाभाव जैनबौद्धधर्मव्यापकत्वाद् भारतीयानां शिष्टाचारत्वात् सौन्दर्यमयसंगीतप्रपञ्चे संगीतवाहिनी खण्डिता। अपि च संगीतं मनसां संयमननिरोधकमिति हेतोः संयमचित्तानां विकाराविर्भावः मा भूयादिति कारणात् संगीतं धिक्कृतवन्त इति मम निष्कर्षः। पुरा समाजे विटनटवारनारीपरायणानां गायकानां सर्वदा शवसमीपे कर्मकर्तॄणां वैद्यानाम् एकस्यां पंक्त्यां समुपविश्य भोजनकरणं निषिद्धमासीत्। ततः संगीतकला समाजे हसिष्णुतां प्राप चेति केषांचन मतम्। श्रीमद्रामायणं कुशीलवौ कुशलवनामधारिणौ रामपुत्रौ अगायताम इति वाल्मीकि-कथनम्। सर्वत्र बहवकाशस्य विद्यमानेऽपि तत्र रागाणां नामोल्लेखनं पवित्रसमाजभयादेव न कृतमिति च मदीयबौद्धिकस्पन्दनाविष्कारः।

गायकाः नटकाश्चैव
पङ्क्तिबाह्याश्च वैद्यकाः।
कृताः समाजे पूर्वस्मिन्
काले शिष्टैः निरन्तरम्॥

संगीते रागभावत्वात्
जैनबौद्धाश्च छान्दसाः।
नैवाश्रिताश्च संगीतं
यतः तत् चित्तरोधकम्॥

शार्ङ्गदेवः अकस्मात् एकवारं कथं रागादीनां नामानि स्वीयसंगीतरत्नाकरे प्रदर्शयामास। एवम् अनुमीयते शार्ङ्गदेवः आसेतुहिमाचलं कराचीप्रदेशादारभ्य ब्रह्मदेशपर्यन्तं भ्रामं भ्रामं विद्यमानरागान् सर्वान् संहृत्य संगीतरत्नाकर-नामकं ग्रन्थराजं निर्ममौ इति, रागाः सार्थकाः इति, अतिप्राचीनाः इति, न तु निरर्थकाः व्यवहारार्थं संज्ञिताः अपि चार्वाचीनाः इति च मम निष्कर्षः।

## २३६. सप्तस्वराः सप्तरङ्गकिरणप्रतीकाः ।

सप्तस्वराणां वर्णान्तरभावत्वात् तेषां वर्णाः सन्त्येव। स रि ग म प ध नि इत्येताः सप्तस्वरनामभिः प्रसिद्धाः। एते स्वराः जंबूवर्णे धूसरवर्णे नीलवर्णे हरितवर्णे पीतवर्णे नारङ्गवर्णे रक्तिमवर्णे च यथासंख्यं राजन्ते। संक्षिप्तेन तेषां स्वराणां वर्णाः अधोनिर्दिष्टप्रकारेण वर्तन्ते ।

जं धू नी ह पी ना र
वि ऐ बि जि वाय् ओ आर् सन्ति ।

यथा सप्तरङ्गाः यथाक्रमं स्वस्वरङ्गोपेताः राजन्ते सप्तरङ्गाणां संमिश्रणेन तेषां प्रभाभिः अनेकरङ्गाः समुद्भूताः भवन्ति तथैव सप्तस्वराणां नादप्रभाभिः नैकस्वराः समुद्भूय साहित्यगीतसंबन्धेन अगणितरागरागिण्यः ते जनयन्ति । यथा रङ्गस्पर्शनेन लग्नेन शरीरं रञ्जितं भवति तथैव रङ्गस्वरमिश्रित-रागश्रवणेन श्रुतिपथसंलग्नेन मानसं शरीरं च रागरञ्जिते भवतः तदा परमानन्द-सौन्दर्यम् अनुभूयते जन्तुभिः। ततः सप्तस्वराणां सप्तरङ्गाणां संबन्धः निसर्गजन्यो भवति। सर्वमेतत् सौन्दर्यं संमिश्रणं सूर्यपुत्रभासन्ध्या प्रजनयति। सन्ध्यामूलकं सर्वमपि जगत् सजीवेतं भिन्नभिन्नविकारमयं भवति। तस्मादेव संगीतशास्त्रे विविधस्वरसंमेलनेन क्रमपद्धत्या शास्त्रीयपद्धत्या परस्परसंपर्केण च योग्यस्वर-मिश्रणेन अनेकरागाः समुत्पन्नाः सन्ति। एतादृशप्रभावेन संगीतं मानसिकरागं जनयति प्रकृतिं रागरञ्जितं करोति च। संगीतं जगन्मोहनकारकं सर्वरोगनिवार-कशास्त्रं च भवति।

सप्तरङ्गसमुत्पन्नं
सप्तस्वरविभासितम् ।
यथाक्रमसुयोगेन
संगीतं रागरञ्जितम् ॥

तस्मात् मनोज्ञसंयोगात्
रागिणीरागमालिकाः ।
भवन्ति लोकसौख्याय
सान्तत्यं लोकरञ्जकाः ॥

सप्तरङ्गाणां सप्तस्वराणां मध्ये रञ्जकत्वं नाम एकात्मताभावः बिम्बप्रति-बिम्बरूपेण भ्राजते ।

**२३७. रागाः विभिन्नस्वरूपाः रञ्जकतागुणसुन्दराः ।**

रागाः विभिन्नस्वरूपाः विविधगुणान्विताः अपि संहत्य एकं सुन्दरशास्त्रं व्यरचयन् । अत्र भिन्नत्वे एकत्वं दृश्यते । एते रागाः विभिन्नाः स्वभावैः स्वरैः गुणैः तथापि रञ्जकताविषये एकत्वमेव प्राप्नुवन्ति । एकः करुणरसे वर्तते, अन्यः भयानकरसे वर्तते, एवं नवरसेषु एते विद्यमानाः स्वीयस्वीयमनस्तत्त्वानि प्रदर्श-यित्वा प्रकृतिं रञ्जयन्ति । रञ्जकतागुण एव तेषाम् आत्मस्वरूपः । आपः भिन्नाः अपि तेषां सरसत्वं आपत्वं एकमेव भवति ।

सामान्यं सरसत्वं हि
भिन्नेष्वप्सु विदृश्यते ।
तस्मात् विभिन्नरागेषु
रञ्जकत्वं विराजते ॥

विभिन्नस्वरसंपृक्ताः
वैविध्ये प्रियदर्शिनः ।
भान्ति रागाः सुयोगेन
ऐकात्म्यबन्धिता दृढम् ॥

सर्वे रागा रसस्वान्ताः
लोकरञ्जनकारकाः ।
यथारसं विराजन्ते
स्वरमण्डलनर्तिताः ॥

**२३८. रागाणां सौन्दर्यं नाम श्रवणेन केवलं प्रतीयते ।**

रागाणां सुन्दरं रूपं
वर्तते नास्ति संशयः ।
अन्तर्बहिश्च ते सर्वे
मधुराः भावरञ्जिताः ॥

रागेषु रागसौन्दर्यम्
वर्तते गायने ध्रुवम् ।
तस्माच्च रागरागिण्यः
दिव्यसन्ध्योपबृंहिताः ॥

सौन्दर्यं केवलं नाम्ना
मानसेषु प्रतीयते ।
यदि भुक्ताः सभावैस्ते
दास्यन्ति स्वर्गजं सुखम् ॥

भाषणैः मधुरालापैः
रागाः सर्वाङ्गसुन्दराः ।
सुस्वरैः नादपूर्णाः ते
त्रिदशत्वे विभान्ति च ॥

रागाः नित्ययौवनसंलसिताः शाश्वताः दिव्यरूपवत् परमात्मस्वरूपवत् अणुत्वं महत्त्वं च रागेषु दर्शयितुं च शक्ताः ते प्रतिक्षणं नूतनाः संराजन्ते । चारुकेशीति रागश्रवणेन सा रागिणी सुन्दरकेशसंभारा मयूरपिच्छवल्गुवलिगत-केशजालेन नीरदमण्डलमण्डितवर्षासुन्दरीव स्वरप्रस्थारैः मञ्जुगत्या अस्मत्समक्षं प्रयाति । सा यदि गायति रागश्रवणेन रागिण्याः दर्शनेन च श्रोतारः रागनिर्भर-शरीरिणः भविष्यन्ति । कल्याणीनामस्मरणेन शुभप्रदारागिणी कल्याणाङ्गी समक्षमेत्य स्वीयारोहणावरोहणक्रमादिभिः अस्मान् पुलकितान् विधाय शुभं प्रदाय राजते इव भाति । तथैव अमृतवर्षिणी पूर्णचन्द्रिका इत्यादयः ऊह्याः भवन्ति । षण्मुखप्रियः अयं रागः महासेनस्य प्रियतमः रागः अस्ति । खरहरप्रियः अयं रागः खरनाम राक्षससंहारकस्य रामस्य प्रियतमः रागः इति रागनिर्देशनेन द्योतते । रागाः सर्वे सुन्दररूपाः सार्थकाः । रागाणां नामधेयानि व्यवहारार्थं संज्ञितानीति कथनम् अविवेकास्पदमेव भवति । अन्ततः रागाणां परमावधिः दिव्यसौन्दर्यराशीभूतपरमात्मरञ्जनमेवेति परमात्मस्वरूपदर्शने कृतार्थाः पर्यवसानाः भवन्तीति च भारतीयानां परम्परागततर्कशुद्धसिद्धान्तः

इति श्री गीर्वाणान्ध्रभाषाप्रवीणेन महाकविना गीर्वाणगेयकविमण्डल-चक्रवर्तिना पण्डित ओगेटि परीक्षित् शर्मणा विरचितायां सौन्दर्यमीमांसायां संगीतसौन्दर्यप्रकरणं समाप्तम् ॥

## १४. नाट्यसौन्दर्यप्रकरणम् ।

चित्ररेखाशिल्पसंगीतानां सौन्दर्याणि हस्तकौशल्येन तक्षणेन गायनेन च भवन्ति क्रमेण, न तु शरीरसौन्दर्यमूलकत्वात् इति ज्ञेयम् । किन्तु नाट्ये तु सर्वसौन्दर्याणाम् आवश्यकं तत्रापि प्राधान्येन शरीरसौन्दर्यम् अत्यावश्यकं भवति । भारतीयनाट्यस्यावश्यकभूतं सौन्दर्यं जन्मनः संक्रामति न तु कृत्रिमव्यापारेण । जन्मनः शरीरसौष्ठवं समविभक्ताङ्गत्वम् उत्साहशक्तिः नर्तनयोग्यशक्तिः संगीतज्ञानावश्यकत्वं हेलाविलासपरिपूर्णाङ्गविन्यासत्वम् अलङ्कारसाहित्यशास्त्रपाण्डित्यम् अतिबुद्धिमत्त्वं दीर्घापाङ्गत्वं सुन्दरवदनमण्डलमित्यादिकं नाट्ये अपरिहार्यावश्यकं भवति । नाट्यसौन्दर्यप्रतिपादनार्थं एतादृशशरीरस्य सुन्दराहार्यावश्यकताऽपरिहार्या भवति । ततः सर्वकलासु इदं नाट्यम् अत्यन्तधनव्ययप्रयाससमन्वितं भासते । नाट्यसौन्दर्यं सकलसद्गुणसुन्दरावयवसंपृक्तशरीरसौन्दर्येण प्रद्योतते तद्विरहितं नाटयं मर्कटप्लवनमेव भविष्यति न तु नाट्यमिति मे मतिः । ततः देवांशसंभूतानामेव सुरयुवतिसन्ततीनामेव नाटयं योग्यं सुन्दरं भवति न त्वन्येषाम् ।

### २३९. नाट्यं सायुज्यसौन्दर्यमूलकम् ।

जगति भारतेतरदेशीयनाट्यानां शरीरव्यायाम एव मूलतत्त्वं भवति । किन्तु भारतीयनाट्येषु व्यायामः गौणत्वेन भासते । भारतीयनाट्येषु व्यायामः सुन्दरसंगीतसाहित्यभक्तिभावप्रकटनमुद्राभिः परिपुष्टिं प्राप्य चान्ततः परमात्ममार्गदर्शनतत्परः मानसिकानन्दं प्रजनयति, सर्वप्रेक्षकान् स्वर्गधामनयने मूलकारणं भवति । ततः भारतीयनाट्यं भावानभिज्ञानां साहित्यानभिज्ञानां भक्तिभावानभिहितानां भारतीयपरम्पराऽनभिज्ञानाम् अन्धेन्दूदयमेव भवति । सर्वकलाभिज्ञानां संगीतसाहित्यज्ञानां नाट्यमिदं सायुज्यप्राप्तिकारकं सफलं परमानन्ददायकं भवति ।

सुन्दरावयवनिर्माणं
कलासु बहुमज्जनम् ।
उत्साहशक्तिसंयुक्तं
बौद्धिकं मूलकारणम् ॥

नाट्यानां भारतीयानां
सर्वेषां भक्तिभावना ।
मूर्धन्या भासते नित्यं
दिव्यगीताभिभूषिता ॥

भारतीयसर्वनाट्यानि तालगीतभावनासाहित्यसंगीतपरिपूर्णानि भवन्ति । यदि एकत्र एतानि न सन्ति तानि नाट्यानि व्यायाममात्राश्रितान्येव । सर्वपाश्चात्यनाट्यं भक्तिभावात्महीनप्लुतैः वाद्यानां नादैः क्रमबद्धतालमिश्रितव्यायामशिक्षणमेव भवति न तु भावप्रधानभूतम् ।

२४०. सुन्दराभिनयेन लोकानुकरणप्रदर्शनमेव नाट्यम् ।

लोकव्यवहारं नाट्यरूपेण प्रदर्शनमेव नाटयम् । पूर्वजा एवं व्यवहारम् अकुर्वन् अधुना नवीनाः एवं कुर्वन्तीति सर्वमपि करचरणहावभावादिभिः तालमिश्रितगानैः वाद्यविशेषैः नाट्यरूपेण कृत्वा प्रदर्शनमेव नाट्यम् ।

केवलानुकरणेन रसो न भवति । किन्तु तस्मिन् अनुकरणे आहारे व्यञ्जनशाकादिवद् भावान् माधुर्यगुणं लीलाविलासविच्छित्तिम् अन्यसौन्दर्यगुणान् मेलयित्वा नाट्यकरणे तस्यानुकरणस्य सौन्दर्यं पुष्टिश्च भवतः । नाट्येन ऋजुवर्तनं विद्याबोधनं नीतिबोधनं समाजकल्याणभावनादायित्वं च भवन्ति । सर्वमेतत् भारतीयनाट्ये केवलं संदृश्यते ।

विश्वात् सर्वं गृहीत्वैव
किञ्चित् स्वीयं मिलाप्य च ।
स्वीयं सर्वं तथाख्यानं
लौकिकं भाति साम्प्रतम् ॥

अनुकरणे यदि स्वीयं न स्यात् तत् असौन्दर्यानुकरणमेव भवति । अनुकरणे किञ्चित् रागरञ्जकत्वं मेलयित्वा नाटकीकरणं नोचत् नाटयकरणं महत् सुन्दरं भवति । जगत् सर्वं पुनरावृत्तिसहितम् । किन्तु तस्मिन् पुनरावृत्तौ महत् नवीकरणं भवत्येव । तथैव नाटयमपि ।

सर्वे च ऋतवो भान्ति
सुन्दराः प्रतिवत्सरम् ।
तथैव भुवि नाट्यानि
नावीन्येन लसन्ति किम् ॥

## २४१. देशकालपात्रानुसारं नाट्यं नावीन्यसुन्दरम् ।

अस्मिन् युगे देशकालपात्रानुसारं विविधनाट्यप्रकाराः भिन्नविभिन्नस्वरूपेषु नावीन्यरूपविलसिताः सकलधरातलप्रजाऽनुमोदं भजन्ते । एतादृशव्यापकस्य मूलभूताः प्रचारकारणभूताः श्री उदयशंकरः रवीन्द्रनाथठाकूरः रामगोपालः श्रीमती रुक्मिणी देवी बालसरस्वती इत्यादयः आसन् । नाट्यं भारते सर्वत्र पुरा देवदासीभिः देवायतनेषु कृतमासीत् । ताः देवदास्यः स्वीयजीवितानि देवाय समर्पितवत्यः आसन् । नाट्यं देवालयेषु नोचेत् राजाधिराजानां चन्द्रशालासु केवलम् अवर्तत । मध्यमयुगे नाट्यकरणं समाजे अनागरकविषयो बभूव । कालक्रमेण अधुना नाट्यं सर्वजनसमादरणीयं जीवने एकाङ्गमिव भासते । अनेकमुखस्वरूपनाट्यं कष्टतरं भवति । साहित्यानभिज्ञानाम् अवगन्तुं सर्वमेतत् ज्ञातुं साहित्यरसशास्त्रेषु प्राथमिक-शिक्षायाः आवश्यकताऽस्ति । नाट्यं विविधरूपेषु दृश्यमानमपि तस्य मध्यस्थानं एकमेव तत् विश्वानन्दसौन्दर्यस्थानं भवति । नृत्तं नृत्यं नाट्यं कथं दर्शितानि भवन्ति अपि च तेषां आहार्यादिकं कथं वर्तते अधोनिर्दिष्टप्रकारं दर्शयिष्यामः । अधुना भारते एतानि नाट्यानि संदृश्यन्ते ।

ओडिशी भरतं गरबा
कूचिपूडी कथक् तथा ।
लावणी मणिपूरी च
मोहिन्यत्तं कथाकलिः ॥

यक्षगानं तु लोरी च
राजस्थानी च भाङ्गडा ।
नाट्यान्येतानि राजन्ते
भरतानि त्रयोदश ॥

यान्यनुक्तानि नाट्यानि
विद्यन्ते राष्ट्रसीमसु ।
अस्मिन् त्रयोदशे तानि
लीनानीति ममाशयः ॥

एतेषु समुदीरितेषु नाट्येषु उच्चत्वं नीचत्वं इत्यादिकं नास्त्येव एतानि सर्वाणि नाट्यानि समानप्रतिपत्तिभाजकानि भवन्ति । एषु नाट्येषु प्रत्येकनाट्यं स्वीयमुद्रां स्वरूपं वैयक्तिकसौन्दर्यं मधुरभाषणमित्यादिकं प्रदर्शयति अत्र समुल्लिखितनामभिः भारतीयनाट्यं प्रपञ्चे सर्वत्र विसर्पति सांस्कृतिकस्वरूपैः । एतानि सर्वाणि नाट्यानि भरतमुनिनाट्यशास्त्रादेव समुत्पन्नानि सन्ति । सर्वाण्येतानि संगीतसाहित्यरसभावाभिनयसमाबद्धानि सन्ति । भरतनाट्यशास्त्रं राकाचन्द्र इव भाति । सर्वाण्येतानि नाट्यानि कलानिधेः कला इव अंशत्वेन राजन्ते । एतेषां सर्वेषां नाट्यानां नृत्तनृत्यप्रदर्शनमावश्यकं भवति । सामान्यतः नाट्यं नाम रङ्गमञ्चे कृतनाटककला इत्यर्थः । नाट्ये अभिनयः संगीतं च वर्तेते । नाट्यं नाटकस्य प्रधानभागः एव भवते । नाट्यं दृश्यकाव्यं भवति । नृत्तं केवलं नाट्यनाम्ना व्यवह्रियते । नृत्यं भावप्रधानं नाट्यम् । नाटकं नाट्यमिति आहूयते । नाट्यस्य द्वौ भागौ अर्थात् नाम्ना नृत्तम् अपि च नृत्यं प्रधानभूमिकां धरतः नाट्याभिनये । नृत्ते भावादिकं न भवते किन्तु लालित्यपूर्णहस्तपादविन्यासादिकं भवति । सर्वमेतत् विन्यासादिकं वृत्तलेखिन्यारेखितरेखादिकमिव प्रेक्षणीयं भवति । तत्र कोऽपि अर्थो न भवति ।

नृत्ये भावाः अर्थाः सन्ति । हस्तचालनादिषु भावाः अर्थाश्च संदृश्यन्ते तान् भावान् अर्थान् तज्ज्ञाः मुद्राः इति कथयन्ति । एते मुद्राः सुन्दराः भावपूर्णस्वरूपाः । नृत्ये गानादिकं भवति । तस्य गानस्य अनुवादं व्याख्यानं च ददति मुद्राः । नृत्ये अङ्गविन्यासाः भङ्गिमाः हावभावविलासाश्च भवन्ति । यदि नृत्यम् अवगन्तुं शक्तो भवति प्रेक्षकः तत्र नृत्ये विद्यमानरहस्यं प्रेक्षकस्य अवगतमेवेति कथने न काऽपि शङ्का वर्तते । प्रेक्षकाः यदि रसहृदयाः भवन्ति पुराणगाथाऽभिज्ञाः भवान्ति साहित्यशास्त्रज्ञाः भवन्ति नृत्यम् अवगतं भविष्यत्येव । नोचेत् प्रेक्षकाः अपि नाट्यमन्दिरस्तम्भसमाना एव भवन्ति ।

अधुना क्रमेण त्रयोदशभारतीयनाट्यानां स्वरूपं तेषां सौन्दर्यं तेषु विद्यमानं स्यन्दमानं सौन्दर्यं भिन्नत्वं एकत्वं च व्याख्यास्यामः । सुन्दरमधुराकृतीनां समवायेन तेषां विलासललित्यैः गीतवाद्यतालनर्तनादिभिः नाट्यं रसपुष्टं सुन्दरं भवति । सुन्दराकृतिम् उद्दिश्य मानवसौन्दर्यप्रकरणे सविस्तरं प्रपञ्चितम् ।

## २४२. त्रिभङ्गरूपसंचारभावप्रकटनया ओडिशीनाट्यं सुन्दरम् ।

ओड्रदेशीयम् अस्ति ओडिशी नाट्यम् । आधुनिकेषु दिवसेषु इदं नाट्यं जनसामान्यपर्यन्तं प्रचक्राम । अस्मिन् नाट्ये प्रत्यक्षं संदृश्यते शिल्पाकृतिशरीरभङ्गिमादयः । अस्य नाट्यस्य चालनं कलापरिव्याप्तम् । इदं नाट्यं चलितशिल्पकलासमुदायपरिव्याप्तमिव लोचनानन्दकरं भवति । अस्य नाट्यस्य प्रधानस्वरूपं चतुष्कं ( चौका ) भवति । अस्मिन् नाट्ये त्रिभङ्गाः तरङ्गाः इव संदृश्यन्ते शरीरे । तस्मात् इदं त्रिभङ्गसंचारमण्डितं परिपूर्णं भवति । शरीराकुञ्चनेषु शिल्पकलाः शिल्पभङ्गिमाः प्रेक्षणीयाः भवन्ति ।

**त्रिभङ्गसंचारमनोज्ञभावैः**
**विलासविच्छित्तिविसर्पिताङ्गैः ।**
**कोणार्ककुड्यात् गलिता चोडिश्शी**
**संचारिणी शिल्पकलेव भाति ॥**

यदा नाट्यसुन्दर्यः त्रिभङ्गसञ्चारैः नर्तन्ते तदा प्रेक्षकाणां कोणार्कदेवायतनात् शिल्पानि गलितानि भूत्वा वाद्यनिस्वनैः समागत्य रङ्गस्थले संचारैः संचरन्तीव प्रतिभान्ति । अस्मिन् नाट्ये मङ्गलाचरणं पल्लवी मोखया इत्यादयः सन्ति । बटुनाट्यं प्रसिद्धं भवति विविधभङ्गिमाभिः वेणुवीणामृदंगतालध्वनिभिः । पल्लवी विविधशैल्पिकभङ्गिमादीन् मिश्रितसंचलनेषु दर्शयन्ती शाश्वतमुद्रां प्रेक्षकानां मनसि संजनयति ।

मोखया इदं नाट्यान्ते समुदात्तचालनैः उड्डयनैः केवलं नाट्यसंचलनेषु क्रियते । अनेन ज्ञायते अधुना इदं नाट्यं समाप्तं भवति इति । अस्मिन् नाट्याभिनये नाट्यं गीतगोविन्दकाव्यात् संगृहीताभिसारिका-खण्डिता-विप्रलब्धा-

घष्टपदीभिः समाप्यते । इदं नाटयं प्राचुर्येण युवत्यः कुर्वन्ति । भारतीयवाद्य-विशेषाः अस्मिन् नाटये प्रयुज्यन्ते । अस्मिन् नाटये आहार्यं भारतीयाहार्यमेव भवति । अस्मिन् नाटये कर्णाटकरागाः उपयुज्यन्ते । सामान्यतः पुरुषा एव प्रचुरं गायन्ति ।

## २४३. रसभरमुद्राभिनयगतिभिः कर्णाटकसंगीतगीतैः सुन्दरं भरतनाटयम् ।

भरतनाटयं तमिळदेशीयं भवति । अस्मिन् नाटये अलरिंपु जतिस्वरः तिल्लाना इत्यादयः विषयाः सुप्रसिद्धाः सन्ति । अलरिंपु समानभावचलनमण्डितं भवति । जतिस्वरः शब्दमाधुर्येण तालगतिना प्रसिद्धरागेण गीयते । तिल्लानायां तालैः रागः गीयते । तिल्लनायां शिल्पभङ्गिमादीन् आकर्षणात्मकरूपेण इदं नाटयं दर्शयति । नृत्ते भङ्गिमाः वृत्तलेखिनीरेखान् दर्शयन्ति । न कोऽपि अर्थो भवति तत्र ।

नृत्ये शब्दः वर्णः पदम् अपि च जावलिः इत्यादयः विविधस्थितीन् प्रदर्शयन्ति । वर्णः कथयति नायिकायाः प्रेमकथाम् । अस्मिन् नाटये कर्णाटक-संगीतमेव उपयुज्यते । मृदङ्ग-वीणा-वेणु-ताल-इत्यादिवाद्यैः इदं नाटयं प्रतिध्वानितं प्रेक्षकचित्तेषु प्रतिबिम्बितं भवति । अस्मिन् नाट्ये आहार्यं काञ्चीपुरचीरचोलादिकं शतधा उपयुज्यते । सर्वप्राचीनालङ्काराः आपादमस्तकं संदृश्यन्ते अस्मिन् नाट्ये नर्तकीनां शरीरेषु ।

तमिळ्तेलुगुगीतैश्च
पदवर्णादिगायनैः ।
वीणावेणुमृदङ्गैश्च
भरतं क्रियते मुदा ॥

त्यागराजकीर्तनानि श्यामाशास्त्रिकीर्तनानि अन्नमाचार्यकीर्तनानि क्षेत्रज्ञ-गीतानि आन्ध्रभाषायां विद्यन्ते । एतानि सर्वाणि गीतानि उपयुज्यन्ते भरतनाट्ये । तस्मात् तमिळ्तेलुगुगीतैश्च पदवर्णादिगायनैः इत्युक्तम् ।

## २४४. युवतीयुवकमाधुर्यपूर्णसंमेलनेन रसस्यन्दमानं सुन्दरं गरबानाटयम् ।

इदं नाट्यं प्रसिद्धं गुजरातदेशे । अस्मिन् नाट्ये युवतीयुवकाः मिलित्वा हल्लीसकादिनाटयानि अङ्गनामङ्गनामन्तरे माधवं माधवं माधवं चान्तरे चाङ्गना इतिवत् ते नाट्यं कुर्वन्ति एकतालेन एकगीतेन च । अस्य समूहनाटयस्य नाम गरबा भवति । अस्मिन् नाट्ये गोपगोपीजनाः मिलित्वा नाट्यं कुर्वन्तीव प्रेक्षकानां नेत्रकौमुदी भवति । इदं गरबानाट्यं गुजरातदेशे सर्वैरपि क्रियते । शहनाई-डिंडिमादयः वाद्याः उपयुज्यन्ते । आहार्यं भारतीयं प्रविराजते ।

मधुरयुवतिवृन्दैः नाशिकास्वानगीतैः
चटुलयुवकगानैः हस्तवेत्राभिघातैः ।
त्वरितमधुरचक्रावर्तनैः चारुहासैः
जनगणनुतगरबा राजते लोकरम्या ॥

## २४५. स्वरमण्डलगतिरसभावमुद्राऽलंकारगीततरङ्गैः पदैश्च कूचिपूडी सुन्दरं नाटयम् ।

कूचिपूडी आन्ध्रीयं नाट्यं वर्तते । इदं भरतनाटयमिव संदृश्यते । अस्मिन् नाट्ये बहवः शास्त्रीयविषयाः सन्ति । अस्मिन् नाट्ये जातिस्वरः तिल्लाना अपि च जावलयः तरङ्गाः गीतानि पदानि भामाकलापश्च सन्ति । कूचिपूडीनाटय-चलनादिकं वर्तुलं भवति । इदं पाररसवत् चञ्चलकम्पितचलनेषु स्पन्दनं कुरुते । इदं नाट्यं द्रुतगतिबद्धं भवति । भरतनाट्ये यथा वाद्यविशेषाः प्रयुज्यन्ते तद्वत् अस्मिन् नाट्येऽपि उपयुज्यन्ते । आहार्यं भारतीयं भरतनाट्यवद् भवति । आभर-णानि अन्यालङ्करणानि इतरनाटयापेक्षया अधिकानि भवन्ति । कांस्यविस्तार्यां तालबद्धं नाट्यं क्रियते इदं नाट्यं सर्वाङ्गसुन्दरं इति केषांचन मतम् । अस्मिन् नाट्ये सदाशिवपरब्रह्मगीतानि त्यागराजस्वामिगीतानि श्यामाशास्त्रिगीतानि अपि च अन्नमाचार्यगीतानि चोपयुज्यन्ते । क्षेत्रज्ञरामदासगीतानि नारायणतीर्थतरङ्ग-गीतानि गीतगोविन्दकाव्यगीतानि चोपयुज्यन्ते । एते कूचिपूडिनर्तकाः अधिकतरं संस्कृतगीतानि गृहीत्वा राष्ट्रीयाखण्डतां प्रचारयन्ति । कूचिपूडि सन्नुतं वं विदांकुर्वन्तु । मद्रचितामरवाणीकाव्यात् समुद्धृतानि ।

सात्त्विकानुभावसंचारिरम्य-
हावभावलास्यभासिताङ्गी ।
अष्टनायिकादिनिष्ठितशोभात्त-
कूचिपूडि धरणिसन्नुताङ्गी ॥

आङ्गिकाहार्यवाचिकाद्यभिनयालि-
नवविधसरसरसयुतभव्यगात्री ।
मधुरसन्निवेशानंदभरितभव्य-
पुण्याळिसज्जिता कूचिपूडी ॥

बालगोपालगीतिकाभणितिबद्ध-
पादनूपुरानूपुरारवचैतन्ययुक्ता ।
भावरागतालमधुरगानरम्य-
कोटिपुण्यालिभूषिता कूचिपूडी ॥

हस्तमुद्रादिभावनाशस्तरूपा
नंदिकेश्वरधिषणादिव्यविनुता ।
मधुरतेलुगुवरकलाकलिताङ्गि
धरणिमहिताभिनयगणदर्पणाङ्गी ॥

यज्ञसंरक्षकं दिव्ययज्ञपुरुषं
परमपावनं व्यत्यस्तपादकलितम् ।
प्रथितदिव्यमधुरकलावीक्षणाभासिता
कोटिपुण्यालवालेयं कूचिपूडी ॥

गौळकेदारगौळहिन्दोळराग
शङ्कराभरणाठाणजातिस्वरेषु ।
सुरटिचाराभि श्रीरागशोभिताङ्गी
मधुरकाम्भोजिकाफिकमाचसुरम्या ॥

अर्चनादिपूर्णपूर्वरंगविधान-
सूत्रधारहास्यसूक्तियुक्ता ।
शास्त्रबद्धरम्यचरणचालनभाव-
कूचिपूडि मधुरतापूर्णरूपा ॥

हे यदुकुलसुधाम्बुधिरम्यचन्द्र
एहि मे नाथ मम कान्त कान्तिचन्द्र
इत्यादि भाषणभावनाकलित-
भक्तिश्रृङ्गाररसपूर्ण कूचिपूडी ॥

सत्यभामाप्रणयमत्तसरस-
कल्याणि चानन्दभैरविमधुरगतिषु ।
विलहरीभैरविमुखारिनाटलसिता
कूचिपूड्यभिनयति प्रजा वाञ्छिताय ॥

ऋक्षभूषितयामिनीवल्गुसिक्ता
गीतगोविन्दकाव्यार्थसारवक्ता ।
कृष्णलीलातरङ्गेषु विष्णुरूपा
वाञ्छितार्थप्रदायिमी कूचिपूडी ॥

२४६. तालबद्धचालनैः कम्पितपादगतिपरिभ्रमणादिभिः
कथक् सुन्दरं नाटयम् ।

कथकः इत्यस्मात् कथक् जातम् । एतत् कथक्नाट्यं ववृधे उत्तर-हिन्दुस्थाने । इदं नाट्यं धार्मिककथाः नाटयरूपेण अभिनयरूपेण च प्रकटयति । कथक्नाट्यं मुगलाईचक्रवर्तिभिः परिपोषितं परिपालितं च । इदं नाटयम् उत्तरप्रदेशे रासलीला इति नर्तकाः प्रदर्शयन्ति । नृत्ते तुकडे ( खण्डाः ) अपि च तराना इत्यादयः मुख्याः सन्ति ।

कथास्तु नाटयरूपेण
कथ्यन्ते हस्तचालनैः ।
पादकम्पनविधा च
तत्कार इति निगद्यते ॥

अस्मिन् नाटये पादकम्पनकर्म विविधतालबद्धं भवति । इदं पादकम्पनम् अनेकतालान् व्यक्तीकरोति । कथक्नाट्यस्य तत्कारभागः जीवितं भवति । अभिनये भजनादिकं मधुरं प्रदर्शयति नर्तक उत नर्तकी । नाट्यमिदं जलाहरणं आदर्शं विलोक्य स्वात्मानं अलङ्करणम् इत्यादिकं नित्यजीवनवृत्ततति विशदयति सहृदयानन्दकारकम् । अस्मिन् नाटये आहार्यं मुगलाईनाम् आहार्यवद् भवति । इदम् उत्तरहिन्दुस्थानीयनाट्यमिति कथने न काऽपि शङ्का वर्तते । इदं समष्टयां सर्वत्र जगत्यां व्यापृतं वर्तते । इदं नाटयं तालबद्धगतिभिः कम्पितपाद-गतिभिः परिभ्रमणादिभिः विशेषतः हिन्दीगीतैः मीराभजनैः क्रियते ।

## २४७. ग्रामीणनागरकमनोरञ्जनकारकभावलावण्यमादकतापूर्ण लावणी ( लावण्य ) नाटयम् ।

इदं नाटयं महाराष्ट्रीयं वर्तते । अस्मिन् नाटये ग्रामीणं मनोविकारादिकं संदृश्यते । अस्मिन् नाटयेऽपि न किमपि वैविध्यं विस्तारकपूर्वं विद्यते । इदं नाटयं अल्पसंचारे केवलं भवति । अस्मिन् कथाकथनं नाट्यरूपेण भवति । अस्मिन् नृत्तं नृत्यं नाटयं च दृश्यन्ते । ललितचालनं गतिगमनादिकं अल्पम् भवति । तालादिकं पादनूपुरचालने वर्तते । अस्मिन् नाट्ये भारतीयवाद्याः उपयुज्यन्ते । इदं नाट्यं अतीवकामविकारजनकं भवति । इदं प्रायेण युवतीभिः युवत्या वा क्रियते न तु पुरुषैः । इदं मत्कृतजानपदनृत्यगीतमञ्जर्याः समुद्धृतम् ।

### लावणी ( लावण्य )गीतम्

लावण्यवतीं मां दृष्ट्वा
सुवर्णमुद्राः नैकाः क्षिपन्तु
सानन्दं लावण्यं पीत्वा
तन्मयेन स्वर्गसुखमनुभवन्तु ॥ लावण्यवतीम्

लावण्यावृत-रसमय-देहाम्
कामुक-मज्जन-लीलाकलिताम्
मार्दवभरितां नवनीत-ललिताम्
रसिकजनावलिकर्षणकलिताम् ।। लावण्यवतीम्

जल्पन् नूपुर-चञ्चलचलनाम्
लाक्षारञ्जितपल्लवचरणाम्
तरलं ताले मधुरं रसिताम्
रसिकजनानां हृदये लसिताम् ।। लावण्यवतीम्

प्रावरणावृतकबरीभाराम्
चूचुकभासितपीवरकुचभाराम्
पृथुलनितम्बविलासभराम्
दृष्ट्वा घूर्णितनयनां यान्तु ।। लावण्यवतीम्

शिञ्जाभ्रमरितसारसपादाम्
निभृतं सारणशब्दितपादाम्
मन्दितचालनभासितहंसपदाम्
चक्रभ्रमणे दर्शितक्षिप्रपदाम् ।। लावण्यवतीम्

भोक्तुं मां सरसां तन्वीम्
पृथुजघनां राकाग्लौवदनाम्
गाढालिङ्गनमृदितां वनिताम्
अहमहमिकया मन्मथभावयुताम् ।। लावण्यवतीम्

मदनक्रीडाभावसुबन्धनचतुराम्
सुन्दरभावपरीवहमधुराम्
कविवरकाव्यरसार्णवतीर्णां
रञ्जितमनसा मां द्रुतमायान्तु ।। लावण्यवतीम्

अस्मिन् लावण्यगीते नाट्यं प्रशिल्पितं विविधभङ्गिमासु । ततः अस्मिन् गीते नाट्यसुन्दरी चलन्तीव आह्वयन्तीव अस्मान् गृहीत्वा कर्षतीव प्रतिभाति ।

इदं गीतं किञ्चित् ग्रामीणश्रृङ्गारपरिपूर्णं भवति । आहार्यम् अस्मिन् नाट्ये भारतीयं भवत्यवश्यम् । अलंकरणादिकं भारतीयमेव भवति । अस्मिन् नाट्ये वादकाः स्थित्वा वाद्यान् वादयन्ति । इदं महाराष्ट्रपारंपरिकं नाट्यम् ।

**२४८. इतस्ततः वामदक्षिणभागयोः समाकुञ्चनविधानपरिभ्रमण-गतिनाऽधोदृष्ट्या मृदङ्गतालबद्धं सुन्दरं मणिपुरीनाटयम् ।**

मणिपुरीनाट्यं सामुदायकनाट्यं भवति । तदा तदा एकेनापि नाट्यं क्रियते । चालनक्रियाः ललिताः उदात्ताः अपि च मृदुलाः । अस्मिन् नाट्ये बहवः भ्रमणानि भवन्ति । मुखेषु उदात्तभावनाः भक्तिभावनाश्च प्रदर्श्यन्ते । सर्वदा नर्तकीनां दृष्टयः अधोमुखाः भवन्ति । आहार्यं चित्रविचित्रम् । पर्करादयः दर्पणैः संयोजिताः भान्ति । पर्कराः वर्तुलाकारेण परिवेष्टिताः भान्ति । अस्मिन् नाट्ये प्रायेण रासलीलामेव द्रक्ष्यामः । गोपिकाः समूहनाट्ये मन्त्रमुग्धान् कुर्वन्ति सामाजिकान् । नाट्येऽस्मिन् वैष्णवीयकथाः प्रसिद्धाः सन्ति । कृष्णः गोपिकाभिः रासलीलां कुर्वन् दृश्यते वृन्दावने । सूत्रधारः गायति तारस्थाय्याम् । प्रायेण जयदेवगीतगोविन्दकाव्यात् वैष्णवकवेः विद्यापतेः काव्यात् अपि च चैतन्यमहाप्रभुकाव्यात् समुद्धृतानि गीतानि अभिनीयन्ते ॥

**ललितोदात्तमृदुलाः**
**सर्वभावपरीवृताः ।**
**रासलीलाविलासात्ताः**
**गीयन्ते कृष्णगीतिकाः ॥**

अस्मिन् नाट्ये संचाराः अतीवविरलाः भवन्ति । इदं अत्यन्तसुकुमार-भावपरिपुष्टं हेलाविलासकलितं प्रतिभाति । वाद्यविशेषाः मृदङ्गतालाः भवन्ति । गायकाः वादकाः नाट्येऽस्मिन् उत्थाय केवलं स्वीयवादनप्रक्रियां समाचरन्ति ।

**२४९. संमोहनकारकं विलासभरितं दोलिकाचलनस्वरूपं मोहिन्यत्तं सुन्दरं नाटयम् ।**

इदं सामाजिकान् मोहतीति हेतोः कृत्वा एतन्नाम दत्तमिति मे भावना । इदं केरळीयं नाट्यम् । इदं भरतनाट्यवद् भाति अपरिचितानाम् । अस्मिन् नाट्ये

भावसंचारार्थम् अधिकावकाशः नास्ति। नाट्यमिदं बहुसीमितं वर्तते। अस्मिन् नाट्ये सौन्दर्यं प्रवहत्येव। इदं ललितसंचलनादिभिः पार्श्वभागाकुञ्चनगतिभिः अर्धवर्तुलैः सुन्दरं भवति। अस्मिन् नाट्ये सर्वथा लालित्यं भाति। अस्मिन् नाट्ये शरीरचलनं तरङ्गवत् बाहूचालनं लावण्यनद्यां नौचालनवत् प्रद्योतते। इदमत्यन्तभावपूर्णसौकुमार्यचलनचालनभावमुद्रासमञ्जितम्। आहार्यं भारतीयम्। वाद्यविशेषाः डमरुडिंडिमादयो वर्तन्ते। अधुना इदं कलिकारूपे वर्तते। अचिरादेव पुष्पवती भविष्यतीति भावयामः।

सौकुमार्याङ्गविन्यासैः
हेलाकलितवीक्षणैः।
यानपात्रगतिप्राञ्चत्
मोहिन्यत्तं मनोहरम्॥

नद्यां नौकासमानं तत्
लालित्यैः चालनैः प्रियम्।
इतस्ततः समुल्लासैः
मोहिन्यत्तं विकासते॥

## २५०. भावगर्भिताहार्यरञ्जितरङ्गरूपाङ्गुलिदर्शितभाववाद्यघोषाकलितं कथाकलिनाट्यं सुन्दरम्।

कथाकलिः केरळीयं नाट्यं भवति। इदं नाट्यं कथकनृत्यात् भिन्नं भवति। कथाकलिः कथानाट्यं भवति। नाट्यमेतत् सामूहिककलाकारैः क्रियते। एतत् सामान्यतः प्रायेण पुरुषैरेव क्रियते। किन्तु अधुना स्त्रियः अपि नाट्ये भागस्वामिन्यः भवन्ति। नाट्यदिने कलाकाराः न अदन्ति। आहार्यकक्षायां मध्याह्नात् आरभ्य नाट्यप्रारम्भपर्यन्तं वदने रङ्गलेपनं भवत्येव। कथाकल्यां रङ्गलेपनं यथापात्रं भवति। हरितवर्णलेपनम् उदात्तपात्राणां कृष्ण-राम-पाण्डवादीनां भवति। मुखे नासिकासमीपे एकः कर्गजखण्डः खड्गवत् संस्थाप्यते। एतादृशपात्राणां नासिकोपरिभागेषु फालभागेषु च सूचीतुल्यरेखाततीः कुर्वन्ति। कालिमरङ्गलेपनं वनवासिनां राक्षसानां किरातानां पालादीनां भवति। आहार्यम् अतिविस्तृतम् अधिकं पादमण्डलपर्यन्तं पर्करारूपेण भवति। पर्कराः सर्वे रेखाभिः

नदीप्रवाह इव स्यन्दमानाः नेत्रदीपकं कुर्वन्ति । किरीटकुण्डलादयः अत्यन्त-शोभायमानाः मोहभावं प्रजनयन्ति । कथाकलिनाट्ये केवलनाट्यं प्रवाहरूपेण अखण्डितरूपेण न संदृश्यते । हस्ताङ्गुलिभिः प्रदर्शिता भावप्रकटना प्रेक्षकाणां दुर्बोधका भवति । सामाजिकः यदि कथासन्निवेशैः सुपरिचितः तदैव एतन्नाट्यं सुबोधकं भवति । सामान्यतः पुराणकथाः एव दृश्यन्ते अस्मिन् नाट्ये । नाट्ये तदा तदा परिभ्रमणादयः द्रुतचलनं हाहाकारैः च नर्तकैः क्रियते । एतत् ओडिशीभरतनाट्यकूचिपूडिनाट्येभ्यः भिन्नं हि दृश्यते । अस्मिन् नाट्ये नाट्यात् नाटकीयता एव अधिकतरं दृश्यते ।

पृथुलाहार्यसंयुक्ता
भावगर्भसमाश्रिता ।
अङ्गुल्याभिनयेनात्ता
सुन्दरा हि कथाकली ॥

पञ्चवाद्यसुघोषाभिः
गानाक्रोशपरीवृता ।
वस्त्रखण्डात्तहस्तैश्च
भणतीयं कथाकली ॥

## २५१. नाट्यनाटकरूपाभ्यां गायनेन च सुन्दरं यक्षगानम् ।

इदं लावणीनाट्यवत् ग्रामीणं भवति । लावणीनाट्ये शृङ्गाररसः अधिकतरः वर्तते । अस्मिन् यक्षगाननाट्ये ग्रामीणानां विद्यागन्धप्रसाराय नाट्यनाटक-गानरूपेण महाभारतरामायणभागवतकथाः संनिविष्टाः अभवन् । इदं यक्षगाननाट्यं प्रथमतः आन्ध्रभाषायां विलिखितम् आसीत् । आन्ध्रीयाः यक्षगाननाट्यं विसृज्य कूचिपूडिं समाश्रितवन्त. अभवन् । अधुना इदं कर्णाटकदेशे प्रचुरं वर्तते । अस्मिन् नाट्ये कथाकथनं नाटकरूपेण गायनरूपेण च भवति । अभिनयस्य मुद्रा-प्रदर्शनाय चात्र स्थानम् अधिकं न विद्यते । नाम्ना केवलं ज्ञायते । गानप्राधान्येनेदं नाट्यं प्रचलतीति । अस्मिन् नाट्ये सर्वे पुरुषा एव नटन्ति । वेषधारणा भारतीया भवति । वाद्यविशेषाः भारतीयाः मृदङ्गतालवीणादयः ध्वनन्ते ।

## २५२. काश्मीरजातलतान्तगन्धः इव सुगन्धिलं लोरीनाटयम् ।

लोरीनाट्यं काश्मीरीयम् । इदं काश्मीरलतान्तजातरजोमिलितं सर्वेन्द्रिय-मोहकं भवति । अस्मिन् नाट्ये नाट्यसुन्दर्यः कुसुमकदम्बकमालेव एकस्यां श्रेण्याम् अन्योन्यं हस्ताववलम्ब्य नामितशरीरोर्ध्वभागिन्यः इतस्ततचालनैः करकङ्कणकणितैः तालबद्धपादमञ्जीरध्वनिभिः तदा तदा उन्नमितग्रीवाभिः विचञ्चलदृगञ्चलैः मत्तमयूरनाट्यमिव नाट्यं कुर्वन्ति । तेषु नाट्येषु गायनं वर्तते । तद् गायनं ग्रामीणजीवनेतिवृत्तभरितं भवति । शतधा गायनं काश्मीरीभाषायामेव भवति । वाद्यविशेषाः सन्तूरमृदङ्गादयः उपयुज्यन्ते । इदं नाट्यं प्रसादगुण-संभरितं मनोरञ्जकं काश्मीरसौन्दर्यमिव मनमोहकसुन्दरं भवति ।

लहरीरूपमापाद्य
हस्तचालनविभ्रमाः ।
भवन्ति सरसाः पथ्यं
कलालोकनमानसाम् ॥

लहरीशब्दरूपं तु
लोरीरूपमपद्यत ।
रसास्वादनवेलायां
रसिकानां पदेषु तत् ॥

तदाप्रभृति लोरीति
चलति स्म मुखे मुखे ।
भारते जनता स्वान्ते
मनोरञ्जनपूर्वका ॥

काश्मीरदेशवत् स्वच्छं
चित्रितं सुमितं सदा ।
शीतलं गन्धिलं रम्यं
लोरीनाटयं सुहृत्प्रियम् ॥

सुमसदृशतरुण्यः कोमलाङ्गैः सहेलम्
करचरणनिबद्धैः कङ्कणैः निकणद्भिः ।
अतिमधुरविलासैः गन्धिलैः सूनरागैः
रसिकजनसुरम्याम् आचरन्तीह लोरीम् ॥

यदा एका सुन्दरी नृत्यति रसिकाः स्वात्मनः विस्मरन्ति । यदि सर्वाभिः सुन्दरीभिः समूहे नृत्यते चेत् सौन्दर्यं एकत्रकलावतीत्वं संप्राप्य नानाविधरूपरङ्गैः चन्द्रकलासादृश्यं तरलत्वमापाद्य रसिकानाम् अनिर्वचनीयम् आनन्दसौन्दर्यं दास्यत्येवेति कथने न काऽपि शङ्का वर्तते । नाट्यसमये संगीतसौन्दर्यं वाद्यानां नादसौन्दर्यं आङ्गिकाहार्य सात्त्विकभावाभिनयसौन्दर्यम् । एकत्र मिलित्वा ओतप्रोतरसं प्रवाह्य रसिकान् आनन्दस्वर्गधाम प्रापयिष्यतीति कथने नातिशयोक्तिः विद्यते । तस्मात् सौन्दर्यं समष्टयाम् अनिर्वचनीयं भवति शब्दानां भावानाम् अपि ।

२५३. क्षिप्रचालनैः वैशिष्ट्यपूर्णहस्तचालनैः दीपशिखाज्वलित-कुम्भभारन्यस्तमस्तकशोभितं नाट्यं राजस्थानीयम् ।

इदम् अत्यन्तकष्टतरं नाट्यमिवाभाति नाट्यसुन्दर्यः तरुण्यः नोचेत् तरुणाः पञ्च उत सप्तकुम्भैः स्तम्भाकृतिं विधाय अंतिमकुम्भाग्रे ज्वालां विधाय तत् दीपकुम्भस्तम्भं मूर्ध्नि निक्षिप्य तालानुगतिं नाट्यं कुर्वन्ति पार्श्वगायकाः तन्तुवाद्यानि मृदङ्गवाद्यानि चोपयुञ्जते। एकः तारस्थाय्यां गायन् आस्ते । तस्य गायनानुसारं वाद्यानां तालानुसारं नर्तकी नोचेत् नर्तकः नाट्यं करोति । सामान्यतः सामाजिकविषयाः एव अस्मिन् नाट्ये प्रतिबिम्बन्ते । कश्चन हस्तद्वयेन तालवाद्यं गृहीत्वा विशिष्टवादनप्रक्रियया गायनम् अनुकुर्वन् तालवादने स्वीयनैपुण्यं दर्शयति अस्मिन् नाट्ये सर्वरसाः संदृश्यन्ते आहार्यं तु देशीयं भवति । गीतानि राजस्थानीयभाषायां भवन्ति ।

सामाजिककथाबद्धं
वीररौद्ररसावृतम् ।
सर्वलोकसमाराध्यं
राजस्थानीयनाट्यकम् ॥

शृङ्गारकरुणालिप्तं
चन्द्रिकाशीतलान्वितम् ।
प्रसन्नतापरिख्यातं
राजस्थानीयकं प्रियम् ॥

खर्जूररसमाधुर्यं
चन्द्रिकासिक्तसैकतम् ।
राजस्थानीयनाट्यं तु
सर्वैरप्यनुभुज्यते ॥

इदं नाट्यं पौर्णिमानिशासु नोचेत् चन्द्रिकासु क्षपासु खर्जूररसपानसमं भुज्ञमानं महदानन्दसंदायकं भवति ।

## २५४. पंजाबदेशे केदारप्रपञ्चे संजातं ताण्डवोपमितं भांगडानाट्यं सुन्दरम्

नाट्यमिदं संपूर्णं ग्रामीणम् । अस्मिन् नाट्ये हावभावाः प्रदर्श्यन्ते यदा स्त्रियः नृत्यन्ति । पुरुषाणां नाट्ये तु हावभावानां स्थानं न भवति, किन्तु तत् ताण्डववत् उद्धृतं अत्यन्तवेगोपमितं उड्डीनादिभिः संराजते । अस्मिन् नाट्ये शरीरे विद्यमानाः सर्वाः नाड्यः स्नायवः संचलनं प्राप्नुवन्ति। सर्वमपि रक्तं शरीरे वेगप्रसुतं भवति । इदं सर्वदा केदारक्षेत्रेषु नवीनसस्योत्पादनसमये भवति । यदा गोधूमाः अन्यसस्यानि कृषीवलाः खलेषु सूर्पयन्ति तदा कृषीवलाः संतुष्टाः सस्यलक्ष्मीसौभाग्येन मनांसि विस्मृत्य नाट्यं कुर्वन्ति । साहित्यं गायने ग्रामीणं भवति वीरशृङ्गाररसपरिस्रुतं भवति । इदं नाट्यं प्राचुर्येण पंजाबदेशे ग्रामीणैः सस्यलक्ष्म्याः गृहागमनसमये कर्षकैः सानन्दं क्रियते ।

ताण्डवोपमितं नाट्यं
भाङ्गडानाट्यं विकथ्यते ।
ग्रामीणं केवलं शुद्धं
भ्राजतेऽङ्गविचालनैः ॥

पंजाबदेशसंभूतं
पंचाप इव निर्मलम् ।
ग्रामीणभावसंवृद्धं
भाङ्गडानाट्यं विराजते ॥

सामूहिकमिदं नाट्यं
युवतीयुवकैः सदा ।
क्रियते सस्यवेलायां
सोत्साहं बहु सुन्दरम् ॥

अस्मिन् नाट्ये गायनेन समं मड्डुडिण्डिमादयः समुपयुज्यन्ते । इदं शक्तिसमुपेतं वेगसंयुक्तं नाट्यम् । आहार्यं ग्रामीणमेव योग्यं भवति । इदं सहजसुन्दरं उत्साहपूर्णं च भवति । उपरोक्तानि त्रयोदशात्मकानि सर्वाण्येतानि नाट्यानि दृढसुन्दरतारुण्यपूर्णशरीरलतायष्टिभिः विविधवातावरणेषु विविधवाद्यविशेषैः विविधप्रादेशिकभाषासु प्राचुर्येण संस्कृतभाषायां च प्रयुज्यन्ते । एषु नाट्येषु अनेकता विविधता भाषाभि आहार्यैश्च वाद्यविशेषैश्च संदृश्यमान अपि भावैः हावभावविकासलास्यैः एकात्मायत्तं परमात्मसायुज्यप्राप्त्यै प्रद्योतकं भवति । नाट्येषु एकात्मता अन्तर्लीना भाति । तस्मात् नाट्यं एकात्मतासाधकोपयोगं महत्त्वपूर्णसाधनं भवतीति कथने परमानन्दो भवति । सर्वाण्येतानि नाट्यानि सच्चिदानन्दरसस्वरूपसौदर्यप्रदर्शकानि भवन्ति । इदं सर्वजनस्य भवत्येकं समाराधनं काव्यसौन्दर्यानन्तरं परमानन्ददायकं चात्यन्तसुन्दरं सर्वजनसमादरणीयनाट्यसौन्दर्यमेव भवति ।

नाट्यरूपैश्च काव्यानि
शिल्पितानीह भारते ।
देवालयेषु रम्याणि
प्रजाज्ञानाय पूर्वजैः ॥

नाट्याराधकाः – सर्वाण्येतानि नाट्यानि सकलगीतानां वर्णनानां व्याख्यानमभिनयरूपेण कुर्वन्ति । व्याखयाने मुद्राभिः चतुर्विधाभिनयैः शृङ्गारचेष्टाभिः रसः परिप्लुतो भवति । मुद्राणां व्याखयानं सहृदयाः परं काङ्क्षन्ते नाट्यं सर्वदानन्दसौन्दर्यप्रजननहेतुः भवति ।

इति श्रीगीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना महाकविना पण्डित ओगेटि परीक्षितशर्मणा विरचितायां सौन्दर्यमीमांसायां नाट्यसौन्दर्यप्रकरणं समाप्तम् ।

## १५. काव्यसौन्दर्यप्रकरणम् ।

सर्वललितकलासौन्दर्येषु काव्यसौन्दर्यं महत्त्वायते । काव्यसौन्दर्यं सर्वेषाम् अदृष्टं भवति दर्शनानुपदमेवाविदितं भवति च । काव्यसौन्दर्यम् आलोचनामृतं भवति । काव्यसौन्दर्यं सर्वजनानन्दसौन्दर्यदायकं भवत्येव यदि सम्यक् विशदीक्रियते सूरिभिः । काव्यसौन्दर्यम् अजरामरं भवति संसारे । रामायणमहाकाव्यं मेघदूतमहाकाव्यं च शाश्वतसौन्दर्यपरिपूर्णौ अजरामरं राजेते । सत्काव्यं सौन्दर्यमयं बहुचित्रितं विविधवल्गुवर्णशब्दाहार्यमण्डितं भावपूर्णं साधुवृत्तपरिवेष्टितम् अमृतमयं सकलकलापरिपूर्णं चन्द्रमण्डलमिव प्रतिभाति । महाभारतं भागवतपुराणं च आचन्द्रतारार्कं रामायणमेघदूतसहितं स्थास्यन्ति धरातले नित्यसौन्दर्ये । यद्येषु काव्येषु सत्यसौदर्यं नास्ति एतानि काव्यानि एतावत्पर्यन्तं जीवितानि न भविष्यन्ति । सौन्दर्यं परमात्मस्वरूपम् । काव्येषु परमात्मस्वरूपसौन्दर्यं विद्यते तस्मादेव तानि शाश्वतानि भवन्ति । एतानि काव्यानि प्रजापतिसमेन कविना सृष्टानि सन्ति । काव्येषु यदि परमात्मस्वरूपसौन्दर्यं न भवति काव्यानि मृतानि भविष्यन्ति ।

संसारोऽयं विभात्येव
कविकाव्येषु बिम्बवत् ।
संपूर्णगुणभावैश्च
सौन्दर्यरसरीतिभिः ॥

संसारोपमितं काव्यं
सृज्यते कविपुङ्गवैः ।
धात्रासमैः च लोकेऽस्मिन्
शक्यते नान्यमानवैः ॥

सुन्दरकाव्यनिर्माणे कवेः प्रतिभाव्युत्पत्तियुतिः आवश्यकी भवति। सामान्यतः व्युत्पत्तिः परिश्रमेण निरताध्ययनेन विविधशास्त्रपरिचयेन पण्डितसहवासेन कालक्रमेण जातसामाजिकानुभवेन भवत्येव। प्रतिभा तु जन्मनः संक्रामति। प्रतिभावान् कविः रम्यसृष्टिं करिष्यति यदि लोके एतद् द्वयं एकत्र युज्यते तत्रैव रससौन्दर्यपूर्णकाव्यप्रथनं भविष्यति। काव्यसौन्दर्यसिद्ध्यर्थं विविध-सौन्दर्याणां समावेशः आवश्यकः भवति लौकिककवेः। अलौकिककवेः सर्वमपि जन्मना समायत्तं भवति। काव्यनिर्माणे अन्तर्-बाह्यगुणाः आवश्यकाः भवन्ति। काव्यस्य बाह्यगुणाः नाम-वर्ण-शब्द-वाक्य-वृत्तालंकार-रचना-शय्यासौन्दर्याणि इत्यादयः भवन्ति। अन्तर्गुणाः नाम गुण-भाव-ध्वनि रससौन्दर्याणि इत्यादयः भवन्ति।

## २५५. सर्वे वर्णाः सौन्दर्यपूर्णाः भवन्ति।

यस्माद् भाति जगत् सर्वं
रञ्जितं वर्णसंकुलम्।
तस्मात् वर्णाश्च सर्वेऽस्मिन्
रञ्जिताः शक्तिसंयुताः॥

वर्णशब्दोच्चारणेनानुपदमेव रङ्गाविर्भावः भवति समक्षम्। अक्षराणां वर्णाः इति नाम रङ्गेनैव जातमिति अस्मादृशानां मतम्। यदा अक्षराणि लिख्यन्ते तानि रङ्गवल्लीकृतानीव प्रतिभान्ति। वर्णानां रङ्गरूपत्वात् ते सूर्यप्रकाशवत् सूर्ये विद्यमानवर्णवत् अक्षराणि भवन्तीति अक्षरशब्देन ज्ञायते। जगति सर्वाणि वस्तूनि अपि च स्थावरजङ्गमात्मकं विविधवर्णेभ्यः समुद्भूतानि। तस्मात् मानव-निर्मिताक्षराणि रङ्गनिर्मितानि भवन्ति। रङ्गचित्रिते संसारे एकैकवर्णस्य वळनमात्रेण परिसरप्रदेशेन वातावरणप्रभावेन विविधस्थानेषु तस्य वर्णस्य विविधरङ्गत्वं सिद्ध्यति। सर्वे एते वर्णाः सूर्यप्रकाशेन वर्णिता भूत्वा सौन्दर्यं प्रतिपादयन्ति। अधुना अक्षराणां विविधरङ्गत्वं विवृण्मः।

## २५६. वर्णेषु जातिभेदाः सुन्दररङ्गप्रमाणेन सन्ति।

वर्णानामपि जातिः शक्तिः प्रभादयश्च स्थावरजङ्गमादीनामिव वर्तन्ते। यथा स्थावरजङ्गमेषु उपरोक्तगुणाः प्रत्यक्षं संदृश्यन्ते तथा वर्णेषु न संदृश्यन्ते। किन्तु वर्णाः अत्यन्तशक्तिसंपन्नाः बहुविधरङ्गचित्रिताश्च।

अचः – अरुणासितपीतवर्णचन्द्रकान्तिसमानाः राजन्ते ।

स्पर्शाः – श्यामलशुभ्रशोणार्जुनकृष्णवर्णाः अपि च इन्दुकान्तिहरितमेचक-हरिद्रापाण्डुरवर्णाः अपि च असितविनीलारुणाञ्जनाभ कालिमवर्णाः सितकृष्ण-धवळलोहितइन्द्रनीलवर्णाः भूत्वा राजन्ते ।

अन्तस्थाः – कृष्णारुणासितक्षीरवर्णाः भवन्ति ।

ऊष्माणः – हेमरक्तदाडिमबीजप्रवालमल्लिकावर्णाः धन्ति ।

ळकारः – श्वेतवर्णः इति केचन ऋषयः प्रोचुः । वर्णानां लिङ्गानि च सन्ति । वर्णानां जातकमपि वर्ततेति भृगुकश्यपादयः निर्णयामासुः । यथा च मानवजीवने ज्योतिषशास्त्रस्योपयोगिता वर्तते तद्वत् जगति सर्वेषाम् अक्षराणां ज्योतिषशास्त्रावश्यकता वर्ततेति केषांचन मतम् । कानिचनाक्षराणि शुभनक्षत्रेषु शुभराशिषु संजातानि । तेषां प्रभावः साहित्ये अवश्यं संदृश्यते शुभाशुभप्रभावैः इति केषांचन मतम् । तस्मात् काव्यस्य माहात्म्यं ज्योतिषशास्त्रप्रमाणं भवति इति ज्ञातव्यम् । एतस्मात् कारणात् महाकवयः महाकाव्यानि अङ्गुळ्योपरि-गणनीयाः गणनीयानि च सन्ति । अचः पञ्चवर्गाः अन्तस्थाः ऊष्माणश्च विविधरङ्गचित्रिताः यथासन्निवेशं ओतप्रोताः अस्तव्यस्ताः च भूत्वा विविधार्थान् सौन्दर्यपूर्णान् प्रकटयन्ति । एतस्मात् कारणादेव बीजाक्षरेषु गायत्रीमन्त्रे चान्यमन्त्रेषु चोदात्तानुदात्तस्वरितप्रचयादिभिः वर्णसमुदायैः प्रभावशालीशक्तिः जायतेति तस्मादेव वर्णाः सुन्दराः नवरत्ना इव प्रकाशिताः वर्णसमाम्नायैः प्रतिभान्ति विविधरङ्गचित्रितपटमिव । यथा प्रत्येकवर्णसमवायेन विविधरङ्गचित्रितशब्दो भवति स च नवीनार्थं प्रददाति तद्वदेव विविधशब्दवर्णचित्रितवाक्यं विविधार्थत्वं वर्णचित्रणेन ददाति । ततः जगति सर्वाः भाषाः वर्णमालाः विचित्रिताः सुन्दराः भवन्ति । सर्वाः भाषाः विविधवर्णसमञ्चिताः सुन्दराः भवन्ति । अन्ततः सर्वाः सुन्दरभाषाः वर्णसमागमेनैव सुन्दरभावप्रतिपादकाः भूत्वा अनन्तसाहित्यं निर्ममुः इति सौन्दर्यमीमांसकानां मतम् ।

## २५७. विविधवर्णचित्रिताः शब्दाः सुन्दरार्थान् प्रतिपादयन्ति ।

सरलवर्णसंयुक्तशब्दाः श्रृङ्गाररसे शान्तकरुणरसेषु समुपयुज्यन्ते । परुषवर्णसंपृक्तः शब्दाः वीररौद्रभयानकादिरसेषु समुपयुज्यन्ते ।

वर्णभूषितशब्दास्तु
दर्शने श्रवणे भृशम् ।
अर्थप्रदाने शक्तास्ते
संसारे सौख्यदाः प्रियाः ॥

वर्णेषु नैकरङ्गाणाम अस्तित्वात् तेषां वर्णानाम् उच्चारणासंजातध्वनितरङ्गेभ्यः अपि च रङ्गाणां ध्वनितरङ्गाणां सक्रमक्रमसंयोगात् सौन्दर्यपूर्णवातावरण-विशेषात् निर्दिष्टार्थप्रभावात् सुन्दरार्थः प्रतीयते । वर्णानाम् अर्थस्तु न विद्यते । तथापि विहितार्थप्रमाणेन उपरोक्तप्रमाणेन केषांचनवर्णानाम् अर्थः प्रतीयते । ॐ अयं एकः वर्णः । किन्तु अस्मिन् वर्णे विद्यमानरङ्गाणां प्रभावेन ध्वनितरङ्गाणाम् आविष्कारेण सम्यक् उच्चारणेन तस्मिन् स्थित अ + उ + म् इत्येषां वर्णानाम् अर्थस्यास्तित्वात् तस्मिन् अक्षरे सर्वब्रह्माण्डमण्डलं संदृश्यते । एवमेव बीजा-क्षराणामपि अनुमेयं भवति ।

अणवः इव प्रद्योतमानबीजाक्षरैः पूर्वजाः जनैः असाध्यमपि साधयामासुः । एभिः बीजाक्षरैः तान्त्रिकशास्त्रम् अनन्तं बभूव । शास्त्ररीतिप्रयोगेन सर्वमपि साध्यं भवति । किन्तु केवलं पठनेन वाचनेन तेषाम् अक्षराणां प्रभावः न भवति । अस्मदीयक्रियाकरणे सम्यक् उच्चारणे च शास्त्रीयता प्रभ्रष्टा । ततः वर्णेषु शक्तिः अप्रभाविता जाता । पूर्वजनेषु भृगुदुर्वाससौ इत्यादि महर्षिषु क्रोधोऽजायत शापेषु शास्त्रीयोच्चारणस्य तेषां साधुप्रयोगात् प्रभावः समदृश्यत । सर्वं यदि शास्त्रीयप्रमाणेन क्रमपद्धत्या क्रियते असाध्यमपि साध्यं भवति । वर्णाः पुष्पसदृशाः कोमलाः भवन्ति वज्रवत् कठोराः च भवन्ति ससंदर्भं सम्यक् प्रयोगेण । तस्मात् वर्णानां रङ्गप्रभावात् उच्चारणे विद्यमानतरङ्गभावात् वातावरणं प्रशान्तम् अशान्तं च भवति ।

वर्णाणवः प्रयुज्यन्ते
संसारे साधुशिक्षितैः ।
सर्वशान्तिसुखार्थाय
सर्वनाशाय चापि ते ॥

## २५८. सुष्ठुप्रयुक्तः शब्दः कामधुक् भवति ।

विविधरङ्गचित्रिताः वर्णाः तेषां समवायेन निर्दिष्टार्थयुक्तशब्दाः भूत्वा नानाविधमञ्जुलार्थान् प्रयच्छन्ति । यदि प्रयोक्ता शब्दवेदी भवति सः सर्वशुभान् प्राप्स्यति शब्दशक्त्या सिसाधयिष्यति अन्यथा वैपरीत्यफलं प्राप्स्यति । यथा इन्द्रशत्रुः वर्धस्व इत्यनेन वृत्रः अस्पष्टोच्चारणेन उदात्तानुदात्तस्वरव्यत्ययेन वैपरीत्यफलमेव प्राप । तद्वत् सर्वोऽपि असाधुशब्दोच्चारणेन वैपरीत्यफलमेव प्राप्स्यति ।

शब्दाश्च रम्यवर्णात्ताः
प्रयुक्ताः साधु भूतले ।
तन्वन्ति ते महालक्ष्मीं
वैपरीत्येन नाशनम् ॥

तस्मादेव महर्षयः भगवन्त पाणिनि-कात्यायनि-पतञ्जलि-भर्तृहरि इत्यादयः वर्णशब्दानुद्दिश्य तेषां प्रभावमुद्दिश्य सविस्तरं जगति प्रथमतः जगदुः । तस्मात् काव्ये साधुशब्दप्रयोगः आवश्यकः । काव्यलेखनसमये साधुवर्णशब्दप्रयोगसंबद्ध-वाक्यरचना अपि च संदर्भानुसारं लालित्यं काठिन्यं च दर्शनीयौ । शब्द-माहात्म्येन वाक्यरचना समुदात्तभावालङ्कारध्वनिसौन्दर्यादिभिः काव्यं सुन्दरं भवति ।

## २५९. रसानुसारं वाक्यनिर्मितिः सुन्दरा ।

काव्ये पात्रद्वये नोचेत् तदधिकं विद्यमानपात्रसंबंधे संदर्भानुसारं संभाषणं भवति । तत्र द्वयोर्मध्ये नोचेत् बहूनां मध्ये लघुवाक्यप्रयोगः कर्तव्यः । यदि समयः शृङ्गाररसपरिपूरितः तत्र ललिताक्षरासंयुक्तशब्दसंपृक्तवाक्यनिर्माणेन भवि-तव्यम् । एवमेव सर्वेषु रसेषु सारल्यं पारुष्यं च वर्णानां विज्ञाय प्रयोक्तव्यं भवति । प्रदेशवर्णनाविषये समासभूयिष्ठवाक्यं शोभां जनयति । कथाकथने सर्वथा सारल्य-भूयिष्ठवाक्प्रयोग एव श्रेष्ठतमो भवति । सुन्दरवाक्यनिर्माणेन असंदिग्धपद-प्रयोगेन जगति वाक्प्रपञ्चं सर्वमपि काव्यप्रपञ्चं सकलमपि सुन्दरे

प्रतिभातः। भाषाशास्त्रं मानवनिर्मितशास्त्रेषु अत्यन्तप्रतिभान्वितं शास्त्रीयं लौकिकालौकिकव्यवहारयोग्यम् चास्ति भाषानिर्मातॄणां प्रथममहर्षिणां नमोवाकं प्रशंसास्महे।

शब्दशास्त्रप्रणेतॄणां
शास्त्रज्ञानां महात्मनाम्।
आद्यानां मानवाः सर्वे
ऋणिनो भान्ति भूतले॥

सुन्दरकाव्यनिर्माणे प्रधानाङ्गभूतानि वर्णशब्दवाक्यानि अत्यन्तावश्यकानि भवन्ति। अनन्तरं संदर्भानुसारं सुन्दरशब्दप्रयोगः सुन्दरसमासप्रथनं, सुन्दरवृत्तशय्या च प्रथितकथांशाश्चः मूलकारकाः भवन्ति।

## २६०. समाससौन्दर्यं संस्कृतभाषायाः सहजातालङ्कारः।

प्रपञ्चभाषासु वल्लीवलयमिव लतान्तचित्रितलतेव समाससुन्दरशय्याकवितायां न कुत्रापि संदृश्यते। एतादृशी उपरोक्तसुन्दरसमासविन्यस्तसुंदरशय्या केवलं संस्कृतभाषायामेव संदृश्यते। वचनं वचनकविता सर्वासु भाषासु वर्तते। किन्तु गद्यं समासभूयिष्टं ओजोगुणसंराजमानम् एकस्यां संस्कृतभाषायामेव सहृदयैः विलोक्यते। अयं सहजसौन्दर्यविन्यासः संस्कृतस्य समासास्तु सर्वरसेषु समुपयुज्यन्ते यथासंदर्भं यथारसं वर्णशब्दसंयोगेन। मञ्जुलशब्दसंराजमानाः समासाः भावप्रचोदकाश्च भवन्ति। एते समासाः रसस्यन्दमानाः पठितॄन् रसतरङ्गोपरि दोलायमानान् प्रकुर्वन्ति।

समासशय्या लुठिता च वाणी
रसार्द्रचित्ते नितरां लसन्ती।
अनेकभावावृत सुन्दरास्या
विभाति गीर्वाणकवित्वलोके॥

कवितायाम् अर्थसौन्दर्यम् अज्ञातमपि केवलं समासश्रवणेन चेतांसि रसिकानां मोमुद्यन्ते। विना च समासशय्यां कविता गतिविहीना प्रतिभाति केषांचन मते। समाससंराजमानकवितायाः सौन्दर्यं बाणभट्टहर्षचरिते कादम्बर्यां च रसिकैः समनुभूयते। संस्कृतभाषायां पदलालित्यार्थं दण्डिमहाकवेः दशकुमारचरितं सर्वैरपि

संस्कृतपदलालित्यसौन्दर्यकाङ्क्षिभिः समाद्रियते । समासपठनेन समासदर्शनेन श्रवणेन च प्रवाहरूपसौन्दर्यं बोभुज्यते रसिकैः । समासशय्याभरितकवितायाः उदाहरणार्थं संस्कृत-अमरवाणीकाव्यात् पद्यत्रयं ससंदर्भमत्र उदाहरामि । कविराक्षस इति नाम्ना प्रथितस्य श्रीकविसम्राट्विश्वनाथसत्यनारायणस्य ज्ञानपीठपुरस्कारेण संमानितस्य कवितामुद्दिश्य संस्कृतकवितामत्र प्रस्तौमि ।

अतिगाम्भीर्यपदार्थशब्दनिचयाद्यागारशृङ्गारवा-
क्ततिसंपूर्णरसध्वनिध्वनितवृत्ताकीर्णनानामनो-
ज्ञतसंभावितनव्यभव्यगुणसंज्ञायुक्तनाटयांगना-
गतिसंचारिमहोन्नतामृदुपदाकारप्रसादाञ्चिता ॥

सकलकलाविभूतिचयशालितशारदचन्द्रमाःकला
मकुटतटाञ्चलाञ्चितयमान्तकशंकरताण्डवेन सा
सुकविमुखान्तरान्तरविशोभितभारतभारतीप्रभा-
निकरविनिर्गतामलनटेशशयाञ्चितशब्दढक्कया ॥

विविधोत्कृष्टसमाससंधिसरसाविष्कारदिव्याङ्किता
कविराजन्यविशस्तवर्णसमताकाव्यात्मसंकीर्णिता
भुवि भाषाखिलजीवितामलसुधापूर्णार्थविद्योतिता
विविधार्थावृतवैश्वनाथसुवचोविश्वं तु संराजताम् ॥

अत्र समासशय्यायां प्रसन्नता ओजस्विता समता माधुर्यं सुकुमारतादि बाह्यगुणाः अन्तर्गुणैः मिलित्वा संराजन्ते । सुन्दरसमासग्रथनं यथा आन्ध्रकवयः अकुर्वन् कुर्वन्ति चान्ध्रभाषायां स्वीयरचनासु तथा अन्यभाषासु विद्यमानकवयः संस्कृतभाषायामपि कवयः नाकुर्वन् न कुर्वन्तीति श्रीविश्वनाथसत्यनारायणानां निष्कर्षः । तदुक्तिः उररीकृता अन्यभाषाकविभिः । समासविहीना कविता खण्डितावयवसुन्दरीव चलति प्रतिपदे पङ्गुत्वेनापि च विश्रम्य विश्रम्य दशान्तरेषु प्राप्नोति गम्यस्थानमिति गीर्वाणगेयकविमण्डलचक्रवर्तिनः अभिप्रायः । वेणीसंहारनाटककर्तुः भट्टनारायणस्य कविता सर्वाङ्गसुन्दरी समास-कुसुमसज्जिता सरसा नरीनर्ति रसिकहृदयेषु सर्वकालसर्वावस्थासु सर्वात्मना ।

## २६१. सर्ववृत्तानि सार्थकानि भवन्ति ।

वृत्तनामानि निरर्थकानि वा नोचेत् सार्थकानि वेति केषांचन मीमांसा चलति कविताप्रपञ्चे । सर्वदा वाग्विवादाः शक्तिहीनानां शक्तिसंपन्नानां भवन्ति । समबलगुणसंपन्नानां युद्धं भवत्येव लोके । कवितायां वृत्तनियमपालनम् अयोग्यम् अपि च वृत्तपालनं भावारोधकं भवति । कवितायां स्वैरविहारः स्वेच्छाविहारः कर्तव्यः न तु छन्दोबद्धविहारः इति शक्तिहीनानां मतम् । जीवितान्तं पठित्वा छन्दोनियमबद्धकवितां लिखितुम् अशक्ताः असमर्थाः भूत्वा वृत्तबद्धकवितां विनिन्द्य वचनं लिखन्ति केचन अपि च इयमेव कविता इति कथयन्ति च । नाट्याङ्गना वेश्या नटितुम् अशक्ता भूत्वा स्वीयशक्तिं अनिन्दयन्ती पार्श्ववादकानां तेषां वाद्यानां असामर्थ्यं कथयन्ती निन्दयन्ती नाट्यात् विरमति । तद्वदितिशक्तिसंपन्नानां कथनं भवति अशक्तिसंपन्नान् उद्दिश्य । कवितालेखने शक्तिसंपन्नाः छन्दोबद्धनियमबद्ध-वृत्तबद्ध-कवितालेखनमेव कविता भवति सः एव कविः भवति न त्वन्यः इति । वचनकारापेक्षया गद्यकाराः शक्तिसंपन्नाः ते कविशब्दवाच्याः भवन्तीति परेषां मतम् । जीवितान्तं पठित्वा तस्यां भाषायां कवितां लिखितुं अशक्ताः भवन्तीत्यस्य प्रत्युत्तरदानं हास्यास्पदं भवति । भवतु नाम ते कविताः लिखितुं वृत्तेषु असमर्थाः भूत्वा छन्दःशास्त्रं विनिन्दन्ति तत्र दुःखं भवति । वृत्तानि सर्वाणि निरुपयोगानि निरर्थकानीति ते कथयन्ति । तदसमीचीनम् । शक्तिसंपन्नास्तु कवित्वलेखनं नाम वृत्तबद्धकवित्वलेखनमेवेति तथा यदि लिख्यते सः एव कविः तदेव काव्यम् इति कथयन्ति । एवं एतयोः मध्ये वादविवादां भवन्त्येव । वृत्तबद्धशास्त्रबद्धकवितालेखनमेव कवित्वमिति तथा यः लिखति स एव कविः इति तेन लिखितमेव काव्यनाम भजतेति अस्मादृशानामभिप्रायः ।

व्यवहारार्थं समाजे कृतानि वृत्तानीति वस्तुतः वृत्तनाम्ना कोऽपि नास्ति इति पुरोगामिन इति अतीवप्रज्ञाशालिनो वयमिति चिन्त्यमानानां सिद्धान्तः । एतानि संदर्भानुसारं प्रयुक्तानि रसोत्पादनकारकाणि भवन्ति । यदा वियोगो भवति काव्ये सन्निहितशरीरयोः तदा वियोगिनी वृत्तम् उपयोक्तव्यं भवति । तदा तस्मिन् सन्निवेशे तत् अत्यन्तरसपोषकं भवति । तद्यथा मस्कृत-

श्रीमत्प्रतापराणायनमहाकाव्यात् उदाहरिष्ये। पञ्चत्वं गतं चेतकं विलोक्य तस्योपरि शिरः निक्षिप्य राणा विलपति।

समराङ्गणशत्रुसञ्चये
गहने सर्वशिलोच्चयेषु च।
सततं मम सन्निधौ वसन्
कृतवानोऽसि जयं हयाधिप॥

न हि ते सदृशा रणाङ्गणे
हयराजो भवतीति गर्वितम्।
तव सुन्दर चालनं वपु
कथमन्यो भजते धरातले॥

तव निस्स्वनमाकलय्य तत्
पटुहेषाध्वनितं दिगन्तरे।
लघुधावनचञ्चलं रणे
प्रविलोक्यैव परा विपेदिरे॥

तह देशहिताय जीवितं
अविचार्यैव समर्पितं सखे।
अतुलं त्रिदिवीयजीवनं
बहुधा ते भवतीति निश्चितम्॥

इति करुणया अश्ववियोगेन दुःखपरिणद्धमूर्तिः बभौ। उपरिनिर्दिष्टं सर्वं यदि वचने लिख्यते वृत्ते विद्यमानकान्तत्वं नैव विलोक्यते। नियमबद्धजीवने चलने च सौन्दर्यं वर्तते। तत् सौन्दर्यम् अनियमबद्धसौन्दर्ये नैव संदृश्यते। अपि च मानसिंहः स्वीयचमूचयं राणाप्रतापसैन्योपरि युद्धाय चालयति। अत्र पञ्चचामरवृत्तं यथासंदर्भं पदातिचालनार्थं तालयबद्धयुतम् उपयुक्तम्। पश्यन्तु मद्रचितश्रीमत्-प्रतापराणायनमहाकाव्यात् समुद्धृतश्लोकद्वयम्।

चलत् चलत् धिमिद्धिमि ध्वनन्मृदङ्गतालिका
पदे पदे स्ववीरमुद्रमुद्रिता सुवेगिनी।

ससारवाहिनीतुरङ्गयूथशोभिनी परं
त्रिशां पतिं चमूपतिं प्रतापसिंहभूपतिम् ॥

अनुक्षणं प्रतिक्षणं पदातिवेगचालनैः
तदीय वाहिनी ययौ च हल्दिघाट्धराधरम् ।
विमत्तसैनिकस्फुरद्गजालिदीर्घबृंहितैः
करालशस्त्रशूलकुन्तमुद्गरादिशोभिता ॥

अकबर्सैन्येन सिंहवत् शार्दूलवत् प्रयुध्यमानं राणां विलोक्य शत्रवः कथं संभाव्य पलायिताः पश्यन्तु शार्दूलविक्रीडितवृत्ते ।

ग्रीष्मर्तौ खरदीप्यमानतरणिः सत्यं प्रतापाकृतिं
लब्ध्वा युध्यति खड्गबिम्बितकरैः तीक्ष्णांशुसंप्लावितैः ।
द्रष्टुं तं भुवि राजमानमिहिरं शक्त्या विहीनाः पराः
खड्गापातरयो विदारितकराः चेलुः तदा संगरात् ॥

अपि च

दिल्लयां अक्बर्सभायां राजलोकः पानशालायां किं किं करोति पश्यन्तु श्रीमत्प्रतापराणायनमहाकाव्यात् समुद्धृतम् । अत्रास्मिन् शृङ्गाररसपरिपूर्णपानशालायां राजन्यकं कथं पानकुम्भवाहिनीभिः व्यवहरति तत् दर्शयितुं मालिनीवृत्तं समुपयुक्तम् । इदं वृत्तं शृङ्गाररसपरिपोषकमिति जीवनानुभवेन निश्चित्य विलिखितम् ।

झटितिमदनशय्या लुण्ठने सक्तचित्ता
प्रविश विविधपुष्पैः सज्जिताङ्गी सुगन्धा ।
मम भुजयुगमध्ये कीरवाणि प्रकुर्या
सुरतमृदितरम्यां त्वामहं राज्यलक्ष्मे ॥

अधरमधुरपाने सक्तचित्ता भवामः
शृणु नहि तव मद्यं रोचते मह्यमद्य ।
अधरमधुरपानात् किञ्चिदूनं हि मद्यं
रसिकमनसि तथ्यं द्वन्द्वभावे प्रपन्ने ॥

मधुरवयसि लग्ने फुल्लवक्त्रारविन्दे
कथमिह निवसेयं त्वां विना मोहनाङ्गि।
मधुरमधुपिपासासक्तरोलम्बभूपः
तव भुजयुगमध्ये क्रीडितुं चास्मि कामे ॥

रसानुसारं संदर्भानुसारं वृत्तलेखनं काव्ये सौन्दर्यहेतुः भवति।

## २६२. साहित्यसंगीतयोः परस्परसंबन्धत्वात् यथारसं पद्यानां रागसूचना योग्या।

साहित्यसंगीतयोः अविनाभावसंबन्धो वर्तते भारतीयसौन्दर्यशास्त्रे। अयं संबन्धः परम्परागतः। जन्मनि जन्मनि किञ्चित् परिवर्तनारूपेण संक्रान्तः। एतावत्पर्यन्तं न कोऽप्यालङ्कारिकः द्वयोर्मध्ये विद्यमान-अविनाभावसंबन्धं प्रति सूचितवानस्ति तथैव रागाणाम् उल्लेखनमुद्दिश्य कृतवान्। तथाकरणे नैकानि कारणानि सन्ति। तेषु कारणेषु कानिचन कारणानि दर्शयामि। भरतादयः संगीतशास्त्रविषयान् उदाहृतवन्तः अभवन् किन्तु न रागविषयान्। अनन्तरमपि न केनापि रागादीन् उद्दिश्य प्रोक्तम्। तस्य कारणम् आलङ्कारिकाणां समयेषु संगीतशास्त्रेण रागाविर्भाव इति केषांचन मतम्।

मम मतस्तु परम्परागतरागवाहिनी खण्डिता इव प्रतिभाति। अपि चालङ्कारिकाणां सङ्गीतदृष्टिः नासीत्। समष्ट्यां संस्कृतसाहित्ये कुत्रापि अवकाशे विद्यमानेऽपि भैरवी कल्याणी इत्यादीनां रागाणां नामोल्लेखनं न कृतम्। एतावता अनुमीयते ते गायनकलायाः वाद्यकलायाः च प्रामुख्यं न ददुः इति। केचन कथयन्ति पद्यस्य रागयुतिः पठनसमये अनौचित्यकारणं भवतीति बुध्या ते नाङ्गीचक्रुः। यद्वा तद्वा भवतु साहित्ये रागाणाम् उल्लेखने मूकीभावः अरसिकतायाः निदानमिति मे निष्कर्षः। अयं कविः उपरोक्त अभावान् मनसि निक्षिप्य स्वीययशोधरामहाकाव्ये यथासंदर्भं रागोल्लेखनं कृतवान्। विषयमेनं प्रतिसंगीतप्रकरणे स्पष्टं सविस्तरं प्रतिपादितम्। शृङ्गारे मन्दाक्रान्तावसंततिलका मालिनीवृत्तादयः उपयोक्तव्याः। तेषां योग्यरागाः भागेश्री वसंत कामवर्धिनी नाट इत्यादयः भवन्ति। करुणरसप्रधानसंदर्भेषु शिवरञ्जनी भैरवी दर्बारी इत्यादयः

प्रयोक्तव्याः । वीररसप्रधानसंदर्भेषु वृत्तादयः मत्तेभविक्रीडितशार्दूलविक्रीडित-स्रग्धरादयः तेषां योग्यरागाः कदनकुतूहलम् पहाडी श्रीरागादयः प्रयोक्तव्याः । प्रतिरागे सर्वेरसाः स्यन्दमानाः वर्त्तते इन्द्रधनुषि रङ्गच्छटा इव । किन्तु रसिकः सहृदयः साहित्यज्ञः औचित्यविशारदः कं रागं कस्मिन् वृत्ते संदर्भे उपयोक्तव्यमिति विज्ञाय तेन प्रकारेण व्यवहारी भूयात् इति मे मतिः । एवं रसज्ञः उपरोक्त-प्रकारेण ससंदर्भं व्यवहरति तस्मिन् काव्ये रसानन्दः उत्कटस्वरूपः भविष्यतीति सौन्दर्यमीमांसकानां मतम् ।

## २६३. यत्र सौन्दर्यपरिनिष्ठितपद्यादिकं दृश्यते तत्र तदेव उत्तमकाव्यमिति कथ्यते ।

सामान्यतः काव्ये सर्वत्र सौन्दर्यं प्रतिपद्ये न दृश्यते । काव्ये सर्वसन्निवेशाः सुन्दराः हृदयङ्गमाः न भवन्ति किन्तु समिष्टयां काव्यं सुन्दरं भवति । काव्यकवितायां क्वचित् सौन्दर्यं क्वचिदसौन्दर्यं एकस्मिन् श्लोके ध्वनिः अन्यस्मिन् श्लोके रसः परत्र अलंकारः अन्यत्र अन्यकाव्यगुणाः विलोक्यन्ते । महाकवीनां वाल्मीकिव्यासकालिदासभवभूतीनां काव्येष्वपि सर्वे श्लोकाः ध्वनिपूरिताः रसभरिताः न भवन्ति । तत्र तत्र पञ्चषाणि सुन्दरभागसमलङ्कृतानि स्थानानि ध्वनिरसश्लोकभरितानि सन्ति । मूर्त्तीभूतसौन्दर्येऽपि सर्वभागाः सौन्दर्यभरिताः न भवन्ति । केचन भागाः कानिचनाङ्गानि शरीरे सुन्दराः आकर्षणात्मकानि न दृश्यन्ते तथापि सर्वं शरीरं आहत्य सुन्दरं प्रतिभाति । जगत् सर्वं सुन्दरासुन्दर-परिपूर्णं भ्राजते । एतादृशि जगति विद्यमानानां स्थितिरप्येतादृशी भवति ।

अत्रैव विद्यते सृष्टिरहस्यम् । देवस्य निर्माणं तदा तदा देवोऽपि न जानाति वयं के तत् रहस्यं ज्ञातुम् ।

यथा नित्यं जगत्सत् सर्वं
सुन्दरासुन्दरैः भृशम् ।
भ्राजते सुन्दरं तद्वत्
तथा काव्यं महीतले ॥

न केवलं काव्यविषये एतत् भवति । सर्वत्रान्यकलास्वपि एवमेव भवति ।

कलाः सर्वाश्च लोकेऽस्मिन्
दिव्यादिव्यै गुणागुणैः ।
तथापि ताः विराजन्ते
सुन्दराः प्राणिसौख्यदाः ॥

कविकृतकाव्येषु सर्वाणि सुन्दराणि शाश्वतानि न भवन्ति । एकं काव्यं वा काव्यद्वयं वा काव्यत्रयं वा सुन्दरं भवति । तस्मात् कविना जीविते बहुकाव्यानि लिखितव्यानि सन्ति ।

सृष्ट्यां बृहत्यां प्रभवन्ति नूनं
संमिश्रिता दोषगुणा नितान्तम् ।
तथापि संमिश्रितसर्वसृष्टिः
न निन्द्यते प्राज्ञजनैः कदापि ॥

अपि च

विशालसृष्ट्यां न विलोक्यते हि
निर्दोषता विश्वसृजप्रवृत्याम् ।
समस्तदोषास्पदमानवस्य
सृष्ट्यां कथं नैव भवन्ति दोषाः ॥

## २६४. भावचित्रशय्यामण्डितम् उत्तमं काव्यम् ॥

काव्ये सुन्दरभावः एव जीवनं आत्मा च । भावः यदि चित्ररूपेण अनिर्वचनीयानन्दं ददाति तदेव भावसौन्दर्यम् । तद्यथा मत्कृतयशोधरा-महाकाव्यात् प्रदर्श्यते ।

नेत्रोत्पलात् कज्जलमिश्रिताश्रु
स्रवच्च भेजे मृदुनालभावम् ।
कपोलभागे चिकुराः समन्तात्
शैवालभावेन परं ततान ॥

यशोधरा बालकं समूढ्वा रुदन्ती चलति । तदा तस्मिन् रोदने तस्याः नेत्रद्वयात् कज्जलमिश्रिताश्रु नाळभावं प्राप्य स्रवत् आस्ते । अत्र अश्रुप्रवाहः नाळमिव नेत्रद्वयं नीलोत्पलमिव भ्राजेते । कपोलभागे चिकुराः शैवालवत् व्याप्य अराजन्त । मुखं सर्वमपि रोदनेन जलपूर्णसरः इव बभौ । अत्र चित्रं सहृदयैः विलोक्यते यथा यशोधरा करुणरसे मज्जनोन्मज्जनं कुर्वन्तीव ।

अपि च

श्वेताम्बरावेष्टितहेमगात्री
पुत्रं वहन्ती विचचार दीनम् ।
दुःखाग्निसंज्वालितमूर्तिरेषा
ज्योतिः स्वयं मार्गयतीव रेजे ॥

अत्र हेमाङ्गी यशोधरा श्वेताम्बरावेष्टिता पुत्रं वहन्ती शोकाग्निना संव्याप्ता कालिमशिरोजावृता सा प्रज्वलितधूम्रशिखावृतदीपशिखेव गौतमम् अन्वेष्टुं प्रतस्थे । अत्रापि चित्रं सौन्दर्यपूर्णं संदृश्यते । एतद् उत्तमकाव्योदाहरणं भवति ।

२६५. स्वभावोक्तिप्रचुरं श्रवणानन्ददायकं मध्यमं काव्यम् ।

कवितायां स्वभावोक्तिः नाम यत्र यथावत् वस्तुवर्णनं दृश्यते तत्र तत् काव्यं मध्यमकाव्यं भवति । तद्यथा –

तडागे पद्मपत्राणि
शैवालं पङ्कजानि च ।
जलूकाः च विराजन्ते
भेका मत्स्याश्च सर्वदा ॥

अपि च

मत्कृतश्रीमत्प्रतापराणायनमहाकाव्ये भामसाहिकृतधनसहाय्येन सैन्यं युद्धाय सन्नद्धं विधाय सन्तोषेण विराजमानं राणां विलोक्य पाटेश्वरीकथनम् । अयि राजन्

सहेलं परालिं निरस्तं विधाय
महद्राष्ट्रमेनं प्रशान्तं विरच्य ।
जनालिं स्वराष्ट्रैकभक्त्या नितान्तं
चिरं जीव राजन् सुखेषु स्वराष्ट्रे ॥

२६६. भावविरहितपद्यगत्या विराजमानम् अधमकाव्यम् ।

चञ्चलं च भवतीह निश्चलं
निश्चलं च भवतीह चञ्चलम् ।
चञ्चलंच बहुनिश्चलं प्रियम्
निश्चलं च बहुचञ्चलं सुखम् ॥

श्लोकमेतत् वृत्तबद्धं भवति । अस्मिन् पद्ये कोऽपि रमणीयभावः नास्ति । इदम् अधमकाव्योदाहरणम् ।

२६७. गद्यरचनायां कवितासौन्दर्यं राराज्यते ।
कविप्रतिभाव्युत्पत्ती गद्यरचनायां दृश्येते ।

केषांचन मते गद्यरचना इत्यस्यार्थः अत्यन्तसरलभाषायां गदनसमये या भाषा उपयुज्यते तादृशीभाषालेखनमेवेति भवति । भाषणमिव यदि लिख्यते तत् गद्यं न भवति । गद्यं नाम भारयुतम् ओजस्वीभाषासंयुतम् इते मे मतम् । यथा च बाणभट्टकादम्बर्यां हर्षचरिते च संदृश्यते सुन्दररचना अपि च यथा दण्डिदशकुमारचरिते मनमोहनकारकरचना संदृश्यते तथा यदि रचना क्रियते तादृशीं रचनां गद्यम् इति कथने आनन्दो भवति । तथालेखने कवेः प्रतिभा संदृश्यते । एतादृशरचनावैशिष्ट्यं गद्यमिति निगद्यते । एतादृशगद्यमेव कवीनां निकषं वदन्ति ।

अर्थोपबृंहितं वाक्यं
समासालङ्कृताश्रियम् ।
आनन्ददोलासंयुक्तं
ध्रुवं कादम्बरीसमम् ॥

गद्यं वदन्ति गन्धात्तं
कुन्दमालासुरूपितम् ।
सुरम्यरसभावौघम्
सरसानन्ददायकम् ॥

एतादृशीं रचनां गद्यं कथयन्ति रसज्ञाः इति अस्मादृशानां सिद्धान्तः । गद्यस्योदाहरणम् –

( १ ) निदाघतरणिखरकरविकिरितकिरणगणविदारितहृत्–धरणीरमणी–कृताह्वानसमागतशीतलकरकशीकरसमञ्चितजलधरधारी प्रावृट्-कालः समागतः ।

( २ ) निखिलजलनिधिवितुलितशास्त्रविलसितभीमकान्तगुणगणग्रहण – पारीणः ।

यदि सर्वमपि काव्यम् एतादृशगद्यरचनया विलिख्यते तदेव गद्यकाव्यं स एव गद्यकविः इत्यभिधीयते अस्मादृशैः ।

## २६८. वचनरचनायां सारल्यं व्यज्यते

वचनरचना भाषणभाषावत् अर्थपरिज्ञाने सुन्दरं भवति । एतादृशरचनाकारः लेखको भवति न तु गद्यकारः इति अस्मादृशानां भावना । केवलकर्ताकर्म-क्रियासंश्लिष्टं वाक्यं वाक्यमेव भवति न तु रसात्मकं रचनाकाराः भवति । वचनस्योदाहरणम् –

सः पठन्तं माम् अपश्यत् । अनुपदमेव सः मम समीपं समागत्य तव पठनं मह्यं रोचते इति न्यगदत् । एतादृशवचनरचनाकरणार्थं जीवितान्तं पठनस्य आवश्यकता न भवति । तस्मात् प्रकारत्रयेण कवयः सन्ति ।

( १ ) पद्यकवयः ( २ ) गद्यकवयः ( ३ ) वचनकाराः

( १ ) वृत्तलेखकाः पद्यकवयः ( २ ) गद्यलेखकाः गद्यकवयः ( ३ ) वचनलेखकाः लेखकाः एव न तु कवयः । भाषान्तरीकरणेन कवयः न भवन्ति ते अनुवादकाः भवन्ति । काव्येषु तत्र तत्र ज्ञाताज्ञातदोषसमञ्चितमपि

सहजसौन्दर्यमेव भवति । यस्मादयम् अपारः संसारः गुणदोषसंमिश्रितः । दोषमिश्रणमपि सुन्दरमेव भवति ।

मृगाङ्कः सुन्दरो भाति
मृगाङ्केन समाश्रितः ।
पङ्कजं सुन्दरं भाति
शैवालेन परीवृतम् ॥

अपि च

सुवर्णाभरणं रम्यं
राजते ताम्रमिश्रितम् ।
तद्वत् काव्यं विभात्येव
स्वल्पदोषसमावृतम् ॥

संहत्य आनन्दप्रदायकं काव्यम् उत्तमं भवति । अन्ततः सर्वकलानां परमावधिः जगति आनन्दप्रजननमेव यस्मात् आनन्दो ब्रह्मा ।

इति श्रीगीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना महाकविना पण्डित ओगेटि परीक्षित्‌शर्मणा विरचितसौन्दर्यमीमांसायां काव्यसौन्दर्यप्रकरणं समाप्तम ।

## १६. संकीर्णप्रकरणम्

संकीर्णप्रकरणे वयं नैकविषयानुद्दिश्य संग्रहरूपेण विवृणमः । इदं संकीर्णप्रकरणं सौन्दर्यमीमांसायाः महत्त्वपूर्णविषयसंयुतनिकेतम अन्तिमं च भवति । नाटके रागेषु पद्यगायनम् औचित्यपूर्णं नोचेत् अनौचित्यपूर्णं वा इति वयं विवृणमः । एनं विषयमुद्दिश्य अधुनाऽपि चर्चा समाजे भवति । अस्यां चर्चायां सुमुखाः विमुखाः अपि सन्ति । रागाणां प्रवेशो मास्तु नाटकेषु इति केचन नाटकेषु रागाणां महत्त्वपूर्णं स्थानं वर्तते तेभ्यः सर्वत्र प्रवेशः दातव्यमिति कतिचित् संवदन्ति । अस्मिन् विषये वयं एवं विवृणमः ।

## २६९. नटनाप्रधानं नाटकं भवति ।

नटनाप्रधानं नाटकम् अपि च नट्यते इति नाटकम् । साहित्यशास्त्रे नाटकान्तं साहित्यमिति पण्डितकथनं वर्तते । तत्कथमिति केषांचन प्रश्नः । वयं तं प्रश्नम् उत्तरयामः ।

कूलङ्कषं हि पाण्डित्यं
कवेरावश्यकं भुवि ।
रम्यनाटकसृष्ट्यर्थं
काव्यलेखनकौशले ॥

नाटकलेखने कवेः सर्वशास्त्रेषु परिचयः, कूलङ्कषपाण्डित्यं चावश्यके भवतः । वाच्यलक्ष्यव्यङ्ग्यादीनां वृत्तानां बीजसन्धिविष्कम्भाङ्कास्यादीनां सात्त्विकव्यभिचारिभावानां रसाणां रागादीनां कामशास्त्रयोगशास्त्रादीनां ज्ञानार्थं नाटकरचयितुः कवेः संस्कृत पठनीयं भवति । एतस्मात् कारणात् नाटकान्तं साहित्यमिति प्रथितं बभूव । यथा निर्दिष्टशास्त्रबद्धनाटकरचना अत्यन्तकठिना भाति । आधुनिकेषु दिवसेषु सर्वे नाटककाराः सर्वे नटकाः एव । नाटकेषु पात्रादिचालनं संभाषणलेखनं पात्रानुसारं संभाषणलेखनं सर्वं रसाधिष्ठितं भवति । तथालेखनं कूलङ्कषसंस्कृतज्ञानविराजमानानां कवीनां केषांचन एव सुकरं भवति न तु सर्वेषाम् ।

## २७०. काव्यं सुन्दरम् ।

काव्यं चतुर्विधं भवति । एकं गद्यकाव्यम् । द्वितीयं पद्यकाव्यम् । तृतीयं चम्पूकाव्यम् । चतुर्थं दृश्यकाव्यम् । काव्येषु उत्तरोत्तरं बलीयं भवति ।

भट्टबाणकादम्बरीगद्यवत् सुन्दरं गद्यं यदि भवेत् तत्र गद्यपठनसमये यं कमपि रागं संयोज्य किञ्चित् रागयुक्तं गीयते तत् गद्यं श्रोतुं सुन्दरं भवति । केचन निस्सारं विना चाकर्षणं गद्यं पठन्ति । तत् अरसिकलक्षणम् । केवलगद्य-पठने शब्दानां महिम्ना समासविन्यासस्य माहात्म्येन सौन्दर्यं भवत्येव किन्तु

एकस्य रागस्य संयोजने हृदयरञ्जकता भवति । रञ्जयतीति रागः । यथा बाह्यसौन्दर्ये रङ्गरञ्जनेन बाह्यं सुन्दरं भवति तथैव रागरञ्जनेन गद्यस्य सौन्दर्यं भूत्वा तत् मनः रञ्जयति । ततः रागछायया गद्यं पठनीयम् । तदैव गद्यकाव्यं सुन्दरं भवति ।

## २७१. पद्यकाव्यं सुन्दरतरम् ।

पद्यकाव्यं नाम सर्गबन्धात्मकम् । प्रत्येकसर्गे विभिन्नवृत्तानां समावेशः सर्गान्ते सर्गे विद्यमानवृत्तात् भिन्नं विद्यमानस्य वृत्तस्योपयोजनम् । एतत् सर्वं रसानुसारं कविः निर्माति । पद्यकाव्यस्य श्रव्यकाव्यमिति नामान्तरं विद्यते । एतत् एकेन पठ्यते अन्यैः श्रूयते । अस्मिन् श्रव्यकाव्येऽपि नाटकीयता भवत्येव । किन्तु तत् सर्वं पाठकः पठित्वा श्रावकानां समक्षं नाटकीयदृश्यं निर्माति । ततः श्रव्यकाव्ये सर्वमपि ऊहनिर्माणं भवति । एतस्मात् कारणात् श्रव्यकाव्यं किञ्चित् कष्टतरं सर्वकाव्यापेक्षया । पाठकः संदर्भानुसारं एकैकस्मिन् सर्गे एकं रागं संयोज्य काव्यगायनं करिष्यति । सर्वे श्रावकाः पाठकोऽपि रागरञ्जिताः भूत्वा काव्यसौदर्यं ज्ञास्यन्ति । अत्रास्मिन् काव्ये गायनस्य अत्यन्तसुमुखकालावधिः भवति । अत्र गायकः संगीतज्ञः कवितानुसारं स्वीयगायनमाहात्म्येन कवेः कवितासौन्दर्येण मधुर इतिवृत्तेन सभारञ्जनं करिष्यति । अस्मिन् संदर्भे नाट्यस्य समयो न भवति । तथापि केचन श्रव्यकाव्यमपि दृश्यकाव्यमिव नाट्यरूपेण पठित्वा अभिनयन्ति तत् सुन्दरमेव भवति ।

**पद्यकाव्यं सदा रम्यं**
**रसपूर्णं मनोहरम् ।**
**पुनः पुनः पठित्वाऽसौ**
**रसिको याति सान्त्वनम् ॥**

## २७२. चम्पूकाव्यं सुन्दरतमम् ।

गद्यपद्यमिश्रितं चम्पूकाव्यम् । चम्पूकाव्यलेखने कवेः कौशल्यस्यावश्यकता भवति । कविः संगीतज्ञः यदि भवति गद्यपद्यं सम्यक् चलिष्यति काव्ये ।

गद्यपद्यमिश्रितकाव्यं पठितुं हृद्यं भवति । यथा च सुन्दरगानस्य वाद्यकलानुसंधानेन सौन्दर्यमेधते अपि च हृद्यता भवति तद्वत् पद्यस्य गद्यसंधानं रम्यं भवति । पाठकः चम्पूकाव्यं स्वीयकण्ठगतमाधुर्यस्वरेण विविधरागमञ्जरीभिः विविधसंदर्भेषु सुन्दरं भावपूर्णं गास्यति सामाजिकाः श्रावकाश्च रसानन्दं प्राप्स्यन्ति । चम्पूकाव्यं सर्वसौन्दर्याणामायतनम् ।

गद्यपद्यात्मकं काव्यं
हृद्यं सर्वमनोहरम् ।
वाद्येन मिश्रितं गीतं
यथा लोकप्रियं तथा ॥

## २७३. परिमितरागसंयुतं नटनाप्रधानं नाटकं सुन्दरतमं सर्वदा ।

चतुर्थं तुरीयं दृश्यकाव्यं सर्वाङ्गसुन्दरं भवति । दृश्यकाव्यश्रवणे प्रेक्षणे च अनुभूतिविषये विद्यमानसौन्दर्यमन्यत् श्रव्यकाव्यपठने द्योतमानसौन्दर्यमपरं भवति । दृश्यकाव्यं श्रवणे प्रेक्षणे च वाचिकाहार्याङ्गिकसात्त्विकाभिनयैः सुन्दरतमेषु काव्येषु सुन्दरतमं भवति । दृश्यकाव्ये पद्यानि गातव्यानीति केचन न गातव्यानीति अन्ये वाग्विवादान् प्रवर्धयन्ति । तत् असाम्प्रतम् । केचन औचित्यपालकाः अस्मादृशाः कथयन्ति नाटकेषु पद्यगायनसमये रागाणां बहुदीर्घतरगायनं मा भवतु किन्तु छायामात्ररागे पद्यं गातव्यं नटनस्य प्राधान्यं माहात्म्यं दातव्यमिति । नाटके पद्यानि अतिदीर्घतररूपेण गीयन्ते चेत् नाटकशब्दस्य कुठाराघातो भवति । ततः यथासंदर्भं यथारसं केवलं गातव्यमिति अस्मादृशानां सिद्धान्तः । यदि पद्यानि दीर्घतमकाले रागेषु गीयन्ते नोचेत् रागाणाम् उपयोगः न क्रियते नाटके रसोत्पत्तिरेव शङ्कास्पदा भवति । यदि नाटके निसर्गसौन्दर्यमुद्दिश्य वर्णना पद्ये भवति तदा तत् पद्यम् एकस्मिन् रागे गायनं दीर्घतमरूपेण सुन्दरं भवति, रसोत्पादनहेतुः भवति । यदि क्षिप्रं करणीयमभिनयकर्म । अपि च एकस्मिन् संदर्भे क्रुद्धो वीरः अन्यं मारयितु इच्छति तदा तत्र विद्यमानपद्यस्य दीर्घरूपेण रागबद्धगायनम् अयोग्यम् अनौचित्यं च भवति । तदा तत्र तत् पद्यं रागच्छायया गातव्यं वर्तते । तदेव तत्रौचित्यम् । सः पात्रविशेषः तत् पद्यं बहुदीर्घतमं

गात्वा अनन्तरं तं पात्रविशेषं मारयति सः अभिनयः अनौचित्यसहितः भवति। तत्र रसभङ्गस्याविष्कारः भात्येव। नाटके सर्वदा रागछायादर्शनमात्रेण पद्यगायनं सुन्दरतमं भाति।

लघुरागेण गातव्यं
योग्यरागानुमिश्रितम्।
द्रष्टव्यं रागरूपं तु
स्तोकं नैव प्रदीर्घकम्॥

## २७४. अनौचित्यपूर्णमपि नाट्यसंगीतं सुन्दरम्।

महाराष्ट्रप्रदेशे विचित्रितं मधुरातिमधुरं नाट्यसंगीतमितिनामक भवत्येकम्। भारते साधारणतः नाट्यं नाटकं नृत्तं ताण्डवं लास्यं इत्यादिशब्दैः अभिनयः संदृश्यते। किन्तु महाराष्ट्रदेशे संगीतेन नाट्यमित्यर्थे नाट्यसंगीतमिति नामकं बहुप्रचारे वर्तते। नाट्यसंगीतं बहुमधुरम अत्यन्तसुन्दरं च भवति। नाट्यसंगीत-कार्यक्रमः दक्षिणदेशेऽपि अवर्तत। कालक्रमेण तत् केवलगायनमिति मत्वा तत्र नाट्यस्यावकाशः नास्तीति विचार्य कलाकाराः तं साम्प्रदायं तिरस्कृत्य केवल-नाटकखेलनं अपि च केवल संगीतगायनं विधाय नाटके अभिनयस्य प्राधान्यं दत्वा संगीतस्य लघुरूपं दत्वा तेन संगीतस्पर्शेन नाटकं रसनिर्भरं विधाय खेलन्ति। किन्तु महाराष्ट्रदेशे बालगन्धर्वस्य सर्वङ्कषकूलङ्कषकलाप्रभावेन नाट्य-संगीतं पञ्चप्राणगर्भितं बभूव। तस्य पादमुद्राः अनुसृत्य केचनाधुनाऽपि नाट्य-संगीतं प्रदर्शयन्ति। इदं वैशिष्ट्यपूर्णं नाट्यसंगीत विराजते।

संगीतं नाट्यसंगीतं
नाटकं वीरपूजनम्।
राष्ट्रभक्तिश्च राजन्ते
महाराष्ट्रेऽनिशं प्रियम्॥

नाटकखेलने महाराष्ट्रीयाः सिद्धहस्ताः। अस्मिन् प्रदेशे युवकाः युवत्यः दृढसुन्दरतनुयष्टिभासमानाः केवलं कलासौन्दर्यनिमग्नाः नाटकं वा भवतु संगीतनाटकं वा भवतु संगीतं वा भवतु तेषु सर्वेषु स्वजीवितं समर्प्य अत्यन्त-दृढनिश्चयेन कलाराधनां कुर्वन्ति। नटनाविषये अकृत्रिमवर्तनेनात्यन्तसहजतया

कलासौन्दर्यमनुभूय कलासौन्दर्यपानम् अमृतमिव विधाय नाट्यसम्पदम् अविच्छिन्नं सर्वदा भासुरं कुर्वन्ति नाटकसौन्दर्यं नाट्यसंगीतसौन्दर्यं जीवनसौन्दर्यं ते समर्चयन्ति ।

अग्रेसराः प्रकुर्वन्ति
स्त्रियः सर्वस्तरेषु च ।
कलाराधनचित्तास्ताः
कलाः सर्वाः सुशोभिताः ॥

नाटकं रम्यशरीराकृतिविशेषेण सुन्दरं भवति । नाटकं कविकृतेतिवृत्तस्य निर्माणाकृतिविशेषेणैव अपि च पात्राणां शरीरावयववाचकमाहात्म्येनैव सुन्दरं लसति

नाट्ययोग्यास्तु भासन्ते
मधुराकारमण्डिताः ।
वाचिकाभिनयेनैव
न तु सर्वे शरीरिणः ॥

नाट्यसंगीते संगीतभागः हृदयाह्लादको भवति न तु नाट्यभागः । नाट्यसंगीते नाट्यस्यावकाशः नास्ति अन्यपात्राणि तूष्णींभावेन तिष्ठन्ति यदा गायकः गायति । किन्तु संगीतेन केवलं नाट्यं दर्शयन्ति तत् सुन्दरं भवति । इदं नाट्यसंगीतं सर्वेषाम् आनन्ददायकं न भवति । केवलं बालगन्धर्वगानप्रभावितानामेव इदममोघं भवति चानिर्वचनीयम् ।

रम्यशरीरयष्टिभासिततनुना रम्यावयवनिर्मितशरीरेण सुन्दरावयवसज्जित मधुरनटनया स्वल्पसंगीतस्पर्शनेन नाटकं सुन्दरं भवति न त्वन्यथा । सर्वाः सुन्दरकलाः विशेषतः नाट्यं सुन्दरपुरुषैः सुन्दरयुवतीभिः पोषणीयं भवन्ति न त्वन्यैः । एवं यदि अक्षरशः अस्माभिः अनुपाल्यन्ते तदैव नाटकं सुन्दरं भवति । योग्यरागसूचकसंगीतमिश्रितगायनेन नटनया च वाचिकेन च नाटकं सुन्दरं भवति न तु दीर्घरागगायनेनेति अस्मादृशानां मतम् ।

## २७५. ध्वनिसौन्दर्यमेव काव्यस्यात्मा ।

"ध्वनिरात्माकाव्यस्य" इति उक्तवताम् आनन्दवर्धनाचार्याणां सिद्धान्तोऽयमचलः । ध्वनिष्वपि कटुसुन्दरात्मकाः ध्वनयो भवन्ति । तेषु ध्वनिष्वपि

सौन्दर्यं श्रूयते दृश्यते च। काव्ये ध्वनिः नोचेत् रसः व्यञ्जनाव्यापारेण उत्पाद्यते। सः ध्वनिः नोचेत् रसः एव काव्यस्यात्मा इति मम्मटानन्दजगन्नाथादीनां सिद्धान्तः। यदा सौन्दर्यम् अर्थात् विश्वस्वरूपस्य भगवतः सूर्यनारायणस्य प्रकाशः अन्तः बहिश्च व्याप्य सर्वसृष्टिनिर्माणं चकार तदा प्रभृति सृष्टयां यत् श्रूयते दृश्यते खाद्यते अनुभूयते तत् सर्वमपि प्रकाशजन्यसौन्दर्यमेव। सर्वा सृष्टिः सूर्यप्रकाशजनिता वर्धिता नाशिता च भवति। तस्मात् जगति सर्वमपि किरणसंसर्गजन्यमेव भवति। तस्मात् सौन्दर्यमेव प्रकृत्याः आत्मा प्रकृतिस्थानाम् आत्मा भवति। सर्वप्रकारसिद्धान्तमार्गाः अन्ततः सौन्दर्यरूपपरमात्मानं दर्शयन्ति। सर्वं जगत् सुन्दरात्ममयं भवति। ततः काव्यस्यापि सर्वसिद्धान्तैः प्रदर्शितात्मनः सौन्दर्यमेव चरमसौन्दर्यं भवतीति ततः परं नान्यत् विद्यतेति तत् केवलं काव्यस्य जीवितमिति सौन्दर्यमीमांसकानां मतम्। रसध्वनिः सर्वरसेषु भवति। ततः रसानुसारं ते रसाः सुन्दरमूर्तयो भवन्ति नोचेत् सुन्दरवर्णेषु सौन्दर्येण प्रवहन्ति। ध्वनेः अपि सौन्दर्यं विद्यते। तदेव चरमसौन्दर्यम्। ध्वनिः रसश्च चरमौ न स्तः। तयोरपि विद्यमानसौन्दर्यमेव काव्यस्यात्मा। तत् कथं विवृणमः। प्रियः सखीनां पुरतः प्रियां कथयति।

आगमिष्यामि ते गेहं
यदेन्दुः चारु चुम्बति।
यामिनीमिति चोक्त्वाऽसौ
निर्जगाम यथामति॥

सखीनां मध्यगा तन्वी
पादाङ्गुष्ठेन मेदिनीम्।
लिखन्ती विनताङ्गी सा
रेजे भावैकसुन्दरी॥

यदा इन्दुः यामिनीं चुम्बति तदा त्वामहं समागमिष्यामि इति सः प्रियः सखीनां पुरतः प्रियाम् उक्त्वा निर्जगाम। तत् श्रुत्वा प्रिया यदा चुम्बति यामिनीमिति मननं कृत्वा पुलकाञ्चिता सा विनताङ्गी पादाङ्गुष्ठेन मेदिनीं लिखन्ती तस्थौ। अत्र लज्जा व्यज्यते अयं व्यञ्जनावृत्त्यासाधित ध्वनिविशेषः। अत्रापि चाग्रे गन्तव्यं वर्तते। तस्मात् ध्वनिविशेषात् एकः सुन्दरशिल्पविशेषः भावनयाऽनुमीयते। इन्दुः

यदा यामिनीं चुम्बति तदैव तथैव प्रियः मां विचुम्ब्य समालिङ्ग्य सुरतकर्मणि प्रवृत्तो भविष्यतीति ध्वनिरूपलज्जायाः चित्ररूपसौन्दर्यम् उत शिल्पसौन्दर्यं समक्षं दृश्यते । ततः ध्वनेरपि सौन्दर्यं विद्यतेति तत् सौन्दर्यमेव काव्यस्यात्मा इति सौन्दर्यमीमांसकानां सिद्धान्तः । एतावता अनेन सूच्यते ध्वनेः अपि सौन्दर्यं विद्यतेति । तथैव रसस्यापि रसानुसारं सौन्दर्यं रसिकैः अनुमीयतेति अस्मादृशानां मतम् । भावनया सगुणाकृतिरेव निर्गुणस्यापि सर्वैरप्यनुमीयते । रसिकः कलापिपासुः सर्वमपि सौन्दर्यंरूपे पश्यति । ततः सौन्दर्यमेव सत्यं शिवं सुन्दरं तत् ।

रसः त्वेकः तथाप्यत्र
भिन्नरङ्गेषु दृश्यते ।
तस्मात् सर्वं रसोत्पन्नः
रसः सो रङ्गरञ्जितः ॥

यदि श्रृङ्गाररसे सामाजिकेन रसः अनुभूयते, विचार्यमाणे सः रसः हरितवर्णेन रञ्जितः प्रवहति । करुणरसे रसः पारावतवर्णवत् विराजमानः सुन्दरं वहति । यदि रसः हास्यरसोद्भूतः तस्य वर्णः धवळः फेनिलमिव सुन्दररूपे दृश्यते । सौन्दर्यमेव रसः । रसः एव सौन्दर्यम् । जगति सौन्दर्याद्भिन्नं न किमपि विद्यते । तत् सौन्दर्यमेव सगुणसुन्दरपरमात्मा । भारतीयकलाः सुन्दरपरमात्मदर्शनार्थं सोपानमार्गाः इति सौन्दर्यमीमांसकानां मतम् ।

## २७६. रसाविर्भावः कथं भवति ।

अयं महान् विषयः ध्वन्यालोके काव्यप्रकाशे तदादिनाट्यशास्त्रे च बहुधा चर्चितो बभूव । तदत्र संग्रहेण दर्शयित्वाऽन्ततः मदीयाभिप्रायं विशदयामि ।

रसाविर्भावः कथं कुत्र
जायतेति भृशं पुरा ।
सूरिभिः कृतमासीच्च
संग्रहेण लिखामि तत् ॥

रसः कथं भवति कुत्र भवति इत्येनं विषयमुद्दिश्य बहुधा बहवः उल्लेखयामासुः। तत् सर्वं नाहं ददामि अत्र किन्तु संक्षिप्तरूपेण प्रदर्शयामि।

(१) रसोत्पत्तिः नायिकानायकनिष्ठिता भवति। अनुकरणेन नटेष्वपि रसप्रतीतिः भवति। आलम्बनविभावाः तथैव उद्दीपनविभावाः रामादिनायकेषु विद्यमानरत्यादिस्थायिभावान् उद्बोधयन्ति। कटाक्षाद्यनुभावैः रामगतरत्यादि-स्थायिभावः रसरूपस्य योग्यो भवति। निर्वेदादिव्यभिचारिभावानां साहाय्येन परिपुष्टिं प्राप्य रामादिषु अनुकरणपात्रेषु गौणरूपेण च रसस्योत्पत्तिः भवति इति भट्टलोल्लटसिद्धान्तः। अस्य सिद्धान्तस्य नाम उत्पत्तिवादः।

(२) शङ्कुकः अनुमितिवादेन भट्टलोल्लटमतं, सामाजिकानां रसोत्पत्तिहेतुः न भवतीति बुद्ध्या, निर्बलमिति मत्वा तस्य खण्डनं विधाय रसानुमितिवादं स्थापयामास।

अस्य अनुमितिवादे रसः रामादिनिष्ठितो न भवति। किन्तु रसः नटगतः भवति। शिक्षणाभ्यासचातुर्येण प्रदर्शितकृत्रिमविभावानुभावव्यभिचारिभावैः नटे रसस्य अनुमानं भवति। तस्मात् नटे रामबुद्धिः भवति। तां बुद्धिं वयं सम्यक् ज्ञानमिति न कथयिष्यामः अपि च मिथ्याज्ञानमिति अपि न कथयिष्यामः। तस्मात् अस्मिन् संदर्भे प्रदर्शितप्रतीतिभिः चित्रतुरगन्यायवत् ( अर्थात् सः तुरगः न हि किन्तु चित्ररूपे विद्यमानतुरगः इति ) अनिर्वचनीयप्रतीतिः भवति। साधारणतः अनुमितिः परोक्षज्ञानं भवति। अपि च रसस्यानुभूतिः प्रात्यक्षिकी भवति। ततः रसादिप्रतीतेः अनुमितिरूपस्यास्तित्वादपि अयं अन्यानुमिति-वर्गेभ्यः भिन्नो भवति। ततः नटगतरत्यादिस्थायिनः सामाजिकस्यापि अनुभव-योग्याः भवन्ति।

(३) एतत् असंगतमिति शङ्कुकस्य मतखण्डनं विधाय भट्टनायकः भुक्तिवादं स्थापयामास। तस्य वादे अभिधायकत्व-भावकत्व-भोजकत्वानि अर्थात् अर्थविषयकं रसादिविषयकं सहृदयविषयकम् इत्येतानि मुख्यानि भवन्ति। क्रमेण केवलम् अभिधाव्यापारस्य स्वीकरणेन अनेकाः स्पष्टार्थाः भूत्वा ते अनर्थान् कल्पयिष्यन्ति ततः भावकत्वभोजकत्वव्यापारस्वीकरणं योग्यं भवति। भावकत्वव्यापारबलेन अभिधाशक्त्यां विलक्षणता समुद्भवति। भावात्मकव्यापारः

रसस्य प्रतीको भवति। भावात्मकव्यापारः विभावादीन् साधारणीकरणे शक्तिमान् भवति। तस्मात् साधारणीकरणेन रसादयः भाव्यन्ते। ते भोजकत्वव्यापारद्वारा अनुभवस्मृतिरूपलौकिकज्ञानेन विलक्षणचित्तस्य विस्तारविकासादिरूपैः आनन्द-रूपपरब्रह्मास्वादसहोदरानुभूतिरूपम् उत्पद्यते इति भट्टनायकः।

(४) अभिनवगुप्तपादाः भट्टनायकमतं खण्डयित्वा अभिव्यक्तिवादं प्रस्थापयामासुः। एते कथयन्ति भावकत्वभोजकत्वव्यापारयोः आवश्यकता नास्ति इति। व्यञ्जनाव्यापारद्वारा गुणालङ्काराणाम् औचित्यम् इतिकर्तव्यतया रसाविष्कारं कुर्वन्ति। अत्र साधकं काव्यं साध्यः रसः साधनं व्यञ्जनाव्यापारः। अपि च इतिकर्तव्यतारूपे गुणालङ्कारादि-औचित्यस्य अन्वयो भवति। एवं भावकत्वम् अपि च भोजकत्वं च व्यञ्जनारूपेण स्वीकृत्य तया व्यञ्जनया सामाजिकेषु रसस्य अभिव्यक्तिम् अङ्गीकुर्वन्ति।

(५) अन्ये च बहवः बहुवादान् प्रस्थापयामासुः। ते वादाः सर्वे अस्मिन् संदर्भे उल्लेखनानर्हाः।

(६) रसः नोचेत् सौन्दर्यानुभूतिः नटेषु उत सामाजिकेषु सात्त्विक-भावयुतहृदयानामस्तित्वात् रङ्गदृष्टिभावगतानां सहृदयानां समक्षं स्थितसुन्दर-पात्रविशेषाणां भावनागतरङ्गकिरणानां संमिश्रणेन एकाग्रतायुतचित्तवृत्त्या अहमेव रामः अहमेव शिवः अहमेव नायकः इति सोऽहंभावेन मदीयसमक्षं विद्यमाना सा सीता नोचेत् पार्वतीति तादात्म्यबुध्या भावमन्थनेन मधुररागश्रवणेन अमृतोपमितरसः संजायते हृदयेषु इति तस्य रसस्यापि सौन्दर्यं विद्यतेति सौन्दर्यमीमांसकानां मतम्।

एकाग्रमनसा युक्तः<br>
सोऽहंभावेन भूषितः।<br>
सन्तताभिनये रक्तः<br>
रसमाप्नोति मानसे॥<br>
परस्पराक्षिसंजातैः<br>
किरणैरङ्गरञ्जितैः।<br>
समाबद्धाः प्रियैः भावैः<br>
आप्नुवन्ति रसं सदा॥

रसोऽयं जायते हृत्सु
सर्वदा रङ्गमिश्रणैः।
रागश्रवणरागैश्च
तादात्म्येषु यथा सुखम् ॥

२७७. क्षमासौन्दर्यं परमरमणीयम् ।

कृतापराधिनमपि यः करुणया क्षमां करोति सः क्षमासुन्दरः नोचेत् सा क्षमासुन्दरी भवतः।

कृतापराधिनं शान्त्या
करुणापूर्णचेतसा ।
क्षमां करोति सैवात्र
क्षमासौन्दर्यदीपका ॥
अश्वत्थामानमावीक्ष्य
शिशुहन्तारमाविला ।
मातृमूर्तिः क्षमायुक्ता
द्रौपदी तं मुमोच सा ॥

२७८. निद्रासौन्दर्यं नीरवनिश्चलयुतम् ।

गाढनिद्रामग्ना सुन्दरी स्वीयशरीरलावण्येन धृताहार्येण प्रशान्तस्थित्या स्वीयशरीरावयवसौन्दर्यैः सौन्दर्यं विकिरन्तीव एकत्रमूर्तीकृतसौन्दर्यराशिरिव प्रतिभाति। श्लोकमेतत् यशोधरामहाकाव्यात् समुधृतम् ।

निद्राति सा दक्षिणपार्श्वभागे
विन्यस्य शीर्षं मृदुबाहुदेशे ।
वामं पदं दक्षिणपार्ष्णिमूले
तृतीयसंख्येव तनोर्विलासैः ॥

अपि च सौन्दर्यं विलोक्य कथम् अन्ये ईर्ष्यायुताः म्लानमुखाः भवन्ति तदत्र निरूप्यते । इदमपि यशोधरामहाकाव्यात् गृहीतम् ।

यशोधरायाः सविधे प्रदीपिका
मुदा स्वदीप्त्या नितरां विगर्विता ।
विलोक्य सर्वाङ्गविलासिनीं तदा
रराज सा धूम्रमुखीव निश्चला ॥

यशोधरायाः पार्श्वे विद्यमानदीपिका स्वप्रकाशेन गर्विता तृतीयसंख्यायां वक्रस्थित्यां निद्रितायाः यशोधरायाः सौन्दर्यं विलोक्य विना च कम्पनं ईर्ष्यया धूम्रमुखी बभूव ।

## २७९. महाकाव्यं मौनसौन्दर्यम् ।

मौने विद्यमानसौन्दर्यं महाकाव्यम् । मौने विद्यमानसौन्दर्यम् अनेकध्वनीन् नैकभावसौन्दर्ययुतान् वितनोति । मौनमुद्रायुतानि शिल्पानि अनेकभावार्थान् वृत्तवर्तिष्यमानान् कथांशान् व्यञ्जयन्ति । मौनसौन्दर्यं सर्वभावसंकुलम् ।

एल्लोरा सर्वशिल्पानि
कथयन्ति कथाः सदा ।
समागतेभ्यो द्रष्टृभ्यः
मौनमुद्राविराजिताः ॥

मौनसौन्दर्यं प्रतिपदं नवं नवं असंपूर्णं च प्रतिभाति ।

## २८०. योगः सौन्दर्यमूर्तिः ।

मनःप्रकृतिसंबन्धे
युज्यते यदि निश्चलम् ।
मानवेन तदारोग्यं
भुज्यते सर्वसुन्दरम् ॥

प्रकृतिसंबंधे संयमनेन मनः युज्यते इति योगः । यदा चित्तं प्रकृत्यां संयमनेन लीनं भवति तदा चित्तवृत्तिः चाञ्चल्यहीना भवति । तस्मात् योगः चित्तवृत्तिनिरोधकः । योगाभ्यासेन सौन्दर्यमेधते । योगस्य प्रकृतिसंबंधो वर्तते । यावत्पर्यन्तं मानवजीवनस्य योग्यप्रकृतिसान्निहितत्वं वर्तते तावत् पर्यन्तं तस्यारोग्यं वर्धते सौन्दर्येण । यदा मानवः प्रकृत्याः दूरं दूरं गच्छति तदारोग्यसौन्दर्यं तस्य शनैः शनैः नश्यति । प्रकृतिसम्बन्धेन मानवः आरोग्यसौन्दर्येण संराजितः भवति । यत्रारोग्यं वर्तते तत्राकर्षणात्मकसौन्दर्यं वल्गते । ततः भगवान् पतञ्जलिः योगशास्त्रे प्रकृतिगुणान् मिलाप्य सौन्दर्यशक्तिसमन्वितयोगशास्त्रं निर्ममौ । यदि यः कश्चन योगाभ्यासं करोति प्रत्यहं तस्यारोग्यसम्पत् सौन्दर्यं च समेधते दिव्यरूपेण । योगस्याष्टाङ्गानि अधोनिर्दिष्टप्रकारेण सन्ति । "यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयः" इत्येतानि योगसिद्धये मूलभूतानि भवन्ति । नियमविरहितजीवने असौन्दर्यं संदृश्यते । नियमबद्धजीवने सौन्दर्यं नर्तिष्यति । उपरोक्तनियमाः तन्तु तन्तु पाल्यन्ते चेत् जीवनं सुन्दरं भविष्यति । शरीरसौन्दर्यार्थं दार्ढ्यार्थं च प्रकृतिस्थवन्यप्राणिनाम् आसनानि योगशास्त्रे समाविष्टानि सन्ति । तान्यासनानि कानीति संक्षिप्तरूपेण दर्शयामि कनिचनासनानि ।

( १ ) **पद्मासनम्** : इदमासनं पद्मवत् सुन्दरं भवति । अनेनासनेन प्राणायामध्यानसमाधयः उत्तमस्थायिगताः भवन्ति । इदमासनं ब्रह्मणः आसनम् । अनेनासनेन तनुयष्टिः दृढः च भवति ।

( २ ) **मयूरासनम्** : इदमासनं तिष्ठन्मयूरवत् भवति । मयूरेण यत् खाद्यते तत् सर्वं क्षणेनैव पचनं भवति कुक्षौ । मयूरासनकर्तुः पचनक्रिया सम्यक् भविष्यति । यदा पचनक्रिया सम्यक् भवति सर्वं शरीरं सुन्दरं भवति । मयूरासनाभ्यासकः सुन्दरः भवति मयूरवदिति कल्पना विद्यतेऽस्मिन् आसने ।

( ३ ) **वृषभासनम्** : इदमासनं वृषभस्य शिरः इव भवति । अनेनासनेन घुटकजानवः चलनक्षमाः भूत्वा मानवान् कार्यकरणे प्रचोदयन्ति । अनेन पादसौन्दर्यं समष्टयां शरीरसौन्दर्यं च समेधते ।

(४) **मकरासनम्** : मकरासनस्य स्थितिः मकरवत् दृश्यते। मकरः दृढः बलवान् भवति तद्वत् अनेनासनेन आसनाभ्यासकः दृढः भूत्वा सुन्दररूपेण नर्तिष्यति।

(५) **कूर्मासनम्** : कूर्मासनेन आसनाभ्यासकः कूर्मवत् चिरकालं जीविष्यतीति बुद्धया अपि च कूर्मवत् इन्द्रियाणि अङ्गानि च स्वायत्तं करिष्यतीति कल्पनया एतदासनं योगाभ्यासकाः कुर्वन्ति।

(६) **सर्पासनम्** : अनेनासनेन शरीरं सुन्दरं चलनयोग्यं भवतीति एतदासनम् अभ्यस्यन्ति। यथा सर्पस्य शरीरं स्निग्धत्वेन मञ्जुलं दृढतमं संदृश्यते तद्वत् सर्पासनकर्तुः शरीरं सुन्दरं दृढतमं भविष्यतीति योगाभ्यासकाः कथयन्ति।

एवमेवानेकासनानि शरीरसौन्दर्यपोषणार्थं दृढतनुसंपादनार्थम् उपयुक्तानि भविष्यन्ति। मानवः प्रकृतिसान्निध्ये यदि वर्तिष्यति सः चिरायुः सुन्दरः भवतीति योगशास्त्रस्य सिद्धान्तः।

**योगासनेन लोकेऽस्मिन्**
**मानवो भवति सुन्दरः।**
**यस्मान्निसर्गसंसर्गे**
**शक्तयः संति शाश्वतम्॥**

सौन्दर्यं सर्वेषु कर्मसु सर्वस्थितिषु भ्राजते। तत् ज्ञातुं सर्वैः न शक्यते।

## २८१. आयुर्वेदः सुन्दर-वेदः।

प्रकृतिसान्निध्ये मानवः आरोग्येण सौन्दर्येण च वर्धिष्यति। आयुर्वेदौषध-रसायनानि सर्वाणि प्रकृत्याः वृक्षेभ्यः गृहीत्वा कृतानि। इदं प्राकृतिकौषधम्। प्रकृत्यां विद्यमानानां प्राकृतिकौषधं सुन्दरं सहजं भवति। आयुः वेत्ति जानातीति आयुर्वेदः सिद्धमकरध्वजलेह्यं वसंतकुसुमाकरलेह्यं सुवर्णभस्म इत्यादीनि औषधानि अर्थयुक्तानि गुणयुक्तानि सक्रियारूपाणि च भवन्ति। क्षीरसागरमन्थन-वेलायां धन्वन्तरिणा समानीतम् अमृतमयमायुर्वेदशास्त्रम्। अनेन संतुलयितुं

नान्यदौषधशास्त्रं विद्यते । धन्वन्तरी-सुश्रुत चरकादयः सिद्धहस्ताः वैद्याः शास्त्रकर्तारः आसन् । कालक्रमेण सर्वोऽपि आयुर्वेदमेव सेविष्यति नात्र संशयः ।

आयुर्वेदसमं दिव्यं
चौषधं न हि वर्तते ।
स एव दास्यतीत्यायुः
सौन्दर्यं च धरातले ॥

सौन्दर्यारोग्यवर्धकः वेदः आयुर्वेदः । प्राचीनं सर्वं नावीन्येन संदृश्यते आधुनिक-तन्त्रज्ञानेन । प्राचीनं मद्यं नवीनपात्रे परिदृश्यमानमिव औषधं सर्वं परिदृश्यतेऽधुना ।

## २८२. भाषाः सर्वाः च सुन्दराः ।

वर्णसंयोगेन निस्वनस्वनमाधुर्येण शब्दसौन्दर्येण वर्णव्यत्ययजातशब्दध्वनि-संयोगेन जगति सर्वाः भाषाः उच्चनीचत्वं विना समानसुन्दराः । प्रथमतः परिचयाभावात् भाषाः श्रोतुं मनः संमुखं न भवति । यदि सातत्येन श्रुतिपथं भाषाः समायान्ति कालक्रमेण सर्वाः भाषाः सुन्दराः मधुराः भवन्ति । तदातदा परिचयाभावादपि एकश्रवणमात्रेण श्रुतिपथपतनेन काचन भाषाः अतिमधुराः भवन्ति । यथा मानवेषु सान्तत्यदर्शनेन प्रथमदर्शनमात्रेण सौन्दर्यमसौन्दर्यं संदृश्येते तद्वत् भाषास्वपि इति दृष्टान्तः ।

युवत्यः सर्वभाषाः तु
शब्दभावैश्च मण्डिताः ।
सुन्दरा भान्ति सर्वेषां
भाषासौन्दर्यमानसाम् ॥

जगति नैकभाषाः सन्ति । भाषाः स्वीयस्वीयप्रकृत्या परमरमणीयाः । अत्र सर्वजागतिकभाषाः प्रति उल्लेखनमनौचित्यम् अनावश्यकं च । तस्मात् जगति विद्यमानभाषाकुटुम्बिन्यः नामानि दास्यामि । एकैकस्मिन् कुटुम्बे नैकभाषायुवत्यः विराजन्ते । भाषाकुटुम्बसौन्दर्यमनूह्यम् अप्रतिमं च भवति । प्रधानभाषा-कुटुम्बिन्यः नामानि अधोनिर्दिष्टप्रकारेण सन्ति ।

कान्केशियन्[1] युरेलिक् च[2]
आल्टैक्[3] सीनोटिबेटियन्[4] ।
आस्ट्रोयेशियाटिक् च[5]
इण्डो-पासिफिक्[6] सलिषू तथा[7] ॥
आकूटेक्[8] चास्ट्रेलियम्[9] चाण्डीन्[10]
एषिमो[11] चाल्गोन्क्वियन् तथा[12] ।
सिनोटिबेटन्[13] खोइसन्[14]
आस्ट्रोटै[15] द्राविडी ततः[16] ॥
विराट् रूपेण राजन्ते
इण्डोयूरोपियन्[17] तथा ।
निटोसहरियन्[18] चैव
नैजर्कोर्डोफनैन च[19] ॥
एकोनविंशती संख्या
मात्रेणैव धरातले ।
विश्वभाषाकुटुम्बिन्यः
नैकसंतानसंयुताः ॥

एकोनविंशतिकुटुम्बिनीनां संतानं नैकसंख्यापरिमितं सौन्दर्ये विराजमानं विश्वजनमनमोहनकारणं भवति । सर्वाः भाषाः सुन्दर्यः वर्तन्ते नर्तन्ते च विश्वजनरसनाग्रेषु ।

## २८३. परिमितालङ्कारैः काव्यशोभा भवति नत्वनेकालङ्कारैः ।

प्राचीनालङ्कारिकाः संस्कृतभाषायाम् अलङ्कारशास्त्रं निर्ममुः। अलङ्कारशास्त्रं शास्त्रं नहीति केषांचनान्यशास्त्रकर्तॄणां मतम् । अलङ्कारशास्त्रं न केवलं शास्त्रं किन्तु सुन्दरशास्त्रमिति राजशेखरादीनां मतम् । वामनभामहदण्डिप्रभृतिभिः वर्धितमलङ्कारशास्त्रं विश्वनाथमम्मटानन्दवर्धनजगन्नाथादिभिः विराट्स्वरूपे विश्वव्यापृतं कृतम् । विचार्यमाणे अन्ततः सुन्दरनिर्मितकाव्ये उदात्तभावना-

संकलितसौन्दर्यमेव जीवितं भवति । जीवितसौन्दर्यवृध्यै परिमिताः अलङ्काराः शोभादायकाः भवन्ति । काव्यनिर्माणे एव सौन्दर्यं जायते । यदि अलङ्काराः अधिकाः भवेयुः शरीरभूतकाव्यस्य शोभा नैव भवति तद्विरुद्धं ते असह्याः भवन्ति । श्रीमदप्पयदीक्षितादिभिः शताधिकालङ्काराः निर्दिष्टाः सन्ति । तेषां सर्वालङ्काराणां काव्ये उपयोगो न भवति । यथासंदर्भं कतिपयालङ्काराः उपयोक्तव्याः कविभिः इति तेषाम् उद्देशः । अलङ्काराः बहवः सन्तीति दर्शने केवलं तेषां तात्पर्यम् । सौन्दर्यं केवलालङ्कारैः न भवति । अलङ्काराः केवलं भावविषयव्यक्तीकरणे उपयुक्ताः भवन्ति । तेषु उपमा रूपकम् उत्प्रेक्षा श्लेषः समासोक्तिः अर्थान्तरन्यासः काव्यलिङ्गम् इत्येतेऽलङ्काराः अग्रस्थानं भजन्ते । एतावत्पर्यन्तं प्रायशः कविभिः एते अलङ्काराः एव अधिकाधिकम् उपयुक्ताः नत्वन्ये । काव्ये निर्मितेः सर्वदा उदात्तभावनासंकलिता सौष्ठवाङ्गभूयिष्ठा च भूयात् इत्ययमेवाशयः ।

**स्वल्पालङ्कारभूयिष्ठं**
**काव्यं साधुविनिर्मितम् ।**
**अनल्पभावसंबद्धं**
**सौन्दर्येण विराजते ॥**
**रससौन्दर्यसंपुष्टं**
**ध्वनिसौन्दर्यसाज्जितम् ।**
**भावरागविसंकीर्णं**
**काव्यं भाति महीतले ॥**

काव्यस्य बाह्यसौन्दर्यं परिमितालङ्कारैः भवति न तु नैकालङ्कारैः । शब्दालङ्काराणाम् अर्थालङ्काराणां च उपयोगः संदर्भानुसारं रसानुसारं करणीयः वर्तते न तु सर्वत्र यथेच्छम् । सर्वत्र महाकवयः वाल्मीकिः कालिदासः भवभूतिः इत्यादयः अपि च प्रादेशिकभाषासु श्रीज्ञानेश्वरीपोतनादयः उपमालङ्कारमेव अधिकतमं स्वीयकाव्येषु प्रायुञ्जन् । उपमालङ्कार एव भिन्नरूपेषु विभिन्नस्थलेषु नामान्तरं भजते । तस्मात् उपमा शैलूषी इति अप्पयदीक्षितस्य कथनं सार्थकम् ।

## २८५. परमात्मा सौन्दर्यस्वरूपकः ।

सकलचराचरविश्वं चालयितुं कश्चन वर्तते इति सर्वेषां मतम् । सः यो वा को वा भवतु अनेकनामान्वितो वा भवतु निर्गुणो वा भवतु सगुणो वा भवतु कश्चन इति सर्वेषां संमतम् । तस्य प्रशासने सर्वमिदं जगत् परिवर्तते । सः प्रत्यक्षदेवः सूर्यः इति तस्य धाम केवलं कालपरिवर्तनं जननजीवनमरणादिकं करोतीति अस्मादृशानां निष्कर्षः । सूर्यः न केवलं भौतिकशरीरनिर्माता अस्ति । सः अन्तः शक्तिमूलकः अपि भवति ।

दिव्यं भौम्यं भुवः सर्वं
नित्यं तस्य कलामयम् ।
तद्भिन्नं नास्ति लोकेऽस्मिन्
महते रवये नमः ॥
संध्यां नमामि सूर्यस्थां
चराचरविवर्धिनीम् ।
कालचक्रं सदा शक्त्या
भ्रामयन्तीं च शाश्वतम् ॥

सौन्दर्यमुद्दिश्य ऋग्वेदे उषासूक्तादारभ्य चर्चा आधुनिककालपर्यन्तं चलत्येव । बहवः नैकवारं सौन्दर्यमुद्दिश्य आधुनिकयुगे प्रादेशिकभाषासु लिलिखुः । केचन पिष्टपेषणं चक्रुः पूर्वसूरिणां लेखनादिकं एकत्रीकृत्य । तदत्र नाहं कर्तुं शक्नोमि । अहं स्वतन्त्ररीत्या सौन्दर्यमीमांसां करोमि । सौन्दर्यदृष्टियुक्तानां रसिकानां भावुकानां तत्ववेत्तृणां प्रकृतिः सुन्दरतमा भवति । प्रकृत्याः ऋते नान्यास्ति सुन्दरी । केचन सौन्दर्यपिपासवः सन्ति ते केवलं सौन्दर्यं पास्यन्ति । अन्ये व्यापारमानसाः प्रकृतिसौन्दर्यं कलासौन्दर्यं प्रति न चिन्तयन्ति सुन्दरप्रकृतिमपि द्रष्टुं नेच्छन्ति । सर्वं जगत् सर्ववर्णसंकीर्णम् । तस्मिन् सर्ववर्णसंकीर्णविश्वे यत्र रसिकस्य सहृदयस्य कलाराधकस्य दृष्टिः समानवर्णकिरणमिश्रितस्थले पतति तत्र तुल्यकिरणवर्णसंकीर्णः भवति तदैव तत्र सौन्दर्यं भवतीति तच्च मननरूपेण तादात्म्येनात्यन्तसुन्दरं भवतीति मे सिद्धान्तः । ततः लोके यस्य यत् सुन्दरं भवति तत् अन्यस्यासुन्दरं भवति । तस्य कारणं तस्य बुद्ध्याम् असमवर्ण-किरणसंकीर्णमेवेति तच्च बुद्धिकिरणानाम् अप्रभावः इति मन्मतम् ।

रागहीनस्य सौन्दर्यमाहात्म्यं ज्ञातं न भवति । विरागस्य भावाः न भवन्ति । भावाभावे सौन्दर्यज्ञानं न भवति । वस्तुसौन्दर्यं प्रति दृष्टिः खाद्यपदार्थस्य स्वादः च बुद्ध्यां स्तः न तु दृष्ट्यां रसनायां चेति अस्मादृशानां अनुमेयः । समवर्ण-किरणसंजातभावनामन्थनेन स्वतः मनसि स्थितभावनावर्णेन मनसि रसायनं सुन्दरं परिणमते । अस्यां स्थित्यामेव रसिकः सौन्दर्यानन्दमनुभवति । तदा तदा सौन्दर्येऽपि सुनिशितभावनारङ्गविशेषेण असौन्दर्यं संदृश्यते । असौन्दर्येऽपि प्रतिदिनमननरूपेण दर्शनेन भावनया सौन्दर्यभावना संभवति । तस्य कारणं बुद्धिरेवेति भाव्यते । समष्ट्यां सर्वा प्रकृतिः सौन्दर्याऽसौन्दर्यमिश्रिता प्रतिभाति बुद्ध्या । सर्वमपि भावनाबलेनैव सुन्दरासुन्दरं भवति । सर्वा सृष्टिः भावना-बलेनैव संजाता । तस्मात् सृष्ट्याः रामणीयकता भावनाबलेनैव लोचनमार्गेणावगता भवति । सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् सभूमिं विश्वतो वृत्वात्यतिष्ठद् दशाङ्गुलम् । अस्मिन् सूक्ते सूर्यः एव प्रतीयते । सूर्यः एव सहस्रशीर्षा पुरुषः । अयं सहस्रादिकिरणैः सहस्राक्षो भूत्वा सर्वं विश्वं व्याप्य तिष्ठति । एनं स्वीयशक्त्या सन्ध्या प्रचोदयति सर्वविश्वव्यापृतकर्मणि । तस्मादेव सर्ववर्णे महादेवि सन्ध्या विद्येसरस्वति ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धामनामासि विश्वमसि विश्वायुः सर्वमसि सर्वायुः इति सन्ध्यादेवतामुद्दिश्य मन्त्राः सन्ति । ततः सौदर्य-प्रदायिनी विश्वव्यापिनी सन्ध्या एव । गायन्तं त्रायते इति गायत्री । ॐ भूः भुवः स्वः इति गायत्रीं सर्वे सौन्दर्यप्राप्त्यर्थं पटुतरशक्तिसंपादनार्थं सभक्तिकं पठन्ति । अपि च " वर्चस्वी भूयासं ब्रह्मवर्चसी भूयासं यशस्वी भूयासं मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु । अस्मिन् मन्त्रे सौन्दर्यप्राप्त्यर्थं तेजोभिवृद्ध्यर्थं अग्निरूपे विद्यमानसूर्यशक्तिं ब्रह्मचारी प्रार्थयति । एवं विचार्यमाणे विभिन्नरूपेषु विद्यमानसूर्यशक्तिरेव सौन्दर्यरूपपरमात्मस्वरूपकः । जगति सौन्दर्यमेव भिन्न-नामभिः व्यवह्रियते । आत्मापरमात्मवत् आत्मसौन्दर्यं भवति । तस्मात् सौन्दर्यरूपतेजोरूपपरमात्मैव सूर्यः । " सूर्य आत्मा जगतः तस्थुषश्च ' । एषः एव कालचक्रं भ्रामयति । अयमेवकालः । ततः कालाय तस्मै नमः । सौदर्यं सूर्यादेव भवतीति सौन्दर्यमीमांसायाः पिण्डीकृतसारांशः निष्कर्षश्च ।

इतिश्री गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना महाकविना पण्डित ओगेटि परीक्षित्‌शर्मणा विरचितायां सौन्दर्यमीमांसायां संकीर्णसौन्दर्यप्रकरणं समाप्तम् । एभिः षोडशप्रकरणैः सौदर्यमीमांसा समाप्ता ।

★★★